॥ अथतत्वमंजरीप्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ नारायणंगुणैःसर्वैरुदीर्णं
दोषवर्जितं ॥ ज्ञेयंगम्यंगुरूंश्चापिनत्वासूत्रार्थउच्यते ॥ १ ॥ विष्णुरेवविजिज्ञास्यःसर्वकर्ताऽऽगमोदितः ॥
समन्वयादीक्षतेश्चपूर्णानंदोंतरःखवत् ॥ २ ॥ प्रणेताज्योतिरित्याद्यैःप्रसिद्धैरन्यवस्तुषु ॥ उच्यतेविष्णुरेवैकः
सर्वैःसर्वगुणत्वतः ॥ ३ ॥ सर्वगोऽत्तानियंताचदृश्यत्वाद्युज्झितःसदा ॥ विश्वजीवांतरत्वाद्यैर्लिंगैःसर्वैर्युतः
सहि ॥ ४ ॥ सर्वाश्रयःपूर्णगुणःसोक्षरःसन्हृदब्जगः ॥ सूर्यादिभासकःप्राणप्रेरकोदैवतैरपि ॥ ५ ॥ ज्ञेयो
नवेदैःशूद्राद्यैःकंपकोन्यश्चजीवतः ॥ पतित्वादिगुणैर्युक्तस्तदन्यत्रचवाचकैः ॥ ६ ॥ मुख्यतःसर्वशब्दैश्चवा
च्यएकोजनार्दनः ॥ अव्यक्तःकर्मवाच्यै(क्यै)श्चवाच्यएकोमितात्मकः ॥ ७ ॥ अवांतरंकारणंचप्रकृतिः
शून्यमेवच ॥ इत्याद्यन्यत्रनियतैरपिमुख्यतयोदितः ॥ शब्दैरतोनंतगुणोयच्छब्दायोगवृत्तयः ॥ ८ ॥ इति
श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेप्रथमोऽध्यायः ॥ १ ॥
॥ श्रौतस्मृतिविरुद्धत्वात्स्मृतयोनगुणान्हरेः ॥ निषेद्धुंशक्नुयुर्वेदानित्यत्वान्मानमुत्तमं ॥ १ ॥ देवतावचना
दापोवदंतीत्यादिकंवचः ॥ नायुक्तवाद्यसन्नैवकारणंदृश्यतेक्वचित् ॥ २ ॥ असज्जीवप्रधानादिशब्दाब्रह्मैव

SGDF
Sri Gargeshwari Digital Foundation

नापरं ॥ वदंतिकारणत्वेनक्वापिपूर्णगुणोहरिः ॥ ३ ॥ स्वातंत्र्यात्सर्वकर्तृत्वान्नायुक्तंतद्वदेच्छ्रुतिः ॥ भ्रांतिमू
लतयासर्वसमयानामयुक्तितः ॥ ४ ॥ नतद्विरोधाद्वचनंवैदिकंशंक्यतांव्रजेत् ॥ आकाशादिसमस्तंचत
ज्जंतेनैवलीयते ॥ ५ ॥ सोनुत्पत्तिलयःकर्ताजीवस्तद्वशगःसदा ॥ तदाभासोहरिःसर्वरूपेष्वपिसमःसदा ॥ ६ ॥
मुख्यप्राणश्चेंद्रियाणिदेहश्चैवतदुद्भवः ॥ मुख्यप्राणवशेसर्वंसविष्णोर्वशगःसदा ॥ ७॥ सर्वदोषोज्झितस्तस्मा
द्भगवान्पुरुषोत्तमः ॥ उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशः ॥८॥ इतिश्रीमत्कृष्ण० द्वितीयोऽध्यायः ॥२॥
॥ शुभेनकर्मणास्वर्गंनिरयंचविकर्मणा ॥ मिथ्याज्ञानेनचतमोज्ञानेनैवपरंपदं ॥ १॥ यातितस्माद्विरक्तःसन्
ज्ञानमेवसमाश्रयेत् ॥ सर्वावस्थाप्रेरकश्चसर्वरूपेष्वभेदवान् ॥ २ ॥ सर्वदेशेषुकालेषुसएकःपरमेश्वरः ॥ तद्भ
क्तितारतम्येनतारतम्यंविमुक्तिगं ॥ ३ ॥ सच्चिदानंदआत्मेतिमानुषैश्चसुरेश्वरैः ॥ यथाक्रमंबहुगुणैर्ब्रह्मणाद्य
खिलैर्गुणैः ॥ ४ ॥ उपास्यःसर्ववेदैश्चसर्वैरपियथाबलं ॥ ज्ञेयोविष्णुर्विशेषस्तुज्ञानेस्यादुत्तरोत्तरं ॥ ५ ॥ सर्वे
पिपुरुषार्थाःस्युर्ज्ञानादेवनसंशयः ॥ नलिप्यतेज्ञानवांश्चसर्वदोषैरपिक्वचित् ॥ ६ ॥ गुणदोषौसुखस्यापिवृद्धि

SGDF
Sri Gargeshwari Digital Foundation

हासौविमुक्तिगौ ॥ नृणांसुराणांमुक्तौतुसुखंक्लृप्तंयथाक्रमं ॥ ७ ॥ इतिश्रीमत्कृष्ण० तृतीयोऽध्यायः ॥३॥
॥ विष्णुर्ब्रह्मतथादातेत्येवंनित्यमुपासनं ॥ कार्यमापद्यपिब्रह्मतेनयात्यपरोक्षतां ॥ १ ॥ प्रारब्धकर्मणोन्यस्य
ज्ञानादेवपरिक्षयः ॥ अरिष्ठस्योभयस्यापिसर्वस्यान्यस्यभोगतः ॥ २ ॥ उत्तरेषूत्तरेष्वेवंयावद्वायुंविमुक्ति
गाः ॥ प्रविश्यभुंजतेभोगांस्तदंतर्बहिरेववा ॥ ३ ॥ वायुर्विष्णुंप्रविश्यैवभोगश्चैवोत्तरोत्तरं ॥ उत्क्रम्यमानु
षामुक्तिंयांतिदेहक्षयात्सुराः ॥ ४ ॥ अर्चिरादिपथावायुंप्राप्यतेनजनार्दनं ॥ यांत्युत्तमानरोब्रह्माद्याब्रह्मलो
कात्सहामुना ॥ ५ ॥ यथासंकल्पभोगाश्चचिदानंदशरीरिणः ॥ जगत्सृष्ट्यादिविषयंमहासामर्थ्यमप्यृते
॥ ६ ॥ यथेष्टशक्तिमंतश्चविनास्वाभाविकोत्तमान् ॥ अनन्यवशगाश्चैववृद्धिह्रासविवर्जिताः ॥ दुःखादिर
हितानित्यंमोदंतेऽविरतंसुखं ॥ ७ ॥ पूर्णप्रज्ञेनमुनिनासर्वशास्त्रार्थसंग्रहः ॥ कृतोयंप्रीयतांतेनपरमात्मार
मापतिः ॥ ८ ॥ नमोनमोशेषदोषदूरपूर्णगुणात्मने ॥ विरिंचशर्वपूर्वेज्यवंद्यायश्रीवरायते ॥ ९ ॥ इतिश्री
मत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्येश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेचतुर्थोऽध्यायःसमाप्तः ॥४॥

SGDF
Sri Gurgeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ ॐ समस्तगुणसंपूर्णसर्वदोषविवर्जितं ॥ लक्ष्मीनाराय
णंवंदेभक्ताभीष्टफलप्रदं ॥ १ ॥ संसारक्लेशसंश्रांतसज्जनावनतत्पराः ॥ दयालवोमहांतस्तान्गुरून्नत्वागुरुं(गिरं)भजे ॥ २ ॥ ग्रं
थोयमपिबह्वर्थोभाष्यंचात्यर्थविस्तरं ॥ इत्युक्तिसाम्यात्संक्षेपभाष्यंचात्यर्थविस्तरं ॥ ३॥ अनंतोर्थःप्रकटितस्त्वयाणौभाष्यसंग्रहे ॥
इत्याहुःश्रीमदानंदतीर्थार्यौपसदाअपि ॥४॥ अतोनेकार्थयुक्त(गुंभ)स्यनैतद्भाष्यस्यविस्तृतौ ॥ शक्तोस्म्यथापिलेशेनव्याख्यांकुर्यां
यथामति ॥ ५ ॥ सूत्रार्थंहृदिकृत्वैवभाष्यार्थंसंप्रकाशये ॥ अविक्षेपेणबोधार्थंबुध्यंतांतद्विवेकिनः ॥६॥ इहखल्वधिकारिणामखि
लक्लेशनिवृत्तिविशिष्टपरमानंदावाप्तिनिदानभगवज्ज्ञानायप्रवृत्ताना मनंताम्नायानामितिकर्तव्यतारूपाणिनारायणावतारबादरा
यणकृतानि ब्रह्मसूत्राण्यन्यैरन्यथाव्याख्यातान्यकृतप्रायाणिमन्वानोभगवानानंदतीर्थमुनिर्यथावद्याचिख्यासुर्भाष्यानुभाष्येवि
धायसंक्षेपभाष्यमपिविधित्सुरध्यायचतुष्टयोक्तगुणविशिष्टेष्टदेवतागुरुनतिपूर्वंचिकीर्षितंप्रतिजानीते ॥ नारायणंगुणैःसर्वैरुदी
र्णदोषवर्जितं ॥ ज्ञेयंगम्यंगुरूंश्चापिनत्वासूत्रार्थउच्यते ॥ सर्वै रानंदज्ञानद्युतिबलौदार्यवीर्यादिभिर्गुणैः परिपूर्णं । चिं
तासंतापपुण्यपापलेपजनिमृतिप्रभृतिदोषवर्जितं । सद्भिर्वैराग्यभक्तिश्रवणमननध्यानजन्यापरोक्षज्ञानेनविषयीकर्तव्यं । अतएव
ज्ञानरूपोपायात्सद्भिःप्राप्यमपिनारायणंनत्वेतिविशेषणसमुच्चयेपिशब्दः । तेनविशिष्टस्यैवज्ञेयत्वलाभात् विशिष्टंमंदोपास्यंशु
द्धंमुमुक्षुज्ञेयमितिप्रत्युक्तं । गुरूंश्चनत्वेतिगुरुदेवतानतिसमुच्चयेचशब्दः। यद्वा टीकारीत्यागुरुदेवताभेदेऽरुचिसूचकोपिशब्दः। गु
रुत्वाद्बहुवचनं। उक्तंचगीताभाष्यव्याख्याने बहुवचनंगौरवादेवेति । तमेवशास्त्रप्रभवमित्यादिभिर्बहुभिःप्रकारैर्यद्गुरुत्वोपपादनंते

नगुरूंश्चेतिबहुवचनांतंपदंविवृतमितिसुधाशयंवा । सूत्रार्थोब्रह्मसूत्रार्थः । अत्रनारायणमित्युक्त्यैवानंदचिदाद्यात्मकदेहमितिला
भाद्देहसत्त्वेदोषवर्जितमित्ययुक्तंतदसत्त्वेज्ञानादिगुणोदीर्णतानयुक्तेतिनिरस्तं । देहोयंमेसदानंदोनैवप्रकृतिनिर्मितः । परिपूर्णश्च
सर्वत्रतेननारायणोस्म्यहमितिद्वितीयाध्यायगीताभाष्योक्तब्रह्मवैवर्तस्मृतेर्गुणैरुदीर्णमित्यस्यगुणोदीर्णदेहमित्यर्थः । यद्वाआहच
तन्मात्रमित्यत्रवक्ष्यमाणदिशातस्यगुणोदीर्णतोक्त्यैवतदभिन्नदेहस्यापिलाभः । अधिकंतुटीकायांबोध्यं । ननुजीवचैतन्यादन्य
स्यब्रह्मणोमानाभावेनाभावात्तस्यचाहंधीसिद्धत्वेनाविषयत्वात् । सत्यपितज्ज्ञानेमुक्त्यदृष्ट्याफलाभावा सतएवाधिकार्याद्यभा
वाच्च तद्विजिज्ञासस्वेत्युक्तिरयुक्तेत्याशंकायांप्राप्तायां ॥ ॐ अथातोब्रह्मजिज्ञासेति ॥ तद्व्याचष्टे ॥ विष्णुरेवविजिज्ञास्यइ
ति ॥ विष्णुरेव देशकालगुणापरिच्छेदरूपव्याप्तिमान्विष्णवाख्योभगवानेवविजिज्ञास्यः। अथातःपदोक्ताभ्यांअधिकारिफलाभ्यां
विशिष्टयाश्रवणमननध्यानरूपजिज्ञासयाविषयीकर्तव्यः । तद्विषयासाकार्येतियावत् । नजीवः येनतद्विजिज्ञासस्वेत्युक्तिरयु
क्तास्यात् । विष्लृव्याप्तौबृहवृद्धावित्यवयवशक्त्याविष्णुब्रह्मशब्दयोरेकार्थत्वेनश्रौतब्रह्मपदेनतादृशार्थस्यप्रतीतेः । सविष्णुराहहि
तंब्रह्मेत्याचक्षतइत्युक्तेश्च। तस्यचानेवंरूपजीवाद्भिन्नस्याहंबुद्ध्याऽसिद्धत्वेनागुणसगुणत्वादिनाविमतस्य विषयत्वसंभवेनतज्ज्ञाना
न्मुक्तिरूपफलस्य तत्कामिनोऽधिकारिणश्च संभवात्तद्विजिज्ञासस्वेत्युक्तिर्युक्तेतिभावः । यथासूत्रं विष्णोर्जिज्ञासाकर्तव्येतिवा
च्येप्येवमुक्तिरग्रेनुषंगार्था । विष्णुरित्यवश्यंवाच्येसतितदनुरोधेनवा तद्विजिज्ञासस्व आत्मानंपश्येत् तमेवैकंजानथेत्येवमादिति
ङंतमेवात्रनोदाहरणीयं । किंतु सविजिज्ञासितव्यः । नारायणोसौपरमोविचिंत्यः नारायणंमहाज्ञेयं आत्मावाअरेद्रष्टव्यःश्रोत

SGDF Sri Gargeshwari Digital Foundation

व्योमंतव्योनिदिध्यासितव्य इत्याद्यपीतिवा विधेयजिज्ञासाविषयत्वेनब्रह्मणोप्राधान्यप्राप्तावुद्देश्यज्ञानविशेषणत्वेनप्राधान्यम
स्तीतिवा ब्रह्मजिज्ञासेत्यत्रकर्मणिषष्ठ्यासमासो नशेषषष्ठ्यादिनेतिवासूचयितुं सूत्रेजिज्ञासेत्युक्तावपिवीत्युक्तिःश्रुत्यनुगमायवा
अध्ययनशमदमादिसंपत्तिरूपाधिकार जिज्ञासोत्थज्ञानजप्रसादजन्यमुक्तिरूपफलाभ्यां अथातःशब्दोक्ताभ्यांजिज्ञासायावैशि
ष्ट्यमस्तीतिसूचनायवेतिज्ञातव्यं। विष्णुरितिब्रह्मपदव्याख्यानेनजीवान्यविषयसिध्यैवतज्ज्ञानस्यमुक्त्याख्यफलस्यचतद्योग्यस्या
धिकारिणःसिद्धावपिफलस्यकर्मजत्वादिनाजिज्ञासाफलत्वाप्राप्त्याशूद्रादिव्यावृत्ताधिकारस्याप्राप्त्याचतदुभयप्रापकाथातःशब्दा
र्थयोरप्यवश्यंवाच्यत्वाद्धीत्यनेनतदुक्तिः । तेनसूत्रस्यश्रुतिविसंवादःप्रत्युक्तः । विजिज्ञास्योविष्णुरित्यनुक्त्वा एवमुक्तिरदेङ्गुण
इत्यादाविवसतिधर्मिणिध(र्मचिंता)र्माश्रिंत्याइतिवावृद्धिरादैजित्यत्रेवमंगलार्थंवा । आद्याध्यायद्वयेविष्ण्वाख्यविषयस्य उत्तर
द्वयेविजिज्ञासायाः तत्रापितृतीयाद्यद्विपाद्यांविशब्दोक्ताधिकारस्यचिंतेतिवक्ष्यमाणचिंताक्रमसूचनायवेतिध्येयं । सूत्रेतुस्मार्तेन
शब्दतोर्थतश्चाधिक्येन प्राधान्यद्योतनायाथातःशब्दयोरेवपूर्वनिर्देशइतिभावः।अत्रप्राधान्येनविष्णुरेवजिज्ञासितव्यइत्यर्थस्याभि
मतत्वान्नांगावबद्धास्तुनशाखासुहिप्रतिवेदमित्यनेनविरोधःशंक्यः । परिवारतयाग्राह्याअपिहेयाःप्रधानतइत्यनुभाष्योक्तेः । सर्व
वर्णाश्रमैर्विष्णुरेकएवेज्यतेसदा । रमाब्रह्मादयस्तस्यपरिवारतयैवत्वित्यन्यत्रोक्तेश्च ॥१॥ ननुतद्ब्रह्मेतिश्रौतब्रह्मशब्दस्यबृहजाति
जीवेति ब्रह्माणिजीवाःसर्वेपीत्यादेर्जीवेरूढत्वाद्रूढित्यागेनयौगिकार्थविष्णुग्रहणेहेत्वभावात् । यतोवाइतिवाक्योक्तविश्वकर्तृत्व
स्यादृष्टद्वाराजीवेपिसंभवादुक्तंनयुक्तमित्यतउक्तं ॥ ॐ जन्माद्यस्ययतइति ॥ तदर्थमाह ॥ सर्वकर्तेति ॥ विष्णुरेवेतिवर्त ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

ते । सर्वेतितंत्रमावृत्तिर्वा । सर्वस्य चिदचिदाख्यविश्वस्य । सर्वस्य जन्माद्यष्टकस्य । यथायोगंकर्ताविष्णुरेव नरूढोजीवइत्यर्थः। यतोवाइमानीतिपूर्ववाक्योक्तासंकुचितसर्वसंबंधिजन्मस्थित्यादिमुख्यकर्तृत्वरूपाद्बाधकात्तद्ब्रह्मेतिश्रुतौब्रह्मशब्देनरूढित्यागेनयौगिकार्थविष्णुग्रहणोपपत्तेरुक्तंयुक्तमितिभावः । कर्तृशब्दस्यतृजंतत्वेयाजकादित्वेनषष्ठीसमासः । ताच्छीलिकतृन्नंतत्वेतुगम्यादित्वेनद्वितीयातत्पुरुषइतिसर्वकर्तेतिसाधु ॥ २ ॥ नन्विदमयुक्तं रुद्रादिःसर्वकर्तासर्वज्ञत्वाद्व्यतिरेकेणचैत्रवत् । नचासिद्धिः । पाशुपतादिनातत्सिद्धेरित्याद्यनुमानेनवा पाशुपतादिनैववारुद्रादेःसर्वकर्तृत्वसिद्धेरित्यतउक्तं ॥ ॐ शास्त्रयोनित्वादिति ॥ अत्रतदर्थः आगमोदितइति ॥ विष्णुरेवसर्वकर्तेत्यस्ति। आसम्यग्गम्यंते अर्थाएभिरित्यागमावेदवेदानुसारिग्रंथाः । ऋगाद्याभारतंचैवपंचरात्रमथाखिलं । मूलरामायणंचैवपुराणंचैतदात्मकं। येचानुयायिनस्तेषांसर्वेतेचसदागमाइतितत्वनिर्णये । आसमंताद्गमयतिधर्माधर्मौपरंपदं । यच्चाप्यतींद्रियंत्वन्यत्तेनासावागमःस्मृतइत्युपासनापादीयानुभाष्येचोक्तेःकरणेकर्तृत्वोपचारः। ग्रहवृद्दनिश्चिगमश्चेत्यकर्तर्यप्प्रत्ययस्मरणादितिसुधोक्तेः । आगमोदितोविष्णुरेवसर्वकर्तानत्वानुमानिकः पाशुपताद्युक्तोवारुद्रादिःसर्वकर्ता । तस्यागमोदितत्वाभावादनुमानादेरदृष्टेऽशक्तत्वेनामानत्वादितिभावः ॥ ३ ॥ नन्विदमसत् । रुद्रादेरप्यागमोदितत्वेनपाशुपतादिनाव्याख्यानात् । आगमेप्येकएवरुद्रइत्यादिनाप्रतीतेश्चरुद्रादिरप्यागमोदितोस्तु पांचरात्रादिनाआगमोदितत्वेनव्याख्यानादागमेपिनारायणएवेदमग्रआसीदित्यादिनाप्रतीतेश्च । यथाविष्णुरागमोदितस्तद्वत् । एवंचद्वयोरपिकालभेदेनास्तुसर्वकर्तृत्वं द्वयोरप्येकैकदेशेनागमोदितत्वंचास्त्वित्यतउक्तं ॥ ॐ तत्तुसमन्वयादिति ॥ तदर्थः समन्वया

SGDF
Sri Gargeshwari Digital Foundation

दिति ॥ आगमोदितइतिविष्णुरेवेतिचास्ति । सम्यगन्वीयंतेशक्तितात्पर्यविषयेणसंबध्यंते । तथाज्ञायंतइतियावत् । वाक्यान्येतेनेत्यन्वयउपक्रमादिलिंगसंबंधोवाउपक्रमादिनिर्णीतोवाक्यानांतत्परत्वरूपसंबंधोवा । संश्चासावन्वयश्चतस्मात् । समित्येतदागमेनाप्यन्वेति । तत्रकात्स्न्यैंमुख्यत्वंचार्थः । समन्वयात्सम्यक्बलाबलत्वादिनापरीक्षितादुपक्रमादिलिंगसमुदायात्तन्निर्णीततत्परत्वरूपसंबंधाद्वाविष्णुरेवसम्यङ्मुख्ययावृत्त्याकात्स्न्र्येनागमोदितस्तत्तात्पर्यविषयोवा । नतुपाशुपतादिरूपव्याख्यानेनवा । आपातप्रतीत्यावा रुद्रादिरित्यर्थः । अयंभावः । उपक्रमादीनामेवप्रबंधतात्पर्यविषयार्थप्रमापकत्वात् व्याख्येयस्योपक्रमाद्यननुसारिव्याख्यानापातप्रतीत्योश्चानेवंरूपत्वात् पाशुपतादेश्चवेदस्योपक्रमाद्यननुसारेणतद्व्याख्यानायप्रवृत्तत्वात् तदुक्तप्रकारेणवा आपातप्रतीत्यावा नरुद्रादिरागमार्थोग्राह्यइत्यबाधेनप्राप्तमुख्यवृत्त्याकात्स्न्र्येनोपक्रमादिभिरागमोदितोविष्णुरेवेति । उपक्रमादयस्तुविष्णुमेवागमतात्पर्यार्थंप्रमापयंतीत्येतदग्रेव्यक्तं । पंचरात्रादिस्मृतयोवेदस्योपक्रमाद्यनुसारिण्यएवेति । उपक्रमादीनामेवतत्परत्वरूपान्वयप्रमापकत्वसूचनायोपक्रमादेरित्यनुक्त्वा समन्वयादितियौगिकसौत्रपदमेवान्वकारि । उपक्रमादेर्बहुत्वेपिविष्णुपरत्वेऐकमत्यद्योतनायैकवचनं । प्राणोब्रह्मकंब्रह्म ह्वयाम्यग्निंप्रथमंस्वस्तयइतिब्रह्मविद्यासावित्रसूक्तयोःप्राणाद्युपक्रमस्योपक्रांतप्राणादिपरत्वप्रमापकत्वेनतात्पर्यव्यभिचारेपिप्रबललिंगादिनाऽबाधितत्वरूपपरीक्षितत्वविशिष्टस्यनव्यभिचारइतिवक्तुंसमित्यन्वयविशेषणं ॥ ४ ॥ ॥ ४ ॥ ननुसमन्वयान्मुख्यतःकात्स्न्र्येनागमोदितोविष्णुरित्ययुक्तं । तस्ययतोवाचोनिवर्ततेअप्राप्यमनसासहेत्यवाच्यत्वाज्ञेयत्वयोरुक्तेः । नहितादृशस्यमुख्यवृत्त्याऽगमोदितत्वंहरेःकात्स्न्र्येनेत्यतःप्राप्तं । ईक्षतेर्नाशब्दमित्यादिसूत्रसप्तकं । तदर्थः ईक्षतेश्चेति ॥ समितिआगमोदितोविष्णुरेवेतिचवर्तते । एवेतिभिन्नक्रमःसंपदेनान्वेति । ईक्षतेःईक्षणात् । तस्यासंबद्धस्याहेतुत्वाद्योग्यतयाईक्षणीयत्वादितिलभ्यते । तथाचेक्षणीयत्वाज्ज्ञानविषयत्वात्सम्यगेवमुख्यवृत्त्यैवागमोदितोविष्णुः नतुलक्षणादिनाऽनवस्थानादित्यर्थः । आगमैकजन्यज्ञानविषयत्वस्यमुख्यवृत्यातदुदितत्वंविनाऽयोगादितिभावः । चशब्दस्तुवाच्यत्वहेत्वीक्षणीयत्वसहितस्यैवपूर्वहेतोर्मुख्यतोविष्णोरागमोदितत्वसाधकत्वाद्युक्तसमुच्चये । तदभावेकुतोन्वयइत्युक्तेः । अथवानकेवलमीक्षणीयत्वात् किंतुईक्षणीयत्वयुक्त्यनुगृहीतात् । आमनंति आविशंति । अथकस्मादुच्यतइति वचसांवाच्यमुत्तममिति अहमेववेद्यइत्यादिश्रुतिस्मृतिबलादितिवा गतिसामान्याच्चेतिवानुक्तसमुच्चये श्रुतिप्राप्तस्यावाच्यत्वादेःकेवलेक्षणीयत्वयुक्त्यानिरासायोगात् । सर्वशास्त्रोत्पाद्यज्ञानस्यैकरूप्यरूपहेत्वसहकृतस्यसमन्वयादित्युक्तोपक्रमादिहेतोःकात्स्न्र्येनागमोदितत्वसाधकत्वायोगात् । सर्वेवेदायत्पदमामनन्ति सर्वेवेदायत्रैकंभवंति सर्वेवेदाएकैवव्याहृतिः ब्राह्मंज्ञानंपरमंत्वेकमेव वेदैश्चसर्वैरहमेववेद्यः वेदेरामायणेचैवेत्यादिश्रुतिस्मृतिशतैरनंतागमानांविष्णुरूपैकार्थनिष्ठत्वोक्त्यागतिसामान्यादीक्षणीयत्वाच्चमुख्यवृत्त्यैवकात्स्न्र्येनागमोदितः । सर्वकर्तानंतगुणोविष्णुरेवजिज्ञास्यइतिभावः ॥ ५ ॥ अथैतदध्यायाद्यर्थस्यभाष्येस्फुटत्वादत्रापितत्तत्पादांतेकथनादादावनुक्तिः । यद्वा एतदध्यायाद्यर्थोक्तिपरतया प्रसिद्धैरन्यवस्तुषु । उच्यतेविष्णुरेवैकःसर्वैःसर्वगुणत्वतइत्येतत्पादांतिमत्रिपादीमादावप्याकृष्ययोज्यं । तथाहि वैदिकाःशब्दास्तावद्द्विविधाः । विष्णौतदन्यत्रप्रसिद्धभेदात् । अन्यत्रप्रसिद्धाअपि अन्यत्र अन्यत्रापि अन्यत्रैव प्रसिद्धभेदेनत्रिविधाः । तेत्रिविधाअपि अन्यवस्तुषुप्रसिद्धैरितिसामा

SGDF Sri Gurgeshwari Digital Foundation

तत्व न्योक्त्यागृह्यंते । तथाचान्यवस्तुषुप्रसिद्धैः सर्वैस्त्रिविधैर्नामलिंगात्मकैः शब्दैरितिशेषः । एकोविष्णुरेवोच्यते । प्राक्समन्वयादि मंजरी-
॥ ५ ॥ त्युक्तमेवात्राध्यायेप्रपंचयतीत्यर्थः । विष्णौप्रसिद्धाइत्यत्रापि तत्र तत्रापि तत्रैव इतित्रैविध्यसंभवेपितत्रापीत्युक्तानांअन्यत्रापी
त्यनेनसंगृहीतत्वात् । तत्रतत्रैवेत्यवांतरभेदस्यतेषामव्युत्पाद्यसमन्वयत्वेनाविवक्षितत्वादैकविध्यमितिध्येयं । ननूक्तसर्वकर्तृत्वरू
पब्रह्मलक्षणस्यातिव्याप्तिवारणायकारणवाक्यानामेवप्रतिज्ञातःसमन्वयः । सएवोत्तरत्रप्रपंचनीयः । नत्वशेषवैदिकशब्दसमन्व
यइत्यतउक्तं ॥ सर्वगुणत्वतइति ॥ सर्वेगुणायस्यतस्यभावस्तस्मै । आद्यादिभ्यउपसंख्यानमितितसिः । ब्रह्मशब्दोक्तगुणपूर्ण
त्वार्थमित्यर्थः । तथाचवक्ष्यति । अतोनंतगुणोयच्छब्दायोगवृत्तयइति । उक्तंचानुभाष्ये । जन्माद्यस्येतिसूत्रेणगुणसर्वस्वसिद्ध
ये ॥ ब्रह्मणोलक्षणंप्रोक्तंशास्त्रमूलंयतस्ततः ॥ अन्वयःसर्वशब्दानांगुणसर्वस्ववेदकइति । एतत्पादार्थमाह ॥ प्रसिद्धैरिति ॥
नामात्मकैःशब्दैरितिशेषः । ननुविष्णुरेवविजिज्ञास्यइत्युक्तं । तद्ब्रह्मेत्युक्तजिज्ञास्यब्रह्मणःब्रह्मपुच्छंप्रतिष्ठेत्यानंदमयस्यपादा
ख्यावयवत्वोक्तेरानंदमयस्यचविकारार्थमयडंतशब्दोक्तत्वेनाब्रह्मत्वादब्रह्मावयवस्याजिज्ञास्यत्वादवयविनंविनावयवजिज्ञासायो
गाच्चेत्यतउक्तं ॥ ॐ आनंदमयोभ्यासादित्यादिसूत्राष्टकं । तदर्थः पूर्णानंदइति ॥ प्रसिद्धैरन्यवस्तुषु । उच्यतेविष्णुरे
वैकःसर्वैःसर्वगुणत्वतइति । अत्रोत्तरत्रचप्रतिपदमन्वेति । विष्णुरेवेतिवर्तमानेपितत्रैवकारस्यपूर्वमुख्यवृत्त्यैव नलक्षणयेत्यर्थला ॥ ५ ॥
भायसंपदेनान्विततयाविष्णुपदेनान्वयविच्छेदात् । तत्तुसमन्वयादित्यतःतत्त्वित्यस्याऽऽध्यायपरिसमाप्तिप्रतिनियंप्रायेणानुवृत्ति
रितिसूचनार्थत्वात् । पंचाधिकरण्याअध्यायपादबहिर्भावद्योतनार्थत्वाच्चविष्णुरेवेतिपुनरुक्तिः । आनंदमयशब्दार्थभूतःपूर्णानंदः

SGDF
Sri Gargeshwari Digital Foundation

एकः । स्वावयववादिनाऽभिन्नोविष्णुरेव । तथाचान्यवस्तुषुप्रसिद्धैरानंदमयप्रकरणस्थैरानंदमयतद्विशेषणैःसर्वैःशब्दैरेकोविष्णुरेवोच्यते । नतुविकारीकश्चित्प्रकृत्यादिः । येनतस्यजिज्ञास्यताऽयुक्तास्यादित्यर्थः । आनंदमयशब्दार्थस्यपूर्णानंदस्यविष्णुत्वेतत्पदवाच्यत्वस्यावश्यकत्वादितिभावः । एकइत्युक्त्यानेहनानास्तिकिंचनेत्यादिश्रुतेरचिंत्यशक्त्यावयवायवविनोरैक्यान्नावयवत्वविरोधइतिसूचितं । एवेतिनेतरइत्यादेरर्थः । अत्रपूर्णानंदइत्युक्त्याप्राचुर्यादितिसूत्रोक्तोमयटःप्राचुर्यार्थोदर्शितः । तत्रव्याख्येयपदानुरोधेनानंदपूर्णइतिवाच्येप्येवमुक्तिःप्राचुर्यस्यविशेष्यत्वेविरोधिलेशधीसत्वेपिनविशेषणत्वइतिपरैरभ्युपेतत्वात् । विष्णोरानंदप्राचुर्येब्राह्मणप्रचुरोग्रामइत्यत्राल्पशूद्रसत्त्वप्रतीतिरिवविष्णावनानंदलेशधीरपिस्यादितिशंकानिरासाय । तन्निरासप्रकारश्चयथाविशेषणत्वेविरोधिप्रसक्तिर्नास्तितथाविशेष्यत्वेपि नक्षत्रादिस्थतेजोल्पत्वापेक्षयाप्रकाशप्रचुरोरविरितिवत् । जीवगतसुखाल्पत्वापेक्षयानंदप्रचुरइत्युक्तेपिदोषाभावादिति । ननुसप्तभिर्नयैःसप्तनामसमन्वयसिद्धावपिसमन्वयसूत्राभिमतसर्ववेदगताशेषनामसमन्वयासिद्ध्याब्रह्मपदेनाभिमतानंतगुणवत्त्वंप्रधानलक्षणंनसिध्येदित्यतोवा । ननुमयटःप्राचुर्यार्थत्वमभ्युपेत्यपूर्णानंदस्यानंदमयशब्दार्थत्वोक्तिरयुक्ताविकारार्थान्नमयादिप्रायपाठविरोधादित्यतोवाप्युक्तं । अन्यवस्तुष्वित्यादि शब्दैरितिशेषः । अन्यवस्तुषुकोशादिषुप्रसिद्धैःसर्वैर्गुणिसामान्यवाचकैरन्नमयादिभिःशब्दैरुच्यते । विष्णुरेवैकइति किंविकारेण नेत्याह । सर्वगुणत्वतः पूर्णत्वादिरूपगुणत्वतः । सर्वपूर्णमिहोच्यतइत्युक्तेः । अन्नमयप्राणमयमनोमयविज्ञानमयेष्वपिप्राचुर्यांगीकारात् । अद्यतेत्तिचेत्यादिवाक्यशेषोक्तयोगेन महाभोक्तामहाभोग्यइत्यर्थोन्नमयेभवेत् । महाप्राणोमहाबोधोमहाविज्ञानवानपीत्याद्यनु

SGDF
Sri Gargeshwari Digital Foundation

भाष्योक्तप्रवृत्तिनिमित्तवत्त्वेनतैःशब्दैरुच्यतइति । तर्हितेषामप्यनेकत्वादयमप्यनेकःकिं नेत्याह ॥ एकइति ॥ नस्थानतोपी
तिन्यायादितिभावः । कथमेकोनेकैरुच्यते । उच्यतएव सर्वगुणत्वतः । सर्वगुणभूतंअप्रधानंनियम्यंयस्यतस्यभावः तस्मा
त् । सर्वस्यतत्तंत्रत्वात् । शरीररूपकविन्यस्तगृहीतेरितिन्यायेनान्नमयादितत्तत्कोशगततत्तन्नियंतृरूपाणामेवतैस्तैःशब्दैरुच्यमा
नत्वेनतेषामनेकत्वेनतत्तद्गतस्याप्यनेकैरुक्तिसंभवात् । हृदयाकाशस्यांगुष्ठमात्रत्वेनतद्गतरूपस्यांगुष्ठमात्रपदेनोक्तिवत् । व्यक्तमे
तदग्रेहृद्यपेक्षयेत्यत्र । एतेनान्यत्वांतरत्वशरीरत्वाद्युक्तिरपिसमाहिता । यथोक्तं । नस्थानतोपिपरस्येत्येतन्नयभाष्ये । अभेदेपिभे
दव्यपदेशःस्थानभेदादिति । तर्ह्युपचारएव नेत्याह । सर्वगुणत्वतः सर्वसंख्यारूपगुणवत्वात् । गुहानयानुव्याख्याने द्वि
त्वंचैकस्ययुज्यतइत्युक्तेर्भेदाभावेपितत्प्रतिनिधिनाविशेषेणतद्रूपेष्वेकत्वसंख्योपपत्तिरिति । ननु भवेदेतत्सर्वविष्णोरन्नमयादिश
ब्दवाच्यत्वे । तदेवनिर्बीजमितिचेन्ननिर्बीजं । सर्वगुणत्वतः मुक्तिहेतुवेदनत्व मुक्तप्राप्यत्व ज्येष्ठत्व देवोपास्यत्व जगच्चेष्टक
त्वादितत्तत्प्रकरणस्थसर्वगुणत्वात् ॥ सर्वैरुच्यतइति ॥ उपलक्षणंचैतत् । ब्रह्मात्मशब्दाभ्यांचेत्यपिध्येयं । मयटस्तादात्म्यार्थत्वे
प्युपपत्तेर्नपूर्णत्वरूपप्राचुर्यार्थत्वंबीजवदित्यपिप्रत्युक्तं । आकाशआनंदोनस्यात् । कोह्येवान्यात्कःप्राण्यादित्युक्तपूर्णानंदत्वसाधक
सर्वचेष्टकत्वगुणवत्त्वादिति । एतेनतद्धेतु मांत्रवर्णिक अस्मिन्नस्यच इतिसूत्रत्रयार्थोदर्शितः । तर्ह्यन्नमयादयःसर्वेपिकुतोनोच्यं
तेसूत्रइतिचेन्न । सर्वगुणत्वतः अल्पाक्षरमसंदिग्धमितिसूत्रलक्षणत्वेनोक्ताल्पाक्षरत्वादिसर्वगुणत्वाद्बादरायणीयसूत्रजातस्ये
त्यर्थः । कथंतर्हिसर्वैरुच्यतइतिचेन्न । सर्वगुणत्वतः । सर्वेषामन्नमयादीनांगुणत्वादुपसर्जनत्वादुपलक्ष्यत्वादितियावत् ।

तदशिष्यंसंज्ञाप्रमाणत्वादितिवदयंनिर्देशः । एतच्चाग्रेपिध्येयं । तर्हिप्राथमिकान्नमयएवेतरोपलक्षणत्वेनोच्यतामित्यतोपि स
र्वगुणत्वतः । सर्वगुणभूतंअप्रधानंयस्यतस्यभावस्तस्मात् । सर्वापेक्षयास्यानंदमयशब्दस्य तत्रानंदादयोगुणाः ॥ ईशस्यैवेति
निर्णीताइत्युपासनापादीयानुभाष्यसुधयोरुक्तदिशामांगलिकत्वेनप्राधान्यात्पूर्णानंदवाचिनएवोक्तिरित्यर्थः । कुतोस्यमांगलिक
त्वं । सर्वगुणत्वतः । सुखमेवमेस्यादितिनिखिलापेक्षितत्वेनसर्वान्प्रतिगुणत्वादनुगुणत्वान्निरुपाधिकेष्टत्वात्तद्वाच्यसुखस्येत्य
र्थः । ब्रह्मानंदस्यापिताद्दशानंदप्रदोपासनाविषयत्वेनसर्वान्प्रतीष्टत्वात् । यद्वासर्वगुणत्वात् । गुणानांचपरार्थत्वादसंबंधःसम
त्वात्स्यादित्यादौजैमिनीयेउपकारकेगुणपदप्रयोगात्पूर्वोत्तरसर्वनयोपकारकत्वादित्यर्थः । तथाहि । पूर्वोक्तजिज्ञासाक्षेपसमाधिहेतु
त्वात् । तथा नाल्पेसुखमितिप्रोक्त्यैवानंदमयतोक्तितः ॥ अनंतत्वंसुनिर्णीतंपूर्णानंदोहिनाल्पकइत्यनुव्याख्यानोक्तेर्योवैभूमा
तत्सुखंनाल्पेसुखमस्तीति श्रुत्युक्तदिशापूर्णगुणस्यैवपूर्णानंदत्वेनविष्णोरत्रपूर्णानंदत्वोक्तौतस्यैवाथकस्मादुच्यतइत्यादिनाब्रह्म
शब्दाद्युक्तानंतगुणवत्त्वसिद्ध्याविष्णोरेवजिज्ञास्यत्वोपपादकत्वात् । तथापूर्वनयेशंकाप्रापिकाया यतोवाचोनिवर्ततइत्यादिश्रु
तेरानंदंब्रह्मणोविद्वानित्युक्तानंदस्यापरिच्छिन्नत्वेन कात्स्न्र्येनवागाद्यविषयत्वमेव नतुसर्वथेत्यर्थलाभाच्चपूर्वोपकारकत्वंअदृ
श्येनात्म्यइत्यादिनाभाष्योक्तदिशोत्तरनयारंभार्थत्वादुत्तरोपकारकत्वमित्याद्यूह्यं । अत्रानंदमयइत्येववाच्येपूर्णज्ञानादेरुपलक्षण
त्वेनपूर्णानंदस्योक्तिः । समन्वीयमानशब्दानांयौगिकत्वसूचनाय । एवमग्रेपि ॥ ६ ॥ नन्विदमयुक्तं । अदृश्येनात्म्यइत्यु
क्तानंदमयधर्मस्याद्दश्यत्वस्यांतश्चंद्रमसिमनसाचरंतं सहैवसंतंनविजानंतिदेवाइत्यंतस्थस्योक्तेः । देवाअपिनजानंतिकिम्व

SGDF Sri Gargeshwari Digital Foundation

न्येइत्यदृश्यत्वस्यकैमुत्येनप्रतीतेरंतस्थस्यचइंद्रोराजेत्यादिनिरवकाशेंद्रश्रुत्यादिबलेनेंद्रादित्वात्तस्यैवादृश्यत्वात्पूर्णानंदत्वाच्चेत्य तःप्राप्तं । अंतस्तद्धर्मोपदेशादित्यादियोगद्वयं । तदर्थः अंतरइति । प्रसिद्धैरितित्रिपाद्यन्वेति अंतरुपपदादतसा तत्यगमनइतिधातोर्डप्रत्ययेंतःअतः अंतःस्थइतियावत् । यद्वा अन्योंतरआत्मेत्यादाविवांतरशब्दोंतस्थवाची । अंतःप्रवि ष्टंकर्तारमीशमंतश्चंद्रमसिमनसाचरंतं अंतःप्रविष्टःशास्तेत्यादिनाश्रुतोंतरोंतस्थः एकोविष्णुरेवनत्वनेकः । तथाचान्यवस्तु षु इंद्रादिषु प्रसिद्धैर्लोकतोनिरूढैरिंद्राद्यशेषाधिदैवगतैर्नामभि र्विष्णुरेवोच्यते । अंतस्थस्यविष्णुत्वेतन्निष्ठत्वेनश्रुतेंद्रादिनाम्ना मपितद्वाचित्वनियमादितिभावः । तदेवकुतः । सर्वगुणत्वतः । समुद्रेंतः यस्यांडकोशंशुष्ममाहुरित्याद्येतत्प्रकरणश्रुतसमु द्रांतस्थत्वब्रह्मांडवीर्यत्वादिसर्वगुणवत्त्वात्तस्येत्यर्थः । लिंगानामिंद्रादौनिरवकाशत्वादितिभावः । नचश्रुतीनामपिविष्णौनिरव काशत्वादुभयाबाधायतादात्म्यमेवेंद्रादिभिर्विष्णोरस्त्वितिशंक्यं । सर्वगुणत्वतः । सर्वेइंद्रादयोगुणाःअप्रधानाःयस्यतस्य भावस्तस्मात् । सर्वस्वामित्वेनतेभ्योंतरोविविक्तएवसन् नतैरभिन्नःसन्नंतरोंतस्थोविष्णुः इंद्रस्यात्मानिहितः वायोरात्मानसि त्यादावुच्यतइत्यर्थः । अस्मिन्पक्षेएवकारोंतरणवेत्यन्वेति । अंतरमवकाशावधिपरिधानांतर्धिभेदसादृश्ये । इत्यमरोक्त्याभे दवाचिनःक्लीबत्वेप्यर्शआद्यच्प्रत्ययांतत्वेनयआत्मनोंतरोयोविज्ञानादंतरइत्यादाविवात्र पुंल्लिंगांतरशब्दोविविक्तवाच्यपिध्येयः । अन्यथांतःस्थइत्येवावक्ष्यत् । तेनभेदसूत्रार्थोपिदर्शितः । श्रुतयस्तुविष्णुपराइतिभावः । नचेंद्रादिषुयोगरूढिभ्यांप्रवृत्तानां तासांहरावमुख्यतेतिवाच्यं । परमैश्वर्यादेर्विष्णौनिरवधिकत्वेनान्यगतप्रवृत्तिनिमित्तस्यापिविष्ण्वधीनत्वाच्चेत्याह । सर्वगु

SGDF Sri Gargeshwari Digital Foundation

णत्वतइति । सर्वेगुणायस्मिन्निति व्युत्पत्त्याइंद्रादितत्तच्छब्दप्रवृत्तिनिमित्तसर्वगुणत्वा त्सर्वगुणभूतंयस्येतिव्युत्पत्त्यासर्वस्वां
तंत्र्याच्चविष्णोरित्यर्थः । महायोगोक्त्याविद्वद्रूढिरपिदर्शिता । विद्वद्रूढिर्वैदिकास्यात्सायोगादेवलभ्यतइत्युक्तेः । इंद्रंमित्रंयमिं
द्रंसप्रथमःसंकृतिस्तथा ॥ नामधाःसर्वदेवानामेकइत्यादिकाश्रुतिरित्यनुभाष्योक्त्यादिनाइंद्रंमित्रंवरुणमग्निमाहुरितिप्रयोगबाहु
ल्यरूपरूढेःश्रौतत्वाच्चेति । ननुकथंसर्वगतस्यापिविष्णोरल्पदेशेचंद्राद्यंतरवस्थानं । नहिसर्षपांतर्ब्रह्मांडस्यावस्थानंसंभवदुक्ति
कमित्यतोपि अंतरइति । खवदितीहाप्यन्वेति । खवत्आकाशवत् । अंतरोंतःस्थः । यथाव्याप्तोप्याकाशएकदेशेवर्ततेतथा
विष्णुरपीत्यर्थः । तदुक्तंसप्तमस्कंधे । कोतिप्रयासोसुरबालकाहरेरुपासनेस्वेहृदिछिद्रवत्सतइति । एतच्चलिंगपादीयाद्यनये
निचाय्यत्वादेवंव्योमवच्चेतिसूत्रेव्युत्पाद्यमपीहशिष्यहितायप्रसंगादुक्तं । विवृतंचैतद्वैशेषिकनयानुभाष्ये महतोल्पत्वमपिहिव्यो
मवत्प्राहवेदवित् ॥ यद्यल्पदेशसंस्थानंनसर्वत्रापिनोभवेत् ॥ स्थितस्यह्यल्पदेशेषुसर्वगत्वंभवेवद्ध्रुमित्यादिनेति । एतेनव्योमवदि
त्युक्तमन्यत्राप्यनुसंधेयमित्युक्तंभवति ॥ ७ ॥ नन्वथापिनपूर्णानंदोविष्णुरितियुक्तं । तत्प्रकरणे यदेषआकाशआनंदोनस्यादित्या
काशस्यनिरुपपदानंदपदेनपूर्णानंदोक्तेस्तस्यैवाकाशस्यछांदोग्येप्रथमेध्याये अस्यलोकस्यकागतिरितिआकाशइतिहोवाचसर्वाणिह
वाइमानिभूतान्याकाशादेवसमुत्पद्यंतइत्यादिवाक्ये पृथिवीगतिप्रश्नविषयत्वेन वाय्वादिभूतकारणत्वेनच श्रुततयालोकप्रसिद्ध्या
च भूताकाशत्वादित्यतः ॐआकाशस्तल्लिंगादिति ॥ तदर्थः खवदिति । अंतरइत्यस्ति सचावकाशवाचीसन्पूर्ववद
र्शआद्यच्प्रत्ययांतः । विष्णुःखवदाकाशवदंतरोवकाशवान् । यथाकाशःप्राणिसंचाराद्यनुकूलविवरत्वशब्दितावकाशवांस्तथावि

SGDF
Sri Gargeshwari Digital Foundation

ष्ण्वाख्याकाशः आकाशनमवकाशइतिसुधोक्तदिशाकाशपदप्रवृत्तिनिमित्तभूतविवरत्वशब्दितप्राणिसंचारानुकूलावकाशवान् । सर्वभूतगुणैर्युक्तंदेवंत्वंज्ञातुमर्हसीतिनवमगीताभाष्योक्तेर्निरवधिकाकाशशब्दप्रवृत्तिनिमित्तवानित्यर्थः । यद्वा खवत् अंतरोविवरः प्राणिसंचारानुकूलइत्यर्थः । उक्तमेवतात्पर्यं । शब्दांतरनिमित्तस्याप्युपलक्षणमिदं । तथान्यवस्तुषुप्रसिद्धैराकाशाद्यधिभूतगतैः सर्वैः शब्दैरेकोविष्णुरेवोच्यते । नतुभूताकाशादिस्तदर्थः । अवकाशदातृत्वादेर्वैष्णवत्वेतच्छब्दानांवैष्णवत्वावश्यंभावादिति भावः । कुतः । सर्वगुणत्वतः । तस्यसएषपरोवरीयानुद्गीथः सएषोनंतः कोह्येवान्यात्कः प्राण्यादित्यादिसर्वगुणवत्त्वात् । भूतेतदयोगादित्यर्थः । उच्यतइतिमुख्यवृत्तिरुक्ता । साकेननिमित्तेनेत्यतोपिप्रागुक्तमाकाशपदप्रवृत्तिनिमित्तवत्त्वमुपलक्षणमितिभावेनाह । सर्वगुणत्वतइति । तच्छब्दप्रवृत्तिनिमित्तावकाशदातृत्वादिसर्वगुणवत्त्वा दन्यगतप्रवृत्तिनिमित्तंप्रतिस्वातंत्र्याच्चेत्यर्थः । आकाशादिशब्दानांविष्णौयौगिकत्वद्योतनायांतरइत्युक्तिः । खेपितच्छब्दप्रवृत्तिहेतुरयमेवेतिद्योतनायखवदित्युक्तिः ॥८॥ नन्वथापिनपूर्णानंदोविष्णुरितियुक्तं । तद्वैत्वंप्राणोभवः महान् भोगः प्रजापतेरितिश्रुतौप्राणस्यैवमहाभोगशब्दितपूर्णानंदत्वोक्तेः प्राणपदस्यचप्रसिद्ध्यामुख्यप्राणपरत्वात् । नहिद्वयोः पूर्णानंदत्वंयुक्तंविरोधादित्यतः प्राप्तं ॥ ॐअतएवप्राणइति ॥ तदर्थः प्रणेतेति ॥ प्रणेताजीवनहेतुः । उपलक्षणमेतत् । प्रणेत्रादिरेकोमुख्योविष्णुरेव । तथाचप्राणइत्याद्यैरध्यात्मगैरन्यवस्तुषुप्रसिद्धैः सर्वैः शब्दैर्विष्णुरेवोच्यते । नतुमुख्यप्राणादिः । कुतः । सर्वगुणत्वतः । ह्रीश्चतेलक्ष्मीश्चपत्न्याविति भर्तासन्भ्रियमाणइति ह्रीशब्दितश्रीपतित्वलक्ष्मीपतित्वविश्वभर्तृत्वाद्येतत्प्रकरणस्थसर्वगुणवत्त्वादित्यर्थः । केननिमित्तेनोच्यते । आह । सर्वगुणत्वतइति । यद्देवान्प्राणयोनवेतिवाक्यशेषोक्तनवदेवोपलक्षितसर्वप्राणिजीवनहेतुत्वादिरूपगुणत्वादन्यगतंप्रतिस्वातंत्र्याच्चेत्यर्थः । अत्रप्राणइतिवाच्येप्रणेतेतितदर्थोक्तिः प्राणपदस्यहरौयौगिकत्वस्य एकइत्युक्तिः प्रवृत्तिहेतोर्मुख्यत्वस्य सूचनाय ॥ ९ ॥ नन्वथापिपूर्णानंदोविष्णुरितिनयुक्तं । योवेदनिहितंगुहायामित्यानंदमयधर्मस्यगुहानिहितत्वस्य ज्योतिर्हृदयआहितंयदितिश्रुतौज्योतिष्युक्तेः । ज्योतिःशब्दस्यत्वामग्नइत्यग्निसाहचर्येणाग्निसूक्तस्थत्वेनचाग्निपरत्वात् । नहिद्वयोः स्वातंत्र्येणसर्वप्रेरकत्वादिनाहृदयगुहास्थत्वंयुक्तमित्यतआह ॥ ॐज्योतिश्चरणाभिधानादिति ॥ तदर्थो ज्योतिरित्याद्यैः प्रसिद्धैरन्यवस्तुषु ॥ उच्यतेविष्णुरेवैकः सर्वैः सर्वगुणत्वतः ॥ ज्योतिरित्याद्यैः सर्वसूक्तगतैरन्यवस्तुषुप्रसिद्धैः सर्वशब्दैरेकोविष्णुरेवोच्यते । नत्वग्न्यादिः । कुतः । सर्वगुणत्वतः । कर्णचक्षुर्मनोविदूरत्वोक्त्यभिप्रेतापरिच्छिन्नवैभवरूपसर्वगुणत्वादित्यर्थः । केननिमित्तेनेत्यतोपि । सर्वगुणत्वतः । स्वयंज्योतिष्ट्वाद्भगवतइतिपंचमगीताभाष्योक्तदिशाप्रकाशरूपत्वादिरूपज्योतिरादितच्छब्दप्रवृत्तिनिमित्तसर्वगुणत्वादन्यगतंप्रतिस्वातंत्र्याच्चेत्यर्थः ॥१०॥ नन्वग्निसूक्तस्थंज्योतिर्विष्णुरित्ययुक्तं । अस्यैवज्योतिषः अथयदतः परोदिवोज्योतिर्दीप्यतइतिछांदोग्येतृतीयेध्यायेश्रवणात्तस्यचगायत्रीवाइदंसर्वमित्युपक्रमेणगायत्रीत्वात् । नहितस्यापिविष्णुत्वेगायत्रीवागाद्यन्यत्रप्रसिद्धशब्दोक्तौप्रयोजनमस्ति । ज्योतिःशब्दप्रस्तुतेतेजोवैब्रह्मवर्चसंगायत्रीतितत्पर्यायस्यतेजः शब्दस्योक्तेः । अतउक्तमयुक्तमित्यतः प्राप्तं ॥ छंदोभिधानादित्यादिसूत्रत्रयं ॥ तस्याप्यर्थो ज्योतिरित्याद्यैरिति । अग्न्यादिसूक्तोपनिषद्गतज्योतिः तत्सहश्रुतगायत्रीप्रभृतिभिश्चाधिवेदगतैरन्यवस्तुषुप्रसिद्धैः सर्वैः शब्दैरेकोविष्णुरेवोच्यते । नतुछंदोविशेषादिः । कुतः । सर्वगुणत्वतः । गा

SGDF Sri Gargeshwari Digital Foundation

यतिचत्रायतिचेति एतामेवनातिशयंते पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीत्यादिनोक्तैतत्प्रकरणस्थसर्ववेदोच्चारणाखिलपाल
नरूपगानत्राणकर्तृत्व सर्वोत्तमत्व भूतादिपादत्वादि सर्वगुणत्वादित्यर्थः । केननिमित्तेन ॥ सर्वगुणत्वतः ॥ गायत्रीवागाद्य
धिदैवगततत्तच्छब्दप्रवृत्तिनिमित्तवत्त्वादन्यगतंप्रवृत्तिहेतुंप्रतिस्वातंत्र्याच्चेत्यर्थः । तेनैवात्रसर्वनयेष्वपींद्राकाशप्राणज्योतिर्गायत्री
वागित्यादिशब्दानांविष्ण्वर्थत्वेविष्णौलोकतोप्रसिद्धानांअन्यत्ररूढानांश्रुतिषुप्रयोगेप्रयोजनंनास्तीत्यपिनिरस्तं । यतस्तत्तच्छब्दप्र
वृत्तिनिमित्तगुणवत्त्वात् । निमित्ततादृशसर्वगुणलाभार्थमितियावत् । सर्वैःगुणिसामान्याधिदैवाधिभूताध्यात्मगतसूक्तस्थाधिवे
दगतैःशब्दैर्विष्णुरेवोच्यते । नचगुणलाभोव्यर्थइत्यपिशंक्यं ॥ सर्वगुणत्वतः ॥ आद्यसूत्राभिमतब्रह्मशब्दोक्तप्रधानलक्षणभू
तसमस्तगुणवत्त्वसिद्ध्यर्थत्वात् । अधिकारिणांस्वयोग्यगुणपूर्तयेउपासनार्थत्वाच्च । ननुचोपक्रमस्थगायत्रीशब्देनतदुपरिश्रुतज्यो
तिःपदेनचविष्णुरेकएवोच्यतइत्ययुक्तं । त्रिपादस्यामृतंदिवीतिदिवःपरोज्योतिरितिद्युस्थत्वदिवःपरत्वयोरुक्त्यातयोर्भिन्नत्वादिति
नशंक्यं ॥ सर्वगुणत्वतः॥ विष्णोरेकस्यैवद्युस्थत्वदिवःपरत्वगुणवत्त्वादित्यर्थः । त्रिलोकविवक्षायांलक्षयोजनोन्नतांतरिक्षादुपरि
स्थितानांअनंतासनश्वेतद्वीपवैकुंठानांद्युत्वेनतत्रस्थितवासुदेवनारायणवैकुंठाख्यविष्णुरूपाणांद्युस्थत्वस्य पृथिव्यांद्यौर्महामेरुराका
शेसूर्यमंडलं । दिवींद्रसदनंचैवतत्परेतुदिवःपरइतिस्मृत्याक्रमान्मेर्वादिभ्यउन्नतेष्वनंतासनादिषुस्थितानांदिवःपरत्वस्यचसंभवात् ।
नन्वेवमपित्र्यात्मकेभ्यश्चसर्वेभ्योवैकुंठश्चोच्चउच्यतइत्युक्तस्वर्गादिसर्वद्युपरत्वंवैकुंठस्यनोक्तंस्यादितिचेत्तर्हिसप्तलोकविवक्षयाद्युपर
त्वमस्तु । एवंचसर्वद्युपरत्वसिद्धिः । तथाग्निसूक्तस्थंछांदोग्यस्थंचज्योतिर्विष्णुरेकएवेत्यपिसमाहितंबोध्यं ॥ सर्वगुणत्वतः॥

SGDF
Sri Gargeshwari Digital Foundation

कर्णादिविदूरत्वद्रष्टृत्वश्रोतृत्वादिसर्वगुणत्वादित्यर्थः । सूत्रेश्रुतकर्णादिविदूरत्वगुणेपिहरौछांदोग्येतदेतद्दृष्टंचश्रुतंचेत्युक्तद्रष्टत्वा देःसुधोक्तदिशाऽधिष्ठानद्वारोपपत्तेरिति प्राणपदप्रवृत्तिनिमित्तगुणलाभस्यप्रणेतेत्यनेनैवोक्तत्वात्प्राणस्तथेत्येतदर्थसंग्रहोनकृतः । यद्वा नन्वथापिप्रणेताविष्णुरित्ययुक्तं । चक्षुःश्रोत्रंमनोवाक्प्राणइत्यैतरेयेश्रुतस्यप्राणशब्दितस्यप्रणेतुश्चक्षुरादींद्रियसहपाठेंद्रियसं वादादिनामुख्यप्राणस्यप्राणोवाअहमस्मीतिइंद्रेणआत्मनःप्राणतादात्म्योक्तेरिंद्रस्ययच्छतंवर्षाणिपुरुषायुषोभवंतीतिजीवलिंगेन जीवत्वस्यचावगमात् । वाक्यभेदेनत्रितयपरत्वोपपत्तेश्चेत्यतउक्तं । प्राणस्तथानुगमादितिसूत्रचतुष्टयं । तदर्थः इत्या द्यैःप्रसिद्धैरन्यवस्तुषु ॥ उच्यतेविष्णुरेवैकःसर्वैःसर्वगुणत्वतइति ॥ मुख्यप्राणादिरूपान्यप्रापकप्रबललिंगोपेतप्राणाद्यैः सर्वैरन्यवस्तुषुप्रसिद्धैःशब्दैरेकोविष्णुरेवोच्यते । नतुमुख्यप्राणादिरनेकः । येनवाक्यभेदआश्रीयेत । कुतः । सर्वगुणत्वतः । तंदेवाःप्राणयंत तंदेवाभूतिरित्युपासांचक्रिरे तदयंप्राणोधितिष्ठतीत्यादिनोक्तैतत्प्रकरणस्थदेवोपास्यत्वदेहाख्यरथाधिष्ठातृत्वादिस र्वगुणत्वाद्विष्णोरित्यर्थः । केननिमित्तेनोच्यते । सर्वगुणत्वतः । प्रागुक्तदिशासर्वजीवनहेतुत्वादिरूपप्राणादितत्तच्छब्दप्रवृ त्तिनिमित्तगुणवत्त्वादन्यगतंप्रतिस्वातंत्र्याच्च। नचान्यलिंगविरोधः । सर्वगुणत्वतः । प्राणसंवादाद्यन्यलिंगरूपसर्वगुणवत्त्वा दित्यर्थः । प्राणसंवादादिशतायुष्ट्वरूपस्येंद्रोक्तप्राणतादात्म्यस्यचतत्स्थितांतर्यामिण्युपपत्तेः । नचोदासीनवदास्तांतौकेशवश्चाब्ज संभवइतिस्मृतिविरोधः । सर्वगुणत्वतः । अंतर्यामिणःतदीयप्राणसंवादादिसर्वगुणत्वात् । स्मृतेस्तुततोबाह्यरूपविषयत्वेनो पपत्तेरिति । नचांतर्याम्युक्तिर्नाभिमता । सर्वगुणत्वतः । सइदंब्रह्मततममिति एतयाद्वाराप्रापद्यतेति इत्याहमहिदासइति

SGDF
Sri Gargeshwari Digital Foundation

व्याप्तत्वांतस्थत्वबहिष्ठत्वगुणवत्त्वोक्तेरित्यर्थः । नचत्रितयोक्तिर्व्यर्था । सर्वगुणत्वतः । उपासनार्थंसर्वान्त्रिविधाधिकारिणः प्रतिगुणत्वादनुगुणत्वादनुरूपत्वादिति । पादार्थमुपसंहरति ॥ इत्याद्यैरिति ॥ समन्वितपूर्णानंदादिशब्दानांइत्याद्यैरितिपराम र्शः ॥ ७ ॥ इतिश्रीब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांप्रथमाध्यायस्यप्रथमःपादः ॥ ७ ॥ एवंसर्वशाखागतनानावाक्यस्थितैरन्यवस्तुषुप्रसिद्धैःसर्वनामभिरेकोविष्णुरेवतत्तत्प्रकरणस्थनानालिंगेभ्योहेतुभ्यउच्यतइत्युक्तंपू र्वपादे । तदसाध्विव । हेतूकृतलिंगेषुकेषांचिदीश्वरनिष्ठताप्रसिद्धावपिसर्वेषांतदसिद्धेरित्यतःलिंगपादःप्रवृत्तः । तदर्थमाह ॥ प्रसि द्धैरन्यवस्तुषु ॥ उच्यतेविष्णुरेवैकइति ॥ लिंगैःसर्वैर्युतःसहीत्यग्रेतनमत्राप्यन्वेति । यःपूर्वपादेऽशेषनामभिरुक्तःसएकोवि ष्णुरेवान्यवस्तुषुप्रसिद्धैरतएवभगवत्यप्रसिद्धैर्विप्रतिपन्नैरितियावत् । सर्वैर्लिंगैर्युतःयुक्तइत्युच्यतेप्रतिपाद्यते । अस्मिन्पादेसूत्रकृ तेत्यर्थः । विप्रतिपन्नाशेषलिंगसमन्वयंब्रूतेऽस्मिन्पादइतियावत् । किंनाम्ना लिंगेन । नाद्यः अन्योन्याश्रयात् । नांत्यः विप्रतिप त्तेः । इत्यतोप्युक्तं लिंगैर्हीति । विष्णुधर्मत्वेनप्रमाणप्रसिद्धैस्तत्तत्प्रकरणस्थनिरवकाशाविप्रतिपन्नलिंगैरित्यर्थः । उपलक्षण मेतत् । निरवकाशश्रुत्यादिनाचेत्यपिध्येयं । ननुप्राणशब्दितस्यविष्णोरुपासनार्थंसइदंब्रह्मततममित्यादिनोक्ततततमत्वादिगुणव त्त्वमयुक्तं । तत्रैवैतरेयेउत्तरत्र एतमस्यामेतंदिवीत्यादौवाक्येएतमित्येतच्छब्देनादित्योरसइतिपूर्वप्रकृततयाऽऽदित्यंवा चक्षुर्मयःश्रो त्रमयइत्यादिनावक्ष्यमाणजीवंवा परामृश्यतस्यपृथिव्यादिकतिचिज्जीवदेहहृदयगुहास्थत्वमुक्त्वांतेसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षत इत्यत्र भूतेष्वेतमेवाचक्षतेनान्यमितिसर्वभूतहृदयेजीवादित्ययोरेवसत्त्वोक्त्या प्राचीनतततमत्वांतस्थत्वयोरपितयोरेवावश्यंभावा ॥ १० ॥

देकप्रकरणस्थत्वाद्व्याप्तस्यहरेरल्पदेशेंतरवस्थानायोगाच्च । देहांतस्थत्वेजीवसमानभोगप्राप्तेश्चेत्यतःप्राप्तं सर्वत्रप्रसिद्धोपदेशा दित्यादिसूत्राष्टकं तदर्थः । सर्वगइति । लिंगैःसर्वैर्युतःसहीत्यन्वेति । विष्णुरेवैकइतिच । एतमस्यामित्यादिनोक्तः । सर्वगः सर्वभूतदेहहृदयगुहागतः सःप्राकृततमत्वेनोक्तोविष्णुरेव । नत्वादित्यःसर्वेजीवावा । कुतः । लिंगैःसर्वैर्युतोहीति । हिर्हेतौ । एतमेवब्रह्मेति अशरीरःप्रज्ञात्मेति सयोतोश्रुतोऽगतोऽमतइति आत्मानंपरस्मैशंसतीत्यादिनोक्तसावधारणब्रह्मशब्दार्थत्वाशरीर त्वाश्रुतत्वादिजीवकर्तृकशंसनक्रियाकर्मत्वाद्येतत्प्रकरणश्रुतलिंगयुक्तत्वाद्विष्णोरित्यर्थः।तच्चभाष्योक्तश्रुत्यासिद्धमितिभावः।यद्वा एतैर्लिंगैर्युतःसर्वगोविष्णुरेव तेषांलिंगानांभाष्योक्तवाक्यैर्वैष्णवत्वप्रसिद्धेरितिहेरर्थः । मुख्यब्रह्मणएवसावधारणब्रह्मशब्दार्थत्वा त् । अन्यस्यमुख्यत्वेअस्यामुख्यत्वेवाएतमेवब्रह्मेत्याचक्षतइत्यस्यायोगात् । अश्रुतत्वाद्यप्येवंध्येयं । ननुतस्यैतस्यासावादित्यो रसः पुरुषंपुरुषंप्रत्यादित्यइत्यादित्यशब्दस्यनामपादीयन्यायेनवैष्णवत्वेपि संवत्सरसारत्वसर्वपुरुषाभिमुख्याद्यादित्यलिंगस्य च क्षुर्मयःश्रोत्रमयइतिचक्षुर्मयत्वादेः हृदयगुहारूपाल्पस्थानत्वरूपाल्पौकस्त्वस्यजीवलिंगस्यभावात्तद्विरोधइत्यतोपि लिंगैःसर्वै र्युतःसहीति । सहिविष्णुरेवसंवत्सरसारत्वादिसर्वलिंगैर्युतोहिप्रसिद्धमेतच्छ्रुत्यादाविति । तथाहि । :तत्र संवत्सरंनामब्रह्माणमसृजत् । संवत्सराभिमानीतुब्रह्मेत्यादिश्रुतिस्मृतिभिःसंवत्सरस्यविरिंचत्वेन तन्नियंतृत्वरूपसारत्वस्यच यो ब्रह्माणंविदधातिपूर्वमित्यादिश्रुतिस्मृतिभिःसर्वपुरुषाभिमुख्यस्यमंडलद्वाराआदित्यइव सएषोंतरादित्येहिरण्मयःपुरुषः यश्चासा वादित्ये ध्येयःसदासवितृमंडलमध्यवर्तीनारायणः ब्रह्मणःसारभूतस्तुप्रद्युम्नोभगवान्हरिः सएवादित्यसंस्थश्चेत्यादिश्रुतिस्मृतिभिः

आदित्यस्थतयानिर्णीतेहरौ चक्षुर्मयत्वादेश्च सर्वेंद्रियमयोविष्णुःसर्वप्राणिषुसंस्थितइतिस्मृत्या चक्षुरादिस्वामित्वेनचपूर्णानंदइत्य त्रोक्तन्यायेन पूर्णदर्शनशक्तित्वाच्चक्षुर्मयइत्यादिस्मृत्याच मयटःप्राचुर्यार्थत्वेन चोपपत्तेः। अर्भकौकस्त्वस्यापिव्याप्तेहरौ अंतर्ब हिश्चतत्सर्वंव्याप्यनारायणःस्थितइतिश्रुत्या अहमात्मागुडाकेशसर्वभूताशयःस्थितइत्यादिस्मृत्या अंतरःखवदित्यत्रप्रसंगादुक्तयु क्त्याच समाहितत्वाद्वा पूर्वस्मात्खवदितिपदस्यानुवृत्त्या खवत्सर्वगोविष्णुरित्यन्वयेनसमाधानाद्वेतिभावः। एतेनसर्वगोविष्णुरि तिवचनेनैव। तत्रतत्रस्थितोविष्णुस्तत्तच्छक्तिप्रबोधकइत्याद्यनुभाष्योक्त्यासर्वगतत्वस्यतत्तच्छक्तिप्रबोधनार्थत्वात्सामर्थ्यातिशये नजीवसमानभोगप्राप्तिरपिसमाहितेतिध्येयं। अत्रसइत्युक्तिःपूर्वोक्तेनैक्योक्त्यर्था ॥ १ ॥ नन्वथापियदुक्तंसर्वकर्ताविष्णुरेवेत्यत्र सर्वसंबंधिजन्मस्थितिलयकर्तृत्वंविष्णोस्तदयुक्तं। सर्ववाअत्तीतितददितेरदितित्वमितिकाण्वश्रुतौ। अदितेरेवसर्वात्तृत्वरूपसंहर्तृ त्वोक्तेरित्यतःप्राप्तं अत्तेत्यादिसूत्रद्वयं ॥ तदर्थः। अत्तेति । एकोविष्णुरेवेति लिंगैःसर्वैर्युतःसहीतिचान्वेति । सर्वमत्ती त्यत्रोक्तःसप्राक्सर्वकर्तेत्यत्रसंहर्तृत्वेनोक्तोविष्णुरेवनत्वदितिः। कुतः। लिंगैःसर्वैर्युतोहीति । हिर्हेतौ। सर्वमत्तीत्युक्तासंकु चितसर्वात्तृत्व नैवेहकिंचनाग्रआसीन्मृत्युनैवेदमावृतमासीदित्यादिवाक्योक्तलयवर्तित्वाप्संवत्सरस्रष्टृत्वचतुर्मुखादनोद्यमादिरूपै तत्प्रकरणस्थसर्वलिंगैर्युतत्वादित्यर्थः। एतैर्लिंगैर्युतोत्ताविष्णुरेव। तेषांभाष्योक्तदिशावैष्णवत्वप्रसिद्धेरितिवा। अत्रएकइत्युक्तिः किंचिदत्त्रीअदितिःकिंचिदत्ताहरिरितिनशंक्यंसर्वस्यात्ताहरिरेकएवेतिवक्तुं। अत्रापिविष्णुरितिवर्तमानेसइत्युक्तिःप्रागुक्तेनैक्यद्यो

॥ ११ ॥

SGDF
Sri Gangeshwar Digital Foundation

तनायवा सतयावाचा तेनात्मनेत्यादौप्रथमांततच्छब्दोक्तःप्रकृतमृत्युरेवात्तानिर्णयश्रुतौउच्यतइतिद्योतनायवेति ॥ २ ॥ नन्वथापिनतस्यसर्वादनंयुक्तं । ऋतंपिबंतौसुकृतस्यलोकइतिऋतशब्दितकर्मफलादनरूपऋतपातृत्वस्यदेहहृदयगुहाप्रविष्टयोर्जीवेश्वरयोर्द्विवचनश्रुत्याप्रतीतावपिईश्वरस्यानश्नन्नित्यादिनाकर्मफलानत्तृत्वाच्छत्रिन्यायेनजीवेश्वरौऋतंपिबंतावित्युक्त्युपपत्तेरित्यतःप्राप्तं। गुहांप्रविष्टेत्यादिसूत्रद्वयं । तस्याप्यर्थः अत्तेति। सर्वगइत्यस्ति । लिंगैरित्याद्यन्वेति । सर्वगोऽत्ताऋतंपिबंतावित्याद्युक्तः सर्वप्राणिशरीरहृदयगुहास्थःसन्कर्मफलात्तासर्वात्तृत्वेनोक्तःसएकोविष्णुरेव नतुजीवेश्वरौ। कुतः । लिंगैःसर्वैर्युतोहि । गुहांप्रविष्टाविति यःसेतुरीजानानामिति अक्षरंब्रह्मतत्परमिति गुहाप्रविष्टत्वसेतुत्वाक्षरत्वैकवचनोक्तैकत्वादिलिंगैर्युतत्वादित्यर्थः । एतैर्लिंगैर्युतोत्ताविष्णुरेव । तेषांभाष्यदिशावैष्णवत्वप्रसिद्धेरितिवा । अत्रापिविष्णुरितिवर्तमानेसइत्युक्तिःसर्वत्रैक्यद्योतनायवा । कइत्थावेदयत्रसइतितच्छब्देनपूर्वप्रकृतोविष्णुरेवद्विरूपोत्रोच्यतेनत्वप्रकृतोजीवइतिसूचनायवा। नचानशनश्रुतिविरोधइत्यतोपिसइति । तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोनशद्यःपितरंनवेदेति । अनशनवाक्यशेषेयोजीवानद्यात्तृत्वेनोक्तःसविष्णुरेवात्ताऋतपानकर्तेत्यर्थः । ऋतंसत्यंतथाधर्मःसुकृतंचेत्यादेः । तथाचश्रुतिःजीवाद्याशुभानशनपरेतिभावः । एकइतिजीवेशरूपानेककोटिनिरासायसर्वगइतिगुहास्थत्वयुक्तिसूचनाय । अत्तारावितिवाच्येअत्तेत्युक्तिःरूपद्वयैक्योक्त्यर्था ॥ ३ ॥ नन्वथापिपूर्णानंदोविष्णुरेवेत्येतदयुक्तं। तस्ययश्चासावादित्यइत्यादित्यस्थत्वोक्तेः । आदित्यस्थस्यच यएषआदित्येपुरुषःसोहमस्मीतिअग्निनास्वात्मतादात्म्योक्तेः। आदित्यस्थस्यैवचाग्नेः यएषोंतरक्षणिपुरुषोदृश्यतेएषआत्मेत्यक्षिस्थत्वमुच्यते । आदित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविशदितिश्रुत्या

आदित्याक्ष्णोरेकदेवताधिष्ठानत्वात् । अतोह्यादित्यस्थः पूर्णानंदोप्यग्निरेवेत्यतःप्राप्तं । अंतरउपपत्तेरितिसूत्रपंचकं । तद
र्थः नियंताचेति । पूर्ववदनुषंगः । सर्वगःसन्नंतरक्षणीतिश्रुतसर्वप्राणिचक्षुरंतस्थःसन्नेषवामनिरित्यादिनोक्तोनियंतावाम
भामशब्दितसौंदर्यतेजःप्रधानसर्वस्त्रीपुंसनियमनकर्ता ससंपूर्णानंदत्वेनोक्तादित्यस्थएकः स्वतंत्रोविष्णुरेव । नत्वग्निः । कुतः
। लिंगैःसर्वैर्युतोहि । एतदमृतमभयमेतद्ब्रह्म तद्यथापुष्करपलाशआपोनश्लिष्यंते एवमेवंविदिपापंकर्मनश्लिष्यतइति
तद्यदस्मिन्सर्पिर्वोदकंवेति एतंसंयद्वामइत्याचक्षते एतंसर्वाणिवामानिसंयंति एषउएववामनिः कंब्रह्मखंब्रह्म सएनान्ब्रह्मग
मयतीत्यादिना उक्तैरमृतत्वा भयत्वपापाश्लेषहेतुवेदनत्व स्वाश्रयचक्षुरसंगत्वापादकत्व संयद्वामत्व पूर्णानंदत्व पूर्णज्ञानत्वा
दिभिरेतत्प्रकरणस्थैःसर्वैर्लिंगैर्युतत्वादित्यर्थः । एतैर्लिंगैर्युतोनियंताविष्णुरेव । तेषांभाष्यदिशावैष्णवत्वसिद्धेरितिवा । अत्रापि
सइत्युक्तिर्योग्निनामासोहमस्मीतितच्छब्देनादित्यस्थमुद्दिश्यपादांत्यप्राणनयन्यायेनाहमस्मीतिस्वांतर्यामितादात्म्येनोक्तःसएव
विष्णुःयएषोंतरक्षणीतिअक्षिस्थोनियंतेतिसूचयितुं । अत्रांतरइतिवाच्येनियंतेत्युक्तिः एषएववामनिरित्यादिनोक्तनियंतृत्वरू
पेणैवाक्ष्यंतस्थत्वमितिद्योतयितुं । तेनाग्नेरक्षिस्थतयानियंतृत्वेजीवत्वसाम्येननियामकांतरापेक्षायामनवस्थितिः । नियम्यजीव
साम्येननियामकत्वासंभवश्चेतिसूचितं । स्वतंत्रेशोक्तौनदोषइतिसूचयितुंएकइति । यत्तुअनुभाष्ये एतद्भावाभिधंलिंगंक्रिया
लिंगेततःपरं ॥ अंतर्याम्यंतरश्चेतिक्रियाभावाख्यमुच्यतइतिक्रियारूपंभावरूपंलिंगमत्रोच्यतइत्युक्तं । तत्रचक्षुरंतःस्थितिरूपभा
वस्यसर्वगइत्यनुवृत्त्यास्पष्टत्वान्नियमनरूपंक्रियाख्यलिंगमेवोपात्तंनियंतेति । तत्रक्रियापदेनांतःस्थित्वारमणकृदित्यनुभाष्यदिशा

नरमणरूपक्रियैवविवक्षिता किंतुनियमनरूपक्रियापि । अतएवक्रियेतिसामान्योक्तिः ॥ ४ ॥ नन्वक्ष्यंतस्थोनियंताविष्णुरित्य
युक्तं । एतदमृतमितितत्रहेतूकृतस्यामृतत्वस्यवाजसनेयेपंचमे यःपृथिव्यांतिष्ठन्नित्युपक्रम्यएषतआत्मांतर्याम्यमृतइत्यादिनापृ
थिव्याद्यंतर्यामिणःश्रवणात्तस्यचपृथिवीशरीरमितिपृथिवीशरीरकत्वादिनापृथिव्याद्यभिमानिजीवत्वादुपादानप्रकृतित्वाद्वेत्यतः
प्राप्तं । अंतर्यामीत्यादिसूत्रत्रयं । तस्याप्यर्थो नियंताचेति । पूर्ववदनुषंगः । सचक्षुरादावमृतत्वेनोक्तः सएकोविष्णु
रेव । सर्वगोनियंता । अंतर्यामिशब्दोक्तसर्वप्राण्यतंस्थःसन्नियमनकर्ता । नतुतत्तदभिमानिजीवः तदुपादानप्रकृतिर्वेत्यर्थः । कुतः
। सर्वैर्लिंगैर्युतोहि । यंपृथिवीनवेद पृथिवीमंतरइत्यादिनोक्तपृथिव्याद्यभिमानिदेवाविदितत्वा नन्यापेक्षरमणवत्त्वरूपांतर
त्वा मृतत्वाद्येतत्प्रकरणस्थलिंगैर्युतत्वादित्यर्थः । पूर्ववद्वायोजना । प्रागुक्तसमुच्चयेचशब्दः । ननुचशरीरवत्त्वलिंगाज्जीवएवकु
तोन इत्यतोपि नियंतेति । विश्वजीवांतरत्वाद्यैरित्यप्यन्वेति । हियस्मान्नियंतांतर्यामी योविज्ञानादंतरोयआत्मनोंतरइत्या
दिनोक्तविज्ञानात्मशब्दितसर्वजीवविविक्तत्वरूपांतरत्वाख्यविश्वजीवांतरत्वाद्यैर्लिंगैर्युतोऽतोनजीवइत्यर्थः । आद्यपदेनयआ
त्मनीत्युक्ताधाराधेयत्वादिग्रहः । नहिजीवाद्भेदेनअधीतस्यजीवत्वंयुक्तमितिभावः । कथंतर्हिंपृथिव्याद्यभिमानिसर्वजीवशरीर
कत्वमशरीरस्यविष्णोरित्यतोपि नियंतेति । हियतोविष्णुर्नियंता सर्वनियामकः अतःपृथिव्याद्यभिमानिसर्वजीवशरीरकइ
त्यर्थः । यथालोकेशरीरंजीवतंत्रं तथासर्वेजीवाविष्णुतंत्रत्वाद्गौण्यावृत्त्यातच्छरीराणीत्यर्थः । पृथिव्याद्यादेवतास्तुदेहवद्वशत्व
तः । शरीरमितिचोच्यंतेयस्यविष्णोर्महात्मनइतिबृहद्भाष्योक्तस्मृतेः । शीर्यतेनित्यमेवास्मादितिभाष्योक्तदिशासर्वस्यविष्णुना

SGDF Sri Gargeshwari Digital Foundation

देहादिद्वारायथायोग्यंशीर्यमाणत्वाच्चयोगवृत्त्यासर्वशरीरत्वंयुक्तमितिचशब्दार्थः ॥ ५ ॥ नन्वथापियदुक्तंयंपृथिवीनवेद अदृ
श्येनात्म्यइत्यादिनाविष्णोरदृश्यत्वादिकं तदाथर्वणे अथपरा ययातदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमित्यादिनाऽक्षरस्योच्य
ते तच्चाक्षरं यथापृथिव्यामोषधयःसंभवंतीतिदृष्टांतपूर्वकं अक्षरात्संभवतीहविश्वमितिविश्वोपादानकारणत्वेनाक्षरात्परतःपरइ
त्युत्कर्षावधित्वेनचश्रुतमितिअनुपादानेसर्वोत्कृष्टेविष्णावनुपपन्नंसच्चिदचित्प्रकृतिर्विरिंचरुद्रावा तदन्यतममेववाब्रह्म ईशश्रु
त्यादिप्रापकवशादुपेयमित्यतःप्राप्तं । अदृश्यत्वादिगुणकइत्यादियोगत्रयं । तदर्थः । दृश्यत्वाद्युज्झितःसदेति ॥
पूर्ववदनुषंगः । सप्रागदृश्येऽनात्म्यइत्यादिनोक्तएकोविष्णुरेवदृश्यत्वाद्युज्झितः । नतुचित्प्रकृत्यादिरनेकः । कुतः । लिंगैःसर्वैर्यु
तोहि । अथपरा ययातदक्षरमधिगम्यतइति यःसर्वज्ञइति रुग्मवर्णकर्तारमीशमिति परविद्याविषयत्वसार्वज्ञरूपांतरामिश्र
रुग्मवर्णाद्येतत्प्रकरणस्थसर्वलिंगयुतत्वादित्यर्थः । एतैर्लिंगैर्युतोदृश्यत्वाद्युज्झितोविष्णुरेव । तेषांलिंगानांभाष्योक्तश्रुत्यादिभि
र्विष्णौप्रसिद्धेरितिवार्थः । अक्षरशब्दस्यनपुंसकलिंगत्वेनदृश्यत्वाद्युज्झितमितिवाच्येपुल्लिंगोक्तिर्विष्णुपदान्वयायवा परतःपरइत्यु
क्तपरवस्त्वपेक्षयावा । तेनयत्तदद्रेश्यमित्यादिना दृश्यत्वादिहीनं अक्षरात्संभवतीतिकारणत्वेनोक्तं अक्षरात्परतःपरइतिपरत्वेनो
क्तंचवस्त्वेकमितिदर्शितत्वात् । परावध्यक्षरमन्यदितिसूचनान्नपरावधित्वंदृश्यत्वाद्युज्झिताक्षरस्यविष्णुत्वेबाधकं । अक्षरा ॥ १३ ॥
त्संभवतीतिपंचम्यपिकारणत्वमात्रे नतूपादानत्वइतिभावः । अत्रयद्यपिश्रुतौदृश्यत्वाद्युज्झितत्ववत् नित्यंविभुंसर्वगतंसुसू
क्ष्मं यद्भूतयोनिमितिभावरूपगुणांतरमपिश्रुतं । सूत्रेचादृश्यत्वादिगुणकइति । भावाभावसाधारण्येनगुणपरं । तथापिसर्व

SGDF
Sri Gargeshwari Digital Foundation

गतत्वसुसूक्ष्मत्वादेःसर्वत्रप्रसिद्धेत्यादौहरौसिद्धत्वादिहादृश्यत्वादिसमन्वयएवतात्पर्यात् दृश्यत्वाद्युज्झितइत्युक्तं । अनुभा
ष्येचादृश्यत्वाद्यभावाख्यमिति । यद्वाभावधर्माणांबहुत्वादभावधर्माणामल्पत्वाद्भावोपलक्षकतयादृश्यत्वाद्युज्झितइत्युक्तं ।
यद्वासर्वगइतिभावांतरोपलक्षकतयाइहानुवर्त्यसर्वगःसर्वगतःसन्दृश्यत्वाद्युज्झितइतिव्याख्येयं । अत्रदृश्यत्वाद्युज्झितत्वंना
म साकल्येनचक्षुर्मनःप्रभृत्यगोचरत्वमपरिच्छेद्यवैभवत्वमितियावत् । तन्नकदाचिद्धीयतइतिभावेनोक्तं । सदादृश्यत्वाद्यु
ज्झितइति । तेनश्रुतौनित्यपदंअदृश्यत्वादेरपिविशेषणमितिदर्शितं । यद्वा सदेतिअत्तानियंताचेत्यत्राप्यन्वेति । तथाचे
श्वरक्रियापिनित्येत्युक्तंभवति । विवृतंचानुव्याख्यानेक्रियानित्यत्वं ॥ ६ ॥ ननुदृश्यत्वाद्युज्झितोक्षरात्परतःपरोविष्णुरित्य
युक्तं । तद्धर्मस्यसर्वगतत्वस्यछांदोग्येपंचमे यस्त्वेतंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तइति वैश्वानरस्याभितोवि
गतंमानंमर्यादायस्येत्यभिविमानपदेनप्रतीते वैश्वानरशब्दस्यचाग्नौरूढत्वात्वैश्वानरेतद्भुतमितिहृदयंगार्हपत्यइत्यादिनोक्तहो
माधारत्व गार्हपत्याद्यंगत्व पाचकत्वाद्यनेकलिंगानांभावेनचाग्न्यर्थत्वात् । विष्ण्वर्थत्वेचवैश्वानरादिशब्दानामग्न्यादौप्रयोग
स्यसूक्तविद्याव्यवस्थायाश्चायोगात् । प्राचीनसर्वगतोप्यग्निदेवता भूतंवा । नचकालाकाशादेरिवाग्नाविष्णवोरप्यस्तुसर्वगत
त्वमितिशंक्यं । बाधकाभावेनपूर्वत्रसर्वगतमित्यनेनात्राभिविमानपदेनचानन्यायत्तनिरतिशयस्यैवसर्वगतत्वस्यप्रतीतेः । तस्य
चद्वयोरयोगादित्यतःप्राप्तं । वैश्वानरःसाधारणशब्दविशेषादित्यादिसूत्रनवकं । तदर्थः विश्वजीवांतरत्वाद्यै
र्लिंगैःसर्वैर्युतःसहीति । एकोविष्णुरेवेत्यन्वेति । सःप्राक्सर्वगतत्वादिनोक्तःएकोविष्णुरेव । यौगिकवैश्वानरशब्दितवि

SGDF
Sri Gangeshwari Digital Foundation

श्वजीवांतरत्वाद्यैर्होमाधारत्वगार्हपत्याद्यंगत्वाद्यैर्लिंगैर्युतोवैश्वानराग्न्यादिशब्दैस्तत्सूक्तैस्तद्विद्याभिश्चप्रतिपाद्यइतियावत् । न
त्वग्न्यादिदेवता भूतंचेत्यर्थः । कुतः । लिंगैःसर्वैर्युतोहीत्यावृत्तिः । लिंगशब्दोत्रप्रमापकमात्रपरः । आत्मश्रुतिप्रकरण
श्रुतिस्मृतिसमाख्याभिर्युतत्वादित्यर्थः । वैश्वानरमात्मानमित्यात्मश्रुतेः । कोनआत्माकिंब्रह्मेत्याद्युपक्रमेणास्यब्रह्मप्रकरणत्वा
त् । शीर्ष्णोद्यौस्समवर्ततेत्यादिनापुरुषसूक्तोक्तस्यमूर्धैवसुतेजाइत्यादिनावैश्वानरविद्यायामाम्नानेनार्थतःपुरुषसूक्तोक्तसमा
ख्यानात् । अहंवैश्वानरोभूत्वेतिगीतासमाख्यानाच्चेतिच । अग्न्यादिलिंगानांविष्णावुपासनार्थत्वेनसावकाशत्वस्यविश्वजी
वांतरत्वोक्त्यैवसर्वशब्दमुख्यार्थविष्णुसंबंधादन्यत्रहानाद्यर्थशब्दप्रयोगस्यतत्तत्सूक्तविद्याप्रतिपाद्यस्यविष्णोरुपासककर्तृकानु
स्मृत्यभिव्यक्तिप्राहृयधिष्ठानानामग्न्यादीनांव्यवस्थया पृथग्रूपाणिविष्णोस्त्वित्यादिऋग्भाष्योक्तदिशानामरूपभेदव्यवस्थया
च सूक्तादिव्यवस्थायाश्चोपपत्तेरितिभावः । स्थानैक्येनतद्गतानामैक्योक्तिवत् । वक्ष्यमाणदिशाहृदयाकाशस्यांगुष्ठमात्रत्वेन
तत्रस्थस्यांगुष्ठमात्रोक्तिवच्चप्रादेशमात्रत्वस्याप्युपपत्तेरितिभावः । हृदयेसर्वशोव्यापीप्रादेशःपुरुषोत्तमइतिषष्ठेबृहद्भाष्योक्तेः ।
अत्र श्रुतिर्लिंगाधिकापरेतिअनुभाष्येवैश्वानरशब्दस्यलोकतोग्नौरूढिमाश्रित्यनामत्वोक्तावपि इहविष्णौयौगिकत्वाल्लिंगत्वो
क्तिरविरुद्धा । पादार्थमुपसंहरति । विश्वजीवेति । प्रसिद्धैरन्यवस्तुष्वित्यस्ति । सर्वेषुभूतेष्वेतमेवब्रह्मेत्युक्तविश्वजीवांत
रस्थत्वाद्यैरन्यवस्तुषुप्रसिद्धैःसर्वैर्लिंगैर्युतः सएकोविष्णुरेवहि नान्यत्रप्रसिद्धइत्यर्थः ॥ ७ ॥ इतिश्रीमदानंदतीर्थभगव
त्पादाचार्यविरचितस्यब्रह्मसूत्राणुभाष्यस्यटीकायांराघवेंद्रयतिकृतायांतत्वमंजर्याख्यायांप्रथमाध्यायस्य

द्वितीयःपादः ॥ २ ॥ ७ ॥ नन्वेवमन्यत्रप्रसिद्धनामलिंगात्मकाशेषशब्दानांविष्णुनिष्ठतासिद्धावपिअन्यत्रापिवृत्तिरस्तु ।
मास्तुविष्ण्वेकनिष्ठत्वं । तथाच एकोविष्णुरेवेत्यवधारणायोगइत्यतःप्राप्तस्तृतीयःपादः । तदर्थमाह । तदन्यत्रचवाचकैः ।
मुख्यतःसर्वशब्दैश्चवाच्यएकोजनार्दनइत्यग्रेतनत्रिपादीआदावप्याकृष्यते । चोप्यर्थे । तदितिप्रस्तुतविष्णुपरामर्शः । तदन्यत्रा
पीत्युक्त्याविष्णावपीतिसमुच्चीयते । तदितिसप्तम्यंताव्ययंवा । तत्र विष्णौ अन्यत्रचवाचकैरुभयवाचकैः । पूर्वपादद्वयन्या
यापादितोभयत्रप्रसिद्धिकैर्वाश्रुत्यंतरसाधारण्यादिनास्वतएवोभयत्रप्रसिद्धिकैर्वासर्वशब्दैर्नामलिंगोभयात्मकैःशब्दैर्मुख्यतो
मुख्यवृत्त्याएकोजनार्दनोवाच्यो नतुविष्णुरन्यश्चेत्यर्थः । हरौतदन्यत्रप्रसिद्धनामलिंगसमन्वयमाहविष्णावेवात्रसूत्रकृदितिफ
लितार्थः । नकेवलमन्यत्रप्रसिद्धैःकिंतुतदन्यत्रवाचकैःसर्वशब्दैश्चेतिचार्थः । ननुदृश्यत्वाद्युज्झितोविष्णुरित्ययुक्तं । तद्धर्मस्या
मृतहेतुज्ञानरूपपरविद्याविषयत्वस्यतमेवैकंजानथआत्मानमन्यावाचोविमुंचथ । अमृतस्यैषसेतुरित्याथर्वणएवोत्तरत्र यस्मि
न्द्यौरितिपूर्ववाक्योक्तद्युभ्वाद्याधारेश्रवणात्तस्यचाकाशएवतदोतंचप्रोतंचेति वायुनावैगौतमसूत्रेणायंचलोकःपरश्चलोकइति
रुद्रोवावल्लोकाधारइति समाख्याभिःप्रकृतिवायुरुद्राणां बहुधाजायमानइत्युत्तरवाक्येश्रुतजायमानत्वलिंगेनजीवस्यचप्रास
त्वात् । समाख्यादिस्थरुद्रादिशब्दानांरुद्रादावेवरूढत्वात्प्राचीनोपितेषामन्यतमो नविष्णुरित्यतःप्राप्तं । द्युभ्वाद्यायतनं
स्वशब्दादित्यादिसूत्रसप्तकं । तदर्थंभाषते । सर्वाश्रयइति । तदन्यत्रचेत्यादित्रिपादीइहप्रतिनयमन्वेति । लिंगैरित्या
दिच । अंत्यश्चोवधारणे । तत्तस्मादित्यप्यर्थः । यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैरितिवाक्योक्तोद्युभ्वादि

SGDF
Sri Gargeshwari Digital Foundation

सर्वाश्रयःसप्रागुक्तः । विष्णावेवोताश्चेतिश्रुतौप्रसिद्धोवा एकोजनार्दनः । तस्मात्यस्मिन् तमेवैकमित्यादिभिःतदन्यत्रच
वाचकैःश्रुत्यादिनाऽन्यवाचकतयापिप्रतीतैःसर्वैरेकोजनार्दनएव मुख्यतोवाच्यः । नप्रकृत्यादिरनेकः । कुतःसर्वाश्रयोवि
ष्णुः । लिंगैःसर्वैर्युतःसहि । लिंगैरित्युपलक्षणं जानथआत्मानमित्यादिनोक्तै रात्मश्रुति हेयत्वानुक्त्य हेयत्वोक्ति मुक्तो
पसृप्यत्वाद्येतत्प्रकरणस्थलिंगैर्युतत्वादितिवा एतैर्लिंगैर्युतःसर्वाश्रयएकोजनार्दनः । तेषांचभाष्योक्तवचनैर्विष्णौप्रसिद्धत्वा
दितिवार्थः । एवमग्रेपियोजनाद्वयंबोध्यं । नचसमाख्याश्रुत्यादिविरोधइत्यतोपि तदन्यत्रचेति । चोवधारणे । विष्णव
न्यवाचकतयैवप्रतीतैःसमाख्याश्रुत्यादिगतैःरुद्रपिनाक्यादिसर्वशब्दैर्विषयवाक्यस्थजायमानादिशब्दैरेकोजनार्दनएवमुख्य
तोमहायोगपौराणिकरूढिभ्यांवाच्योहियतोतइत्यर्थः । सविष्णुरितिवर्तमानेपिजनार्दनइत्युक्तिः । रुजंद्रावयतेयस्माद्रुद्रस्त
स्माज्जनार्दनइतिस्मृतिसूचनेनमहायोगपौराणिकरूढिभ्यांरुद्रादिशब्दानांहरौमुख्यत्वसूचनाय । तथानजायतेअर्दयतिचसं
सारमितिजनार्दनइत्यादिगीताभाष्योक्तदिशा जनपदेनाजत्वोक्त्या अजायमानोबहुधाविजायतइतिश्रुतिसूचनेनप्रादुर्भाव
जनेरमृतसेतुपदोक्तमुक्तोपसृप्यत्वस्यचसूचनाय । तथाजुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकइति जीवादन्यं
ज्ञात्वामुच्यतइतिस्मृत्युक्तदिशाभेदज्ञानिनः संसारार्दकत्वोक्त्याभेदव्यपदेशसूचनेननात्रजीवेशाभेदःशंक्यः । ईशशब्दश्चज
नार्दनपरोमोचकत्वलिंगादित्यादिसूचनाय । एकइत्यनेककोटिकपूर्वपक्षनिरासाय ॥ १ ॥ नन्वथापिपूर्णानंदोविष्णुरित्युयु
क्तं । छांदोग्येसप्तमेयोवैभूमातत्सुखमितिभूमशब्दितस्यनिरुपपदसुखपदेनपूर्णसुखत्वोक्तेः । भूम्नश्चप्राणोत्राआशायाभूया

SGDF
Sri Gargeshwari Digital Foundation

नित्युपक्रमेणउत्क्रांतप्राणानितिईश्वरेव्याप्तेरनुपपन्नोत्क्रमणलिंगयुक्तप्राणशब्दितमुख्यवायुत्वादित्यतःप्राप्तं भूमासंप्रसादा
दित्यादिसूत्रद्वयं । तदर्थः पूर्णगुणइति । पूर्ववदनुषंगः । योवैभूमेतिभूमशब्दोक्तःपूर्णगुणःसप्राक्पूर्णानंदत्वेनोक्तःसए
कोजनार्दनः । तस्मात्प्राणोपक्रमणेनविष्णुर्वावदेवेभ्योभूयानितिसमाख्ययाचतत्रान्यत्रचवाचकत्वेनप्रतीतैर्भूमसुखप्राणात्मा
दिसर्वशब्दैर्मुख्यतोजनार्दनएववाच्योनतुमुख्यप्राणः । कुतः । पूर्णगुणोविष्णुर्लिंगैःसर्वैर्युतोहि । तत्सुखमित्युक्तपूर्णसु
खत्व सर्वोत्तमत्व सएवाधस्तादित्यादिनोक्तसर्वगतत्वादिलिंगैर्युतत्वात्। तेषांभाष्योक्तवाक्यैर्हरौप्रसिद्धत्वादित्यर्थः। नचप्राण
लिंगविरोधइत्यतोपि लिंगैःसर्वैर्युतोहीति । तमुत्क्रामंतंप्राणोनूत्क्रामतीत्यादौउत्क्रमणलिंगयुतोजनार्दनःप्रसिद्धइत्यर्थः ।
प्राणपदेनतदंतर्यामिरूपस्यैवगृहीतेः । प्राणलिंगानामुत्क्रमणादीनांव्यक्त्यात्मनास्थिताणुरूपविशेषेयुक्तत्वादितिभावः । भूब
हावितिधातोः । बहुःपूर्णतायामितिचेतिछांदोग्यभाष्यदिशाभूमशब्दःपूर्णगुणवाचीध्येयः । अत्रजनार्दनइत्युक्तिःमोचकत्वे
नोक्तभूम्नउपासकतयोक्तप्राणत्वंनशंक्यमितिसूचनाय । एकइत्युक्तिरपिभूमसुखसत्यविज्ञानाद्यनेकशब्दैरेकोगुणभेदेनोच्य
तेनत्वनेकइतिवक्तुं । सैवहीत्यतोस्यागतार्थत्वमन्यतोध्येयं ॥ २ ॥ नन्वथापिदृश्यत्वाद्युज्झितोविष्णुरित्ययुक्तं । वाजसनेये
पंचमे अदृष्टंद्रष्टृश्रुतंश्रोत्रित्यादिनाक्षरब्राह्मणोक्तस्याक्षरस्यअदृश्यत्वादिश्रवणात् । तस्यचकूटस्थोक्षरइत्यादौश्रीतत्वेप्रसि
द्धाक्षरश्रुत्या अहंसोममाहनसंबिभर्मीतिलक्ष्मीसूक्तेश्रीतत्वेप्रसिद्धचंद्राधारत्वस्य एतस्यवाक्षरस्यप्रशासनेगार्गिसूर्याचंद्रम
सौविधृतौतिष्ठतइतिश्रवणेनसूर्याद्याधारत्वलिंगेनचश्रीतत्वरूपत्वेनाविष्णुत्वात्प्राचीनोपिश्रीतत्वमेव । द्वयोरपरिच्छेद्यवैभवा

SGDF
Sri Gargeshwari Digital Foundation

योगादित्यतःप्राप्तं। अक्षरमंबरांतेत्यादिसूत्रत्रयं। तदर्थः **सोक्षरइति** । अत्राक्षरशब्देनयौगिकःतदर्थोऽविनाशीग्रा
ह्यः। तथाप्रस्तावात्। पूर्ववदनुषंगः। सइतिसर्वाश्रयपरामर्शः। एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेतीहश्रुतावाका
शशब्दितप्रकृतिद्वाराश्रुतः सःपृथिव्यादिप्रकृत्यंतसर्वाश्रयोक्षरोक्षरशब्दार्थोऽविनाशीसप्राकृद्दश्यत्वाद्युज्झितत्वेनोक्तःसए
कोजनार्दनः। तथाचाविनाशित्वरूपप्रवृत्तिनिमित्तसाम्येनतद्वदन्यत्रचवाचकैरेतस्मिन्नक्षरेइत्यक्षरतद्विशेषणसर्वशब्दैर्मुख्य
तश्चतुर्विधनाशराहित्यरूपयोगरूढिभ्यांएकोजनार्दनएववाच्योनश्रीतत्वं। कुतः। अक्षरोविष्णुःसर्वैर्लिंगैर्युतोहि। भूतं
भवच्चभविष्यच्चेत्याचक्षते। आकाशएवतदोतंचप्रोतंचेतिअक्षरेआकाशओतश्चेत्यादिनोक्तांबरांतशब्दितप्रकृत्यंतसर्वाधारत्वप्र
शासनशब्दितासंकुचितानन्यायत्ताज्ञामात्राधीनसर्वधारकत्वास्थूलमनण्वित्यादिवाक्योक्तप्राकृतस्थौल्यादिराहित्याप्राकृता
णुत्वमहत्त्वादिरूपैतत्प्रकरणश्रुतसर्वलिंगैर्युतत्वात्तेषांभाष्योक्तवाक्यैर्वैष्णवत्वस्यप्रसिद्धत्वादित्यर्थः। अत्रैकइतिएकःशास्तेति
वाक्यसूचनाय। जनार्दनइत्यक्षरत्वरूपाविनाशित्वसूचनाय। प्रागुक्तैवनिरुक्तिः। सइतिअंबरांतधृतिरूपहेतुसूचनायचंद्रा
धारत्वस्यसावकाशत्वसूचनायच॥ ३॥ नन्वथापिसर्वकर्ताविष्णुरित्ययुक्तं। छांदोग्येषष्ठे सदेवसोम्येदमग्रआसीदेकमेवाद्विती
यमित्यादिनाबहुप्रकरणेषुश्रुतसच्छब्दोक्तस्यावधारणेनएकपदादिनाचानन्याधीनकारणत्वस्यतत्तेजोसृजतेतिसन्मूलाःसोम्ये
माःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिसतासोम्यतदासंपन्नोभवतीत्यादिनाअत्रसृष्टिस्थितिमुक्तिसुप्तिप्रलयहेतुत्वादेश्चोक्तेः।सच्छ
ब्दितस्यचतदैक्षतबहुस्यांप्रजायेयेतिबहुभवनरूपविकारश्रवणेनप्रधानत्वादीक्षणस्यचजडेअभिमानिद्वारावा सत्वात्संजायते

ज्ञानमितिज्ञानोपादानत्वाद्वा युक्तत्वान्निर्विकारेहरौचविकारस्यसर्वथाप्ययोगादित्यतःप्राप्तं **ईक्षतिकर्मव्यपदेशात्सइ
ति**। तदर्थः **सन्निति**। अत्रापिपूर्ववद्यौगिकःसच्छब्दार्थोनिर्दोषत्वादिविशिष्टोवा स्वातंत्र्यादिविशिष्टोवासन्नितिनिर्दिश्य
ते प्रकरणवशात्। यच्छब्दायोगवृत्तयइतिवक्ष्यमाणानुरोधाच्च। पूर्ववदनुषंगः। सदेवसोम्येत्यादौसृष्टिस्थानेसच्छब्दोक्तः
सन्निर्दोषादिर्वा। स्वतंत्रोवा सःप्राक्सर्वकर्तृत्वेनोक्तःएकोजनार्दनः। तथाचकारणत्वमुखेनतदन्यत्रचवाचकत्वेनप्रतीतैःसदे
वसोम्य सन्मूलाःसोम्येत्यादिनानेकप्रकरणेषुश्रुतैःसर्वैःसच्छब्दैस्तद्विशेषणैरेकएवेत्यादिशब्दैर्मुख्यतोजनार्दनएववाच्योनप्र
कृतिः। कुतः। **सन्विष्णुःलिंगैःसर्वैर्युतोहि**। ईक्षितृत्व स्रष्टृत्वा द्वितीयत्वाद्यैर्लिंगैर्युतत्वादितिवा तैर्युतःसन्जनार्दनः
तेषांभाष्योक्तवाक्यैर्विष्णावेवमुख्यत्वप्रतीतेरितिवार्थः। नचबहुभवनविरोधः। सन्नितिसच्छाब्दार्थोक्त्यातेजःप्रभृत्यात्मना
विकाररूपदोषाभावस्यजनार्दनइत्यत्राजत्ववाचिजनपदेनअजायमानोबहुधाविजायतइतिश्रुतिसिद्धस्वरूपबहुभावस्यचदर्शि
तत्वात्। अर्दनइत्यंशेनचात्रसत्प्रतिष्ठाइत्यादिनाश्रुतमुक्तिहेतुत्वंचतस्यैवेतिसूचितं। एकइत्युक्तिर्नभिन्नजडरूपेणबहुभवनं
किंतुस्वाभिन्ननानानियामकरूपेणेतिसूचयितुं॥ ४॥ नन्वथापिसोक्षरइतिसूर्याचंद्रादिसर्वाधारोक्षरोहरिरित्ययुक्तं। छांदो
ग्येष्टमे ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशःतस्मिन्यदंतस्तदन्वेष्टव्यंइत्यादिनाहृत्पद्मस्थंकिंचिदुक्त्वास्यउभेअस्मि
न्द्यावापृथिवी सूर्याचंद्रमसावुभावित्यादिनासूर्याचंद्रादिसर्वाधारत्वोक्तेः हृत्पद्मस्थस्यचाकाशश्रुत्याकाशत्वाद्धृदिह्येषआत्मे
त्यादेर्जीवत्वाद्वेत्यतःप्राप्तं **दहरउत्तरेभ्यइत्यादिसूत्राष्टकं**। तदर्थो। **हृदब्जगइति** पूर्ववदनुषंगः। सर्वाश्रयःसन्नि

Sri Gargeshwari Digital Foundation

तिवर्तते । तस्मिन्यदंतरित्यादौहृत्स्थाकाशस्थतयापरंपरयाश्रुतोवा साक्षात्परंपरासाधारण्येनवा । अथवापृथिव्यादिसर्वाश्रयःसन्सर्वाधारोभूत्वाहृदब्जगः हृदयपद्मस्थः । सः सोक्षरइत्यत्रसर्वाधारत्वेनोक्तः एकोजनार्दनः । तस्मात् योवेदनिहितंगुहायामितिश्रुतेः । विष्णाविवतस्यांतेसुषिरंसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितं । हृदिह्येषआत्मेतिश्रुत्यंतरादन्यत्रवाचकतयाप्रतीतैःयदंतस्तदन्वेषितव्यं तद्वावविजिज्ञासितव्यं किंतदत्रविद्यतेयदन्वेष्टव्यं यद्वावविजिज्ञासितव्यं यावान्वाअयमाकाश इतिश्रुतैर्यदंतराकाशइत्यादिसर्वशब्दैर्हृत्पद्मस्थनिष्ठैर्मुख्यतोन्वयादाकाशस्थएकोजनार्दनएववाच्योनत्वनेकोजीवादिः । कुतः । उक्तरूपहृदब्जगोविष्णुः लिंगैःसर्वैर्युतोहि । उपलक्षणमेतत् । बाहुल्यात्स्वशब्देनलिंगोक्तिः । आत्मब्रह्मश्रुत्यपहतपाप्मत्वादि सत्यकामत्वादि सुप्तप्रजाप्राप्यत्वा रण्याख्यसुधासमुद्राश्रयलोकवत्त्व सर्वलोकाधारत्वादिलिंग वाजसनेयतैत्तिरीयसमाख्यानैर्युतत्वात्तेषांभाष्योक्तवाक्यैर्विष्णौप्रसिद्धेरिति । एतेषांजीवाकाशयोरसंभवात् । मुक्तजीवस्यापहतपाप्मत्वादेःसंभवेपितस्यहृत्पद्मस्थत्वाभावादीशायत्तत्वेननिरपेक्षस्यतस्यासंभवाच्चेतिभावः । तथाहिवाक्यशेषाः । यआत्मापहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासःसत्यकामःसत्यसंकल्पःसोन्वेष्टव्यइत्यादावात्मश्रुत्यपहतपाप्मत्वादिलिंगानि तथा प्रजाअहरहर्गच्छंत्यएतंब्रह्मलोकंनविंदंतीत्यत्रसुप्तप्रजाप्राप्यत्वलिंगब्रह्मश्रुती ब्रह्मणोलोकोब्रह्मलोकइतिहृत्पद्मस्थस्यब्रह्मलोकत्वोक्त्यातत्स्थस्यब्रह्मशब्दवत्त्वस्यसुप्तप्राप्यत्वस्यचसिद्धेः । तथाअरश्चहवैण्यश्चार्णवौब्रह्मलोकइत्युत्तरवाक्येसुधासमुद्राश्रयविष्णुलोकेप्रयुक्तब्रह्मलोकपदस्यहृत्पद्मे ब्रह्मलोकंनविंदंतीतिपूर्ववाक्येप्रयोगेणतत्स्थस्यताद्दशसमुद्राश्रयलोकवत्त्वस्यचसिद्धेः ।

SGDF
Sri Gargeshwari Digital Foundation

तथा ससेतुर्विधृतिरेषांलोकानामसंभेदायेतिसर्वलोकधारणसमर्थःसेतुराश्रयइत्युक्तेः । यएषोंतर्हृदयआकाशस्तस्मिन्शेतेसर्वस्य वशीत्यादिवाजसनेयश्रुतौ यत्पुंडरीकंपुरमध्यसंस्थंतत्रापिदहरंगगनंविशोकः । तस्मिन्यदंतस्तदुपासितव्यमितितैत्तिरीयश्रुतौचैकार्थ्यप्रतीतेः । नन्वेवंकिंतदत्रविद्यतइतिप्रश्नस्यब्रह्मविद्यतइतिपरिहारंविनायावान्वाइत्यादेरनन्वयइत्यतोपि हृदब्जगइति । सर्वाश्रयइत्यादिसर्वमिहान्वेति । अयमर्थः । कीदृशंतदत्रविद्यतइतिप्रश्नेयावान्परमात्माकाशाख्यःपूर्णगुणस्तिष्ठतितावान्पूर्णगुणोंहृदब्जगःहृद्ययनाद्धृदयनामकेहृत्पद्मस्थाकाशेविद्यमानःसःद्यावापृथिव्यादिसर्वाश्रयःअक्षरःसन्नविनाशीसन् नास्यजरयैतज्जीर्यते नवधेनास्यहन्यतइत्याद्युक्त्यादेहनाशेप्यनश्यन्सन्विद्यमानोपहतपाप्मेत्याद्युक्तापहतपाप्मत्वादिलिंगैःसर्वैःयुतइतिवाक्यान्वयइतिसर्वाश्रयोहृदब्जगोहरिरित्युक्तौचतस्यांतइतिवाक्येसुषिरेसर्वाधारत्वोक्तिरपिमंदिरेमणिमालेतिवत् सुषिरस्थहर्यपेक्षयासमाहिता । अल्पस्थानत्वंचखवत्सर्वगइत्यत्रसमाहितमितिभावः । ननुव्योम्नोंशतोल्पस्थानमित्युपपत्तावपिविष्णोरंशतोपिव्याप्तत्वान्नखवदुपपत्तिरित्यस्याप्युत्तरं पूर्णगुणोहृदब्जगइति । सर्वगतत्वादिगुणपूर्णत्वेनैवहृदब्जगतत्वस्यैषआत्मांतर्हृदयेज्यायानित्यादिश्रुतिप्रसिद्धेरितिहेरर्थः । अचिंत्यशक्त्योपपत्तेरितिभावः । जनार्दनइतिसंसारार्दकोहृदब्जगइत्युक्त्या परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते एषआत्मेत्येतच्छब्देनजीवंपरामृश्यहृत्पद्मस्थतयाप्रागुक्तात्मत्वविधानात्सर्वाश्रयोहृदब्जगोजीवइतिनिरस्तं । ज्योतिःपदोक्तस्यमोचकस्यैवैषइतिपरामृश्यात्मत्वोक्तेर्जीवपरामर्शाभावादिति । अजत्ववाचिनाजनेत्यंशेनदेहनाशेप्यनश्यन्नितिप्रागुक्तोवाक्यान्वयउपपादितः । हृदब्जगोहरिःपूर्णगुणइत्युक्त्यैवतदेतत्सत्यंब्रह्मपु

SGDF
Sri Gangeshwari Digital Foundation

रमितिदेहवाचिपदप्रयोगादात्मा नविष्णुरितिप्रत्युक्तं। ब्रह्मैवपूर्णत्वात्पुरमित्युपपत्तेः । एकइत्यनेककोटिकपूर्वपक्षनिरासायेति ॥ ५ ॥ नन्वथापिदृश्यत्वाद्युज्झितोविष्णुरित्यसाधु । काठके तदेतदितिमन्यंतेऽनिर्देश्यंपरमंसुखं । कथंनुतद्विजानीयांकिमु भातिनभातिवेतिपूर्वोत्तराभ्यामर्धाभ्यां तेषांसुखंशाश्वतमितिपूर्वप्रकृतज्ञानिसुखपरामर्शेन तस्याद्दृश्यत्वाज्ञेयत्वयोरुक्तेरित्यतः प्राप्तं अनुकृतेस्तस्यचेतिसूत्रद्वयं । तदर्थः सूर्यादिभासकइति । उपलक्षणमेतत् । नतत्रसूर्योभातीतिवाक्योक्त सूर्याद्यप्रकाश्यः तस्यभासेतिवाक्योक्तजगत्प्रकाशकश्चेत्यपिग्राह्यं । पूर्ववदनुषंगः । तमेवभांतमनुभातिसर्वमित्युत्तरवाक्ये यस्यपरमात्मनोरूपमनिर्देश्यंपरमंसुखं कथंनुतदित्याविर्भावंप्रार्थयंते तंपरमात्मानंभांतमनुसृत्यसर्वसूर्यचंद्रतारकादितेजोजातं भातिप्रकाशतइत्यादिनाश्रुतःसूर्यादिभासकःसःप्राकृद्दृश्यत्वाद्युज्झितत्वेनोक्तएकोजनार्दनः । नतुज्ञानिसुखं । तत्तस्मात्साधारणसुखश्रुत्यातदन्यवाचकतयाप्रतीतैस्तदेतच्छब्दैरानुकूल्येनगृह्यमाणनिष्ठैःसर्वैरेकोजनार्दनोमुख्यतो व्यवहितपरामर्शनपुंसकक्लेशादिनाविनावाच्यः । यतोवाचइत्यादिश्रुतौप्रसिद्धंयदनिर्देश्यंपरमंसुखं कथंनुतद्विजानीयामित्यानुकूल्येनगृह्णंति तदनिर्देश्यंसुखं । एतत् चेतनश्चेतनानामितिसन्निहितपरमात्मनोरूपमितिमन्यंतइतिवाक्ययोजनोपपत्तेः । कुतएवंकल्पनेत्यतः प्रागुक्तमुपलक्षणंमत्त्वाह। लिंगैर्युतोहि। सूर्यादितेजोराशिभासकत्व तदुपलक्षितसूर्याद्यप्रकाश्यत्वजगत्प्रकाशकत्वलिंगैर्युतत्वस्यभाष्योक्तश्रुतिस्मृतिभिःवैष्णवत्वप्रसिद्धेरित्यर्थः। अत्रैकइत्युक्तिःतदेतदितिश्रुतौएकंरूपमितिप्राक्प्रकृतरूपपरामर्शइति वा एकोबहूनामितिसन्निहितत्वंवासूचयितुं जनार्दनइतिअजत्वमोचकत्वयोरुक्त्या नित्योनित्यानामिति तमात्मस्थंयेनुपश्यंति

धीराःतेषांशांतिरिति हरेःसान्निध्याद्यस्यरूपमेवंसुखरूपं तमेवभांतमितिप्रागुक्तवाक्ययोजनासूचनात्तदेतदित्यादिनपुंसकस्य तमित्यादिपुल्लिंगस्यचोपपत्तिरितिसूचितं । अतएवानुग्राह्यत्वस्यसमन्वयलिंगस्यनिर्देशेकार्येसूर्यादिभासकत्वरूपसाधकहेतोरेवोक्तिः उक्तयोजनोपपादनसूचनार्थत्वात्। सूत्रानुसाराच्चेति। ननुकथंसूर्यादिभासकइति। कर्तरिचेतिसूत्रेतृजकाभ्यांयोगेकर्तृकर्मणोःकृतीतियाषष्ठीसानसमस्यतइतिसमासनिषेधात् । मैवं । याजकादिभिश्चेतिप्रतिप्रसवात् । यद्वाशेषषष्ठीत्वेनसमासः। अथवाभासयतीतिभासः । नंदिग्रहिपचादिभ्योल्युणिन्यचइतिसूत्रेपचादिराकृतिगणइतिवृत्तावुक्तत्वात् । अज्विधिःसर्वधातुभ्योवक्तव्यइतिमहाभाष्योक्तेर्वा यङोचिचेतिसूत्रेऽज्ग्रहणेनसर्वधातुभ्योऽच्प्रत्ययविधेर्मंजर्यांज्ञापितत्वाद्वा अच्प्रत्ययांतण्यंतभासशब्देनसूर्यादेर्भासःसूर्यादिभासइतिसमासः । अज्ञातइतिसूत्रेणकप्रत्ययः । सूर्यादिभासकइत्युपपत्तेः । यथोक्तंलिंगपादे सुधायां तत्रतत्रस्थितोविष्णुस्तत्तच्छक्तिप्रबोधकइत्येतद्व्याख्यावसरे। तत्तच्छक्तिप्रबोधकइतिकथं। कर्तरिचेतिसमासनिषेधात्। न। याजकादिभिश्चेतिप्रतिप्रसवात्। यद्वाप्रकृष्टोबोधोयस्मादितिवापचाद्यजंतत्वेनवाप्रबोधः। शक्तीनांप्रबोधःशक्तिप्रबोधः। ततश्चाज्ञातइतिकप्रत्ययइति ॥ ६ ॥ नन्वथापिविष्णुरेवजिज्ञास्यइत्युक्तमयुक्तं । काठके अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठति । ईशानइत्युक्त्वोर्ध्वंप्राणमुन्नयत्यपानंप्रत्यगस्यति । मध्येवामनमासीनंविश्वेदेवाउपासतइतीशानस्यैवजिज्ञास्यत्वोक्तेः। सोपासनाचद्विविधेत्युक्तोपासनाजिज्ञासयोरैक्यादीशानस्य एवमेवैषप्राणइत्यादिश्रुत्यंतरप्रसिद्धप्राणव्यवस्थापकत्वादिरूपमुख्यप्राणलिंगानामीशाने ऊर्ध्वंप्राणमितिश्रवणेनमुख्यप्राणत्वेन तस्यापिजिज्ञास्यत्वप्राप्त्या मोचकत्वस्यापिस्वातंत्र्येणप्राप्तेरित्यतःप्रा

SGDF Sri Gargeshwari Digital Foundation

षं शब्दादेवप्रमितइत्यादिसूत्रद्वयं । तदर्थः प्राणप्रेरकइति । पूर्ववदनुषंगः। ऊर्ध्वंप्राणमितिवाक्येश्रुतःप्राणप्रेरकः प्राणानां
प्राणोपलक्षितप्राणादिवायूनांव्यवस्थापकः सप्राग्जिज्ञास्यत्वेनोक्तः एकोजनार्दनः नतुमुख्यप्राणः। तस्मात्प्रेरकत्वसाम्येनतद
न्यत्रापिवाचकतयाप्रतीतेशानशब्दतद्विशेषणांगुष्ठमात्रादिसर्वशब्दैर्मुख्यतः स्वारस्येनवाच्यएव । कुतः । प्राणप्रेरकोविष्णुःलिं
गैःयुतोहि । लिंगशब्दोत्रश्रुतेरप्युपलक्षकः । मध्येवामनमितिविष्णौप्रसिद्धवामनश्रुत्या ईशानोभूतभव्यस्येत्युक्तासंकुचितभूत
भव्येशितृत्वविश्वदेवोपास्यत्व विमुच्यतइतिश्रुतमोचकत्व इतरेणतुजीवंतीत्यादिनोक्तमुख्यप्राणादिसर्वजीवनदत्वादिलिंगैश्च
युतत्वात्तेषांवैष्णवत्वप्रसिद्धेरित्यर्थः । सूत्रेशब्दादेवेत्युक्तावपिलिंगानामप्युक्तिःशब्दादेवेत्युपलक्षणमितिसूचनाय । व्यक्तमे
तत्कंपनादित्यत्रटीकायां । सुखविशिष्टाभिधानादेवेत्यत्रेव शब्दादेवकिमुलिंगैरितिसूचनाद्वा अंगुष्ठमात्रत्वंतु शास्त्रस्यमनुष्या
धिकारिकत्वेनतत्तदंगुष्ठमितहृदयस्थस्योपचारेणयुक्तमितिभावः । एकोजनार्दनइत्येकस्यैवमोचकत्वसूचनाद्विश्वदेवोपास्यत्व
मन्यस्यनमुख्यमितिसूचितं । अत्रेशानपदस्यविष्णवर्थत्वेवक्तव्ये ऊर्ध्वंप्राणमितिवाक्योक्तलिंगस्यवैष्णवत्वोक्तिः पूर्वपक्षमूल
भंजनायवा ईशानपदप्रवृत्तिनिमित्तंईशान्मुख्यप्राणादीनपिअनितिप्रेरयतीतीशानपदस्ययोगवृत्यावैष्णवत्वंसूचयितुंवेति ।
अतएवपूर्वपक्षलिंगस्यसावकाशत्वादेवाक्षिप्तमपिविश्वदेवोपास्यत्वादिलिंगंसिद्धांतसाधकमेव । व्यक्तमेतदपिकंपनादित्यत्र
टीकायां । यद्वा । ईशंप्राणमुन्नयतीतिव्युत्पत्त्यायौगिकेशानपदार्थस्यैवायंनिर्देशः । समासःप्राग्वत् ॥ ७ ॥ ननुविश्वेदेवाउ
पासतइत्ययुक्तं । देवानांतत्पदविशिष्टानांआद्यंतवत्त्वेपूर्वंपश्चाच्चदेवताऽभावेनतदुद्देशेनहविषःत्यागायोगेनकर्मविरोधापत्त्या

SGDF
Sri Gargeshwari Digital Foundation

इंद्रागच्छेत्याद्यनादिनित्यवेदस्यपूर्वोत्तरंवाच्यहीनत्वेनाप्रामाण्यापत्त्याचानादिनित्यत्वेवाच्ये ताद्दशानांमोक्षेअर्थित्वाभावे नतद्धेतुभगवदुपासनायामनधिकारादित्यतःप्राप्तं तदुपर्यपिबादरायण इत्यादिसूत्राष्टकं। तदर्थः। दैवतैरपि ज्ञेयइति। अस्यनयस्यसाक्षादसमन्वयपरत्वेनप्रासंगिकत्वादेकोजनार्दनइत्येवान्वेति। एवमग्रेपि। वेदैरितीहाप्याकृष्यते। बहुवचन माद्यर्थे। षण्णांचसप्तानांचोद्गातृणांचमसभक्षइत्यादाविव। यद्वा वेदाइत्येवशब्दिताइतिनविलक्षणत्वनयभाष्योक्तस्मृत्या वेदशब्दस्यैववेदादीत्यर्थः। एकोजनार्दनोदैवतैरपिकर्तृभिःवेदैःवेदादिभिःकरणैःज्ञेयः। नकेवलंमनुष्यैरित्यपेरर्थः। तेनदे वानांमनुष्यतादशायामिवदेवतादशायामपीतिसूचनात्। योग्यमनुष्याणांविद्याकर्मभ्यांदेवत्वप्राप्त्यादेवानामाद्यंतवत्त्वेना तिशयितफलेमोक्षेर्थित्वसंभवात् सामर्थ्यविशिष्टबुद्ध्यादेर्देवत्वादेवसिद्धेर्निषेधाभावाच्चाधिकारप्रयोजकस्यानिषिद्धत्वेसतिवि शिष्टबुद्ध्यादिमत्त्वस्यसत्त्वेनाधिकारावश्यंभावादितिभावः। नचैवंदेवतानामाद्यंतवत्त्वेकर्मणिशब्देचविरोधः। दैवतैरितिबहुव चनेनदेवतानांबहुत्वसूचनात्। पूर्वोत्तरकालयोरिदानींतनेंद्रादिदेवताऽभावेपि तदन्यदेवतासत्त्वेनतदुद्देशेनकर्मानुष्ठानस्य तत्प्रतिपादकानादिनित्यशब्दप्रामाण्यस्यचोपपत्तेरितिभावः। नचतेषांबहुत्वेपिनानानामरूपादिमत्त्वेनैकरूपवेदप्रामाण्यवि रोधइत्यतोपिदैवतैरिति। देवतानांसंबंधिभिर्दैवतैरित्यर्थः। एकैववामहानात्मादेवतेत्यनुक्रमणिकादौप्रतिपाद्यदेवतापदप्र योगस्यप्रसिद्धेः। यादेवताइदानींइंद्रआगच्छेत्यादिभिःप्रतिपाद्यतेतत्संबंधिभिःतज्जातीयैस्तत्समाननामरूपधर्मकर्मवद्भिरने कैःपूर्वोत्तरकालीनैर्दैवतैर्ज्ञेयइत्यर्थः। नचप्रलयेदेवताभावादप्रामाण्यंवेदस्येत्यतोपि दैवतैर्देवतानामिंद्रादीनांसंबंधिभिस्तत्प्र

SGDF
Sri Gargeshwari Digital Foundation

तिपादकैरपिवेदैरेकोजनार्दनोऽनादिनित्योज्ञेयः । प्रतिपाद्यइत्यर्थः । सृजतोहितेश्रुतयोनुवर्ततेनैवासृजतःकंविदधतेकंवानि षेधंतिस्तुतिमात्राएवतेस्युरिति लयस्यत्वष्टमोभागःसृष्टिकालउदाहृतः । तत्रैववेदसंचारोह्यन्यदास्तुतिमात्रकाइतिश्रुतिगी तातात्पर्योक्तश्रुत्यादेः । तदाभगवन्मात्रविषयत्वोपपत्तेरितिभावः । ननुमोक्षेतरफलार्थब्रह्मकर्मविद्याफलानांवसुत्वादीनांतैरा प्तत्वान्नतास्वधिकारः । नापिमोक्षार्थासु । तेषांसार्वज्ञेनमुक्तिहेतुविद्यासाध्यज्ञानस्यप्रागेवसिद्धत्वादित्यतोपि दैवतैरपी ति । प्राप्तवसुत्वादिफलैरपिदैवतैर्वस्वादिदेवैर्वेदैः । कार्त्स्न्यैबहुवचनार्थः । मोक्षार्थैर्मोक्षेतरफलार्थैःकर्मब्रह्मविद्यारूपैरशेषै र्वेदैर्ज्ञेयइत्यर्थः । मोक्षरूपफलसाधनज्ञानेतिशयसत्त्वात् । तथादैवतैस्तंत्रं । सास्यदेवतेत्यादौसंप्रदानेदेवतापदप्रयोगाद्देवता संबंधीनिदेवतोद्देशेनक्रियमाणानियज्ञाकर्माणितैर्दैवतैर्यज्ञादिकर्मभिर्जनार्दनः संसारमोचकोज्ञेयआराध्यइत्यर्थः । तथाच दैवतानांमुख्यसार्वज्ञाभावेनमुक्तिहेतुज्ञानेतिशयसत्त्वेनमोक्षार्थासु ज्ञानमात्रसाध्यमोक्षगतातिशयसत्वेनचमोक्षेतरासुकर्मवि द्यास्वधिकारोस्त्वितिभावः । अंगावबद्धास्त्वितिवक्ष्यमाणदिशान्येषांज्ञेयत्वेप्येकोजनार्दनोज्ञेयइत्युक्तिः तमेवैकंजानथआ त्मानमन्यावाचोविमुंचथअमृतस्यैषसेतुरित्युक्तदिशास्वस्वयोग्यविमुक्त्यैप्राधान्येनसएकोभवबंधमोचकत्वाज्ज्ञेयइतिसूचयि तुं ॥ ८ ॥ ननुदैवतैरपीत्यपिशब्देननकेवलंमनुष्यैर्ज्ञेयइतिसमुच्चितं तदयुक्तं । तथात्वेस्त्रीशूद्रब्रह्मबंधुप्रभृतीनां द्विजातिवन्म नुष्यत्वाविशेषात्तैरपिवेदैर्ज्ञेयोजनार्दनःस्यात् । नचादर्शनविरोधः । अहहारेत्वाशूद्रगोभिःसहतवैवास्त्वितिछांदोग्येचतुर्थेसंव र्गविद्यायांशूद्रस्य एतद्वैतदक्षरंगार्गि एतस्यवाक्षरस्यप्रशासनेगार्गीत्यादिवाजसनेयेअक्षरविद्यायांस्त्रियश्च अधिकारदर्शनात् ।

नचतदिष्टं । अवैष्णवस्यवेदेपिह्यधिकारोनविद्यते । नचवर्णावरस्यापीत्यादिविरोधादित्यतःप्राप्तं शुगस्यतदनादरश्रव णादि त्यादिसूत्रपंचकं । तदर्थो ज्ञेयोनवेदैःशूद्राद्यैरिति । शूद्राद्यैर्वर्णावरादिभिःकर्तृभिर्वेदैःकरणैर्जनार्दनोज्ञेयोन भवतीत्यर्थः । तेषांवेदाभावादितिभावः । शूद्रेत्युक्त्यानसंस्कारोनव्रतानिशूद्रस्येतिश्रुतौशूद्रस्यउपनयनसंस्काराभावोक्तेः अध्ययनस्याष्टवर्षंब्राह्मणमुपनयीततमध्यापयीतेत्युपनीतमात्रकर्तृकत्वावगमात् शूद्रस्याप्युपनयनमुपेत्याध्ययनोक्तावध्ययने जिह्वाच्छेदः शूद्रस्यतथैवाध्ययनंकुतः इत्यादिश्रुतिस्मृतिनिषेधादितिसूचितं । श्रुतौ अहहारेत्वाशूद्रेतिपौत्रायणंप्रतिरै क्वमुनिनासंबोधनकरणंतु हंसकृतानादरश्रवणजातयाशुचामुनिंप्रतितत्वजिज्ञासयाआद्रवणरूपयोगेनयुक्तं । शुग्द्रेतिवाच्ये शोकाधिक्येनाद्रवणाद्धेतोस्तद्धार्दंजानतासर्वज्ञेनमुनिनाशूद्रेतिक्षत्रियस्यैवपौत्रायणस्यसंबोधनंकृतं । राजापौत्रायणःशो काच्छूद्रेतिमुनिनोदितइत्यादेरितिभावः । वेदैर्ज्ञेयोनेतिशूद्रेवेदाभावोक्त्यायत्रवेदोरथस्तत्रेतिस्मृत्यारथस्यवेदव्याप्तत्वात् । तथाशूद्रेवेदाभावेनरथाभावादश्वतरीरथइतिवाक्यशेषोक्तस्वाभाविकरथसंबंधित्वेनतस्यक्षत्रियत्वावगमादितिसूचितं । गा र्गिप्रभृत्युत्तमस्त्रीणांतुनिषेधश्रुत्यादौशूद्रपदस्येवस्त्रीपदाभावेनतासांनिषेधाभावात् । उपनयनप्रतिनिधिप्रदानाख्यसंस्कार भावाच्चननिषेधइत्यपिशूद्रपदोक्त्यैवसूचितं । तर्हियोग्यानांसच्छूद्रादीनामनुत्तमस्त्रीणांचमुक्त्यभावःस्यात् । विष्णुज्ञाना भावात् । नचेष्टापत्तिः । मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः । स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिमित्यादिवि रोधादित्यतोपि ज्ञेयोनवेदैरित्यादि । नसमासोयं । विभाषानुवृत्त्यानलोपस्यविकल्पितत्वान्नञ्समासोवा । नवेदैरवेदै

SGDF
Sri Gargeshwari Digital Foundation

वेंदादन्यैरितिहासपुराणादिभिः । शूद्राद्यैःजनार्दनःसंसारार्दनोभगवानेकोज्ञेयइत्यर्थः । शूद्राद्यैरित्युक्त्या स्त्रीशूद्रब्रह्मबंधूनांत्रयीनश्रुतिगोचरा । इत्यारभ्य इतिभारतमाख्यानंकृपयामुनिनाकृतमित्यादिना भागवते यइदंशृणुयान्नित्यमित्यारभ्य शूद्रःसुखमवाप्नुयादित्यादिनासहस्रनामसु स्त्रीशूद्रब्रह्मबंधूनांतंत्रज्ञानेधिकारितेत्यादिना तेषामपिमुक्तिहेतुज्ञानजनकेवेदादन्यत्राधिकारसत्त्वंसूचयति ॥९॥ ननुदैवतैरपिमोक्षार्थंज्ञेयोजनार्दनइत्ययुक्तं । यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतं । महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंतीतिकाठकेवज्रज्ञानादेवमोक्षोक्तेः । वज्रस्यचेंद्रायुधेनिरूढवज्रश्रुत्यातेनेंद्रोवज्रमुदयच्छदित्यादौआयुधेप्रसिद्धोद्यतत्वलिंगेनचेंद्रायुधत्वादित्यतःप्राप्तं कंपनादिति । तदर्थः कंपकइति । उपलक्षणमेतत् । पूर्ववदनुषंगः । यदिदंसर्वंप्राणेस्थितं प्राणादेजतिच । एजृकंपनइतिधातोरेजतीत्याद्युक्तकंपकादिर्जगच्चेष्टकादिर्जनार्दनः । तस्माल्लोकप्रसिद्ध्याविष्णुलिंगेनचतदन्यत्रचवाचकैर्वज्रोद्यतमहद्भयप्राणादिसर्वशब्दैरेकोजनार्दनएवमुख्यतोवर्जनाद्वज्रमित्यादियोगरूढिभ्यांवाच्यः । नत्विंद्रायुधं । कुतः । कंपकोविष्णुःलिंगैःसर्वैर्युतोहि । कंपकत्वतदुपलक्षितमुक्तिहेतुत्वेदनत्व तदेवशुक्रंतद्ब्रह्मतदेवामृतमितिपूर्ववाक्योक्तामृतत्वब्रह्मश्रुति भयादस्याग्निस्तपतीत्याद्युत्तरवाक्योक्ताग्न्यादिभयंकरत्वादिलिंगैर्युतत्वस्यविष्णौश्रुत्यादिसिद्धत्वादित्यर्थः । अत्रजनार्दनइत्यत्रजनेत्यनादित्वोक्त्यापूर्वार्धोक्तसर्वजनकत्वादि अर्दनेत्यंशेचयएतद्विदुरित्युक्तमुक्तिहेतुत्वंयुक्तंतस्मिन्निितिसूचितं । अत्रयौगिकसमन्वेयवज्रशब्दार्थेवर्जितइतिनिर्देष्टव्येकंपकइतितत्साधकलिंगोक्तिःसूत्रोपात्तत्वाद्वावज्रनाम्नोवैष्णवत्वाद्वाकंपकत्वस्यविष्णवायत्तत्वाद्वेति । सूत्रेकंपकत्वोक्तावपिलिंगैरित्यनेकलिंगोक्तिस्तस्योपल

SGDF
Sri Gargeshwari Digital Foundation

क्षणत्वसूचनाय । उक्तंचभाष्यटीकायामत्रैवनये तदविहायैवलिंगांतरस्याप्युक्तत्वादिति । तदन्यत्राप्यनुसंधेयमितिच ॥१०॥
अत्रज्योतिराकाशनयाभ्यांसमन्वेययौगिकज्योतिराकाशपदोक्तयोः ज्ञानप्रकाशरूपत्वसर्वभूतावकाशदातृत्वरूपगुणयोर्नामपा
दीयज्योतिराकाशनयार्थसंग्राहकज्योतिःखवदादिपदैर्विष्णौलब्धत्वान्नेहपुनस्तयोःसंग्रहःकृतः । यद्वाज्योतिरित्याद्यैरित्यत्र
ज्योतिर्हृदयआहितंयदित्युक्तहृदयाहितंज्योतिर्विष्णुरित्युक्तमयुक्तं । वाजसनेयेषष्ठे प्राणेषुहृद्यंतर्ज्योतिरितिश्रुतहृत्स्थज्योतिषः
ससमानःसन्नुभौलोकावनुसंचरतीत्यादिनोक्तकर्माधीनोभयलोकसंचरणादिलिंगैर्जीवत्वात्प्राक्तनमपिसएवेत्यतःप्राप्तं ज्यो
तिर्दर्शनादिति । तस्याप्यर्थः कंपकइति । पूर्ववदनुषंगः । जीवतइत्यग्रेतनंपदमिहाप्यन्वेति । ल्यब्लोपनिमित्तापंचमी ।
एकोजनार्दनोऽजन्म मोचकत्वाभ्यांस्वतंत्रोविष्णुर्जीवतो जीवमादाय । कंपकश्चेष्टकः । ससमानइतिवाक्योक्तोभयलोकसंचा
रकर्ता । नत्वस्वतंत्रोजीवः । उक्तंचन्यायविवरणे । लोकसंचरणंजीवमादायतस्यैवादुःखेनस्वातंत्र्यादिति । तत्तस्मात् । ज्ञानरू
पवृत्तिहेतुसाम्येनतदन्यत्रचवाचकैरेतत्प्रकरणस्थज्योतिःशब्दस्वयमात्मादिशब्दैर्मुख्यतोजनार्दनएववाच्यः । तथाजायमानः
शरीरमभिसंपद्यमानइत्यादिनोक्तजायमानत्वम्रियमाणत्वादिलिंगैःसर्वैरंतर्णीतणिजर्थतयायुतश्च । कुतः । कंपकोविष्णुः । वि
ष्णुरेवेदंज्योतिः । तद्देवाज्योतिषांज्योतिरित्यादिश्रुतिषुज्योतिःशब्दस्यविष्ण्वेकवाचित्वसिद्धेरिति । तथाआत्मैवास्यज्योतिः।
कतमआत्मा योयंविज्ञानमयःप्राणेष्वितिजीवस्यसुप्त्यादौज्ञानहेतुत्वरूपज्योतिष्ट्वेनोक्तात्मनोजीवस्वरूपत्वेतस्यप्रसिद्धत्वेनक
तरआत्मेतिप्रश्नायोगाद्विष्णुत्वस्यैववाच्यत्वाच्चेतिहेरर्थः । जनार्दनेत्यत्रजनेत्यजत्वोक्त्यादित्यादिज्योतिर्मात्रस्यास्तमयेनजी

SGDF
Sri Gurgeshwar's Digital Foundation

वस्यसुप्त्यादौज्ञानाहेतुत्वेपिहरेरुदयास्तमयादिशून्यस्यतदाजीवज्ञानहेतुत्वरूपज्योतिष्ट्वंयुक्तं । अर्दनेतिसंसारार्दकत्वोक्त्यादुः
खाभोगसूचकत्वेनससमानःसन्नित्युक्तसमानत्वेनैवोभयलोकसंचरणंहरेरेवयुक्तं।नतुसंसारिणोस्वतंत्रजीवस्येत्यपिसूचितं॥११॥
ननुसर्वाश्रयोजनार्दनइत्युक्तं।छांदोग्येष्टमांते आकाशोवैनाम नामरूपयोर्निर्वहिता।तेयदंतरातद्ब्रह्मतदमृतमितिवाक्येवैनामे
तिनिपातद्योतितप्रसिद्धाकाशस्यैवनामरूपनिर्वहितृपदेनसर्वाश्रयत्वोक्तेरित्यतःप्राप्तं आकाशोर्थांतरत्वादिव्यपदेशादि
ति । तदर्थो ऽन्यश्चेति । अन्यशब्दोर्थांतरशब्दितविलक्षणार्थवाची । पूर्ववदनुषंगः । तेयदंतरेतिनामरूपेअंतराविना य
द्वर्ततइति । अनामरूपतयोक्तोन्यश्चविलक्षणश्चएकोजनार्दनएव । नकेवलंकंपकादिरितिचार्थः । तत्तस्मात् । अंतरःखवदि
त्यत्रहरौलोकतोगगनेचप्रयोगात्प्रयोगसाधारण्येनतत्रान्यत्रापिवाचकतयाप्रतीतैराकाशनिर्वहिता । यदित्यादिसर्वशब्दैरेकोज
नार्दनएववाच्यः । नत्ववकाशः । कुतः । अन्योविष्णुःलिंगैर्युतोहि । अनामत्वारूपत्वोपलक्षितब्रह्मत्वामृतत्वनामरूपनिर्वहितृ
त्वलिंगैर्युतत्वस्यलोकतोप्रसिद्धत्वेपिश्रुतिषुविष्णौप्रसिद्धेरित्यर्थः । निपातद्वयमपिवैदिकप्रसिद्धिमादायविष्णौसावकाशमिति.
भावः । जनार्दनेत्यजत्वमोचकत्वयोरुक्त्यामृतत्वंब्रह्मत्वंचतस्यैवेतिसूचितं । यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्वतद्ब्रह्मे
त्यादेः । अत्रसमन्वेययौगिकाकाशशब्दार्थेवाच्येप्यर्थांतरत्वरूपलिंगविशेषोक्तिःप्रागुक्ताशया ॥ १२ ॥ नन्वथापिसोक्षरोह
रिरित्ययुक्तं । तद्धर्मस्यासंगमरसमित्युक्तासंगत्वस्य द्रवतिस्वप्नायैव सयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवतीतिवाजसनेयेष ॥ २२ ॥
ष्ठेध्यायेस्वप्नादिद्रष्टुर्जीवस्योक्तेः । सवाएषसंप्रसादोरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचेत्यादिजीवलिंगबाहुल्यात् । स्वप्नद्रष्टृत्व

स्यजीवेप्रसिद्धेश्चासंगत्वादिब्रह्मलिंगानांतदभिन्नजीवचैतन्येसंभवादित्यतःप्राप्तं सुषुप्त्युत्क्रांत्योर्भेदेनेति । तदर्थोऽन्य
श्चजीवतइति । पूर्ववदनुषंगः । प्राज्ञेनात्मनासंपरिष्वक्तः प्राज्ञेनात्मनान्वारूढ इतिसुषुप्त्युत्क्रांतिप्रकरणयोःश्रुतोजीवादन्य
श्चैकोजनार्दनः । तत्तस्मादसंगत्वलोकप्रसिद्धिभ्यांतदन्यत्रचवाचकत्वेनप्रतीतैःद्रवति संपश्यति अनन्वागतो संगोह्ययंपुरुष
इत्यादिसर्वशब्दैर्मुख्यतोनुपचारेणैकोजनार्दनएववाच्यः । नजीवः । कुतोन्योविष्णुः लिंगैर्युतोहि । अनन्वागतस्तेनेत्युक्तस्व
प्नदर्शनकृतविकारराहित्यरूपासंगत्वानन्वागतं पुण्येनेत्याद्युक्तपुण्यपापालेपादिरूपलिंगैरेतत्प्रकरणस्थैर्युतत्वात्तेषांवैष्णवत्वप्र
सिद्धेरित्यर्थः । स्वाप्नपदार्थानांसत्यत्वेनसर्वज्ञत्वाच्चेशस्यपश्यतीत्यादिशब्दमुख्यार्थत्वंचबोध्यं । तत्रकिंचित्पश्यतीत्युक्तसम
न्वयस्वप्नद्रष्टृनिर्देशेकार्येऽन्यश्चेत्याद्युक्तिःसूत्रानुसारात्तथाचात्रैवप्रकरणेहरेर्जीवाद्भेदोक्तिः नाभेदमाश्रित्यलिंगान्यमुख्यतो
नेयानीतितद्बलाद्द्रवतीत्यादिशब्दमुख्यार्थोहरिरेवेतिभावः । जनार्दनइतिसंसारार्दकत्वोक्त्यासंपरिष्वक्तइतिसुप्तिप्रकरणस्य
मुक्तपरत्वस्यापिस्वाप्ययसंपत्त्योरितिसूत्रसिद्धत्वात्संपरिष्वक्तःसुप्तइतिवन्मुक्तइत्यपिलाभेनभेदस्यापिमुक्तावपिसत्त्वान्नव्या
वहारिकोभेदः । किंतुसत्यएवेतिसूचितं ॥ १३ ॥ नन्वथापिसर्वकर्तापूर्णानंदइत्यादावनन्यापेक्षसर्वकर्तृत्वादिगुणोक्त्या
यन्नित्यमहिमत्वंविष्णोरभिमतंतदयुक्तं । तस्यकाण्वश्रुतौषष्ठे एषनित्योमहिमाब्राह्मणस्येति सवाएषमहानजआत्मेति अजश
ब्दाद्धिरण्यगर्भेरूढब्राह्मणपदसहकृताच्चतुर्मुखस्यप्रतीतेर्नित्यमहिमत्वादिविष्णुलिंगस्यचतदभेदेनविरिंचेप्युपपत्तेरित्यतःप्रा
प्तं पत्यादिशब्देभ्यइति । तदर्थः पतित्वादिगुणैर्युक्तइति । पूर्ववदनुषंगः । सर्वस्यवशीसर्वस्येशानःसर्वस्याधिपति

SGDF Sri Gargeshwari Digital Foundation

रेषसर्वेश्वरइत्यादिनोक्तसर्वाधिपतित्वादिगुणैर्युक्तएकोजनार्दनः । तत्तस्मात्प्रसिद्ध्यानित्यमहिमत्वविष्णुलिंगेन(तत्रतदन्यत्र
चवा)चोभयवाचकत्वेनप्रतीतैर्ब्राह्मणाजमहदात्मादिसर्वशब्दैरेकोजनार्दनएवमुख्यतोब्रह्मणावेदेनाण्यतेज्ञायतइत्यादियोगवृ
त्त्यावाच्योनविरिंचः । कुतः । पतित्वादिगुणयुक्तोविष्णुःसर्वैर्लिंगैर्युतोहि । सर्ववशित्वसर्वेशानत्वादिलिंगयुतत्वस्येशानइत्या
दिभाष्योक्तश्रुतिभिःविष्णौप्रसिद्धेरित्यर्थः । अत्रजनेत्यजत्वोक्त्याजशब्दस्यहरौयौगिकत्वमर्दनेतिसंसारमोचकत्वोक्त्याब्रा
ह्मणपदस्यवेदगम्यत्वरूपयौगिकत्वंचसूचितं । मोचकस्यैववेदगम्यत्वात्तमेवंविद्वानित्यादेर्ब्रह्माणइतिदीर्घव्यत्ययस्याधिक्या
र्थत्वाद्ब्राह्मणाजश्रुत्योःसावकाशत्वात् । निर्बीजोऽभेदोनाशंक्यइतिभावः । वशित्वादिगुणैर्युक्तइतिवाच्येपतित्वादीत्युक्तिः
सूत्रानुसारात् । सूत्रंचभाष्योक्तश्रुत्यनुसारि । पादार्थमुपसंहरति । तदन्यत्रचवाचकैः । मुख्यतःसर्वशब्दैश्चवाच्यए
कोजनार्दनइति । तदिदंतंत्रं आवृत्तिर्वा । पतित्वादिगुणैर्युक्तइत्यस्ति । अत्रादिपदेनप्रागुक्तसर्वाश्रयत्वपूर्णगुणत्वादयो
जीवान्यत्वांताश्चगुणागृह्यंते । यतःपतित्वादिगुणैर्युक्तःतत्तस्मात् तत्रतदन्यत्रचवाचकैःसर्वशब्दैश्चनामलिंगोभयात्मकैःकेव
लमन्यत्रप्रसिद्धैरितिचार्थः । मुख्यतोमुख्ययावृत्त्याएकोजनार्दनोवाच्योनतुविष्णुरन्यश्चेत्यनेकेइत्यर्थः ॥ १४ ॥ इतिश्री
मद्ब्रह्मसूत्राणुभाष्यवृत्तौतत्वमंजर्यांराघवेंद्रयतिकृतायांप्रथमाध्यायस्यतृतीयःपादः ॥ १ ॥ ३ ॥
नन्वेवंत्रिपाद्या जन्मादिसूत्रोक्तसर्वकर्तृत्वतत्संगतपूर्णानंदत्वादिप्रतिपादकवाक्यस्थकतिपयशब्दवाच्यत्वोक्त्याविष्णौकति ॥ २३ ॥
पयगुणसिद्धावपिआद्यसूत्रस्थब्रह्मपदोक्तानंतगुणत्वासिद्धिरेव । देवतातारतम्यकर्मक्रमकालादिबोधकवाक्यस्थाशेषशब्दवा

SGDF
Sri Gargeshwari Digital Foundation

च्यत्वस्यानुक्त्यासमन्वयसूत्रप्रतिज्ञाताशेषशब्दसमन्वयस्याप्रतिपादनादित्यतःप्रवृत्तःचतुर्थःपादः । तदर्थंभाषते । अव्यक्त इति । इत्याद्यन्यत्रनियतेरपिमुख्यतयोदितः । शब्दैरतोनंतगुणोयच्छब्दायोगवृत्तयइत्यंतिमश्लोकोप्यत्राकृष्यते । एको जनार्दनइत्यनुषज्यते । इत्यादीतिभिन्नंपदं । क्रियाविशेषणंवा । अविभक्तिकोयंनिर्देशोवा । तृतीयार्थेप्रथमावा । इत्याद्यंत र्यम्युच्यतइत्यंतर्यामिनयपूर्वपक्षभाष्यस्थेत्यादीतिशब्दवत् । यथोक्तंतत्वप्रदीपे । इत्यादीतिप्रथमासप्तम्यर्थे । तृतीयार्थेवा। सप्तसुप्रथमेतिसूत्रात्क्रियाविशेषणंवेति । तथाचायमर्थः । अव्यक्तइत्यादिभिः अव्यक्तदुःखिबद्धावरवसंतज्योतिराकाशा दिभिर्देवतातारतम्यकर्मक्रमादिबोधकवाक्यस्थैरित्यर्थः । अन्यत्रनियतैरपि नियमेनान्यत्रवर्तमानैरपि । अन्यत्रैवप्रसिद्धैर पीतियावत् । नकेवलमन्यत्रोभयत्रप्रसिद्धैरित्यपेरर्थः । शब्दैर्मुख्यतया परममुख्यवृत्त्या एकोजनार्दनउदितः । सूत्रकृताप्र तिपादितोस्मिन्पादइत्यर्थः । अतोखिलशब्दवाच्यत्वादनंतगुणइत्यर्थः । तावताकथमनंतगुणतेत्यतउक्तं । यच्छब्दायोग वृत्तयइति । यद्यस्माच्छब्दाहरौयौगिकाअतइत्यर्थः । नन्वेवंदेवतातत्तारतम्यकर्मक्रमाद्यलौकिकसर्वपदार्थपरिलोप स्तेषां शब्दैकवेद्यत्वादित्यतोपि मुख्यतयाऽन्यत्रनियतैरपीति । निगमनिघंट्वादिलोकप्रसिद्धयोगरूढिरूपमुख्यवृत्त्याऽन्य वाचकैरपिशब्दैस्तदबाधेनमहायोगविद्धरूढिरूपपरममुख्यवृत्त्योदितइति । ननुसमन्वयसूत्रोक्तंसर्वशब्दवाच्यत्वंविष्णोरयुक्तं काठकेइंद्रियेभ्यइत्यादिना महतःपरमव्यक्तमित्यव्यक्तांतदेवतातारतम्यमुक्त्वाऽव्यक्तात्पुरुषःपरइतिपुरुषोत्कर्षावधित्वेनश्रु ताव्यक्तशब्दस्यप्रसिद्धयामहत्तत्वपरत्वपुरुषोत्कर्षावधित्वादिलिंगेनचप्रधानवाचित्वादित्यतःप्राप्तं आनुमानिकमपीत्या

SGDF
Sri Gargeshwari Digital Foundation

दि सूत्रनवकं। तदर्थोऽव्यक्तइति। एकोजनार्दनइति। अन्यत्रनियतैरपिमुख्यतयोदितःशब्दैरितिच। अत्रोत्तरत्रचान्वेति। अव्यक्तइत्युपलक्षणं। श्रीवाचितयाप्राधान्यादस्योक्तिः। व्यक्तोनभवतीत्यव्यक्तः। अव्यक्तात्पुरुषःपरइत्यादौ अव्यक्तजीवादिपदप्रवृत्तिनिमित्तयुक्तोऽव्यक्तप्राणधारकादिःमुख्यतयाएकोजनार्दनः। तथाचावरत्वदुःखित्वादिलिंगवशादन्यत्रनियतैरव्यक्तजीवबद्धादिशब्दैर्मुख्यतया परममुख्यवृत्त्या एकोजनार्दनःउदितःनतुप्रधानादिः। अव्यक्तादिशब्दप्रवृत्तिनिमित्तस्यविष्णौसत्त्वेतच्छब्दैरुदितत्वस्यावश्यकत्वादितिभावः। अव्यक्तादिशब्दार्थाव्यक्तत्वादिकंकुतोजनार्दनस्येत्यतः शब्दैरिति। यत्तत्सूक्ष्मंपरमंवेदितव्यं एषोणुरात्मा सजीवनामाभगवान्प्राणधारणहेतुतइत्यादिशब्दैरित्यर्थः। सूक्ष्मस्यैवाव्यक्तत्वार्हत्वादितिभावः। ननुप्रधानादौरूढाव्यक्तादिशब्दैर्योगमात्रेणकथंमुख्यतयोदितइत्यतोपि शब्दैरिति। अव्यक्तमचलं शांतं अव्यक्तोक्षरउच्यते अनेनजीवेनात्मना जीवोविनयितासाक्षी नामानिसर्वाणियमाविशंतीत्यादिविष्णावव्यक्तादिपदप्रयोगबाहुल्यरूपरूढिप्रदर्शकैःश्रुतिस्मृतिरूपसर्वशब्दवाच्यत्वबोधकशब्दैः तथातमेवैकंजानथेत्यादिभिःविष्णोरेवमोक्षार्थज्ञेयत्वबोधकशब्दैरित्यर्थः। प्रधानादौप्रसिद्धैरव्यक्तादिशब्दैर्महच्छब्दचमसशब्दयोरन्यत्रप्रसिद्धयोरपि महांतंविभुमित्यादौविष्णुशिरसोर्मुख्यत्वाद्धरौमुख्यतयोदितत्वंयुक्तमितिभावः। नन्वेवमनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यतइतिवाक्येमहत्परत्वलिंगेनप्रधानस्यापिमुक्त्यर्थज्ञेयत्वोक्तेः तस्यापिवैदिकाव्यक्तादिशब्दैःपरममुख्ययोदितत्वंस्यादित्यतोपि शब्दैरिति। महतोमहीयान् अनाद्यनंतंमहतःपरंध्रुवमिति परोहिदेवःपुरुहूतोमहत्तमइत्यादिविष्णोरेवमहत्परत्वबोधक ॥ २४ ॥

शब्दैस्तथातद्विष्णोःपरमंपदमित्येतत्प्रकरणार्थोपासकस्यविष्णुपदप्राप्तिबोधकशब्देन पितृसौमनस्य स्वर्ग्याग्नि परमात्म रूपत्रितयमात्रविषयप्रश्नोत्तररूपशब्दैस्तद्वाक्येजनार्दनः प्रागुक्तनिरुक्त्याऽनादिःसंसारार्दनोभगवान्मुख्यतयोदितोनप्रधानमित्यर्थः। कथंतर्हि अवरत्वदुःखित्वाद्यर्थकपंचम्यादिशब्दोदितत्वोपपत्तिःसर्वेशेनिर्दोषेहरावित्यतोपि शब्दैरिति। यदधीनोगुणोयस्यतद्गुणीसोभिधीयते। सबद्धःसदुःखीसबंधयतिसदुःखयतीत्यादिशब्दैःस्वातंत्र्यादिनानिमित्तेनतत्तच्छब्दवाच्यत्वबोधकैःशब्दैरित्यर्थः। विष्णाववरत्वाद्यभावेपिअन्यगतावरत्वादिकंप्रतिस्वातंत्र्याज्जयीतिशब्देनराजेवपंचम्यादिशब्दैरुदितइतिभावः॥ १॥ नन्वथापिनविष्णोःसर्वशब्दवाच्यत्वं। वसंतेवसंतेज्योतिषायजेतेत्यादौकालकर्मक्रमाधिकारिफलादिवाचकशब्दानांविष्णुवाचित्वायोगादित्यतःप्राप्तं ज्योतिरुपक्रमादि त्यादिसूत्रद्वयं। तदर्थः कर्मवाच्यैश्चवाच्यइति। पूर्ववदनुषंगः। प्राधान्यादुक्तवक्ष्यमाणसर्वशब्दानामुपलक्षणत्वेनकर्मोक्तिः। कर्मवाच्यंयेषांतैःकर्मवाच्यैश्च नकेवलंतरतमभावापन्नार्थवाचकैरितिचार्थः। कर्म तदंग तत्क्रम देश काला धिकार्यादिवाचकैरन्यत्रनियतैरपिशब्दैर्मुख्यतया परममुख्यवृत्त्या एकोजनार्दनोवाच्यो नकर्मादिः। कुतः। शब्दैः। तावाएताःसर्वाऋचःसर्वेवेदाः नामानिसर्वाणियमाविशंति तमेवैकंजानथ सर्वेवेदायत्पदमामनंतीत्यादिसर्वशब्दवाच्यत्वावेदकश्रुत्यादिरूपशब्दैर्ज्ञायतइत्यर्थः। अस्तुश्रुत्यादिबलात्सर्वशब्दोदितत्वं। मुख्यवृत्त्येतितुकुतइत्यतोपि शब्दैरिति। एषइमंलोकमभ्यार्चदित्यादिरूपैर्हरौमहायोगविद्रूढिप्रदर्शकैःश्रुत्यादिरूपशब्दैरित्यर्थः। एवंतर्हिकर्मादिपरिलोपः। पदेष्ववयवानामपिविष्णुवाचित्वेहरौशब्दस्ययोगानुपपत्तिश्चेत्यतोपि कर्मवा

SGDF
Sri Gangadhar Digital Foundation

च्यैश्चेति। चोप्यर्थः। निगमनिघंट्वादिप्रसिद्धयोगरूढिभ्यांमुख्यतयाकर्मवाचकैरपिज्योतिष्टोमादिशब्दैःकर्मादौलोकसिद्धमुख्यत्वमबाधित्वैवतैःशब्दैःपरममुख्यतयाहरिरुदितःइति। तथाचनकर्मादिलोपदोषः ।अवयवानामन्यवाचकत्वमुपेत्यैवशब्दस्यहरौव्युत्पत्त्यंगीकारेणनयोगासंभवदोषोपि । रूढियोगौविनाकश्चिन्नैवार्थोवेदगोभवेत्। तथापियौगिकोमुख्यःसर्वत्रास्तिसवैदिके। अनवस्थानिवृत्त्यर्थंयौगिकेरूढिकल्पनेति । रूढिमेवसमाश्रित्यविभज्यार्थान्यथाक्रमं । विदोषगुणपूर्त्यर्थंविष्णौयोगार्थमानयेत्। पश्चादेवयथायोगमितरेष्वपिसन्नयेदित्युक्तेरितिभावः। अतएवज्योतिरादिभिरित्यनुक्त्वाकर्मवाच्यैश्चेत्येवंनिर्देशः।कर्मवाक्यैश्चेत्येवंपाठेपिअयमेवार्थोध्येयः। अत्रमुख्यतयेतिमुख्यतातात्पर्यविषयत्वमात्रं वाच्यत्वस्यपृथगुक्तेः । अन्यत्रतूभयमपि ॥ २ ॥ नन्वथापिनसर्वशब्दवाच्यताहरेर्युक्ता । काण्वश्रुतौषष्ठेऽध्याये यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृतमित्यादौपंचपंचेतिवीप्साया यस्मिन्नित्युक्तसर्वशरीरस्थेश्वराधारकतयाश्रुतानांपंचत्वसंख्यायुतानांप्राणस्यप्राणमुतचक्षुषश्चक्षुरित्यादिवाक्यशेषोक्तद्वितीयांतप्राणादिशब्दितानांजनानां आधाराधेयभावविरोधेनैकस्यपंचत्वरूपबहुत्वसंख्याविरोधेनचाविष्णुत्वेनजनादिशब्दवाच्यत्वायोगादित्यतःप्राप्तं नसंख्योपसंग्रहादपीत्यादिसूत्रत्रयं । तदर्थः एकोमितात्मकइति । पूर्ववदनुषंगः । एको यस्मिन्नित्येकवचनांतयत्तदादिशब्दोक्तः। पंचजनादिशब्दार्थभूतामितात्मकएकोजनार्दनः । तथाचाधाराधेयत्वादिनान्यत्रनियतैरपिपंचजनादिशब्दैर्मुख्यतयापरममुख्यत्वेनोदितः। ॥ २५ ॥

तदर्थंबहुत्वसंख्यायुक्तस्यविष्णुत्वेतच्छब्दोदितत्वावश्यंभावात् । हरेःपंचजनशब्दार्थभूतामितात्मकत्वमेवकुतइत्यतो प्यमि

SGDF Sri Gargeshwari Digital Foundation

तात्मकइति। अमितानामनेकेषांआत्मानियामकःसएवामितात्मकः। शरीरतदंतर्गताकाशप्राणादिपंचजननियामकइत्यर्थः।
एतेनप्राणस्यप्राणइत्यादिवाक्यशेषेद्वितीयांततयाप्राधान्येननिर्दिष्टानामेवपंचजनशब्दार्थत्वात् । तेषामेवचप्राणादिनियाम
कत्वरूपविष्णुलिंगेनविष्णुत्वादित्युक्तंभवति । तावतापिकथमनेकत्वंहरेरित्यतोपि अमितात्मकइति । अमितेषुअनेकेषुश
रीर तदंतस्थाकाश पंचजनेषु आत्मास्वरूपंयस्यसइत्यर्थः । नियम्यानामनेकत्वेनतन्नियामकतयातेष्वनेकरूपत्वस्यन्यायप्रा
प्तत्वादितिभावः । एवंतर्ह्येकस्यैवाधाराधेयभावविरोधइत्येतदपिअमितात्मकइत्युक्त्यैवसमाहितं । शरीरादीनामाधाराधेय
भावापन्नतयातन्नियामकेश्वररूपाणांतत्रस्थानामपितथात्वोपपत्तेरिति । ननुप्राणस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंअन्नस्या
न्नंमनसोमनइतिमाध्यंदिनश्रुतौअन्नाख्यरूपेणसहामितात्मकउक्तः । काण्वानांश्रुतौतुज्योतिषासह । तथाचकोवाऽमितात्म
कःपंचजनशब्दाभिधेयइत्यतोपि एकइत्यादि । श्रुतिद्वयोक्तोप्यमितात्मकएकइत्यर्थः । अन्नज्योतिःशब्दाभ्यांरूपपंचकप्रवि
ष्टमेकरूपमुच्यतेनतुरूपभेदइत्यर्थः । यद्वा एकोजनार्दनोमितात्मकः । अमितोनेकआत्माधिकारीजीवोयस्यसइत्यर्थः।
अन्नज्योतिषोर्भिन्नरूपत्वेप्युपासकाधिकारिभेदेनपंचकद्वयमितिभावः । ननुशरीरतत्स्थाकाशप्राणाद्यधिष्ठानभेदेनतन्नियाम
कतयातत्रास्थितविष्णोरमितात्मकत्वेरूपाणांभेदोपिस्यादित्यतोपिनस्थानतोपीतिवक्ष्यमाणन्यायस्मरणार्थंकोनिर्भेदइत्युक्तं ।
कथंनिर्भेदोप्यमितात्मकोन्यत्रलोकेऽदृष्टेरित्यतोप्य मितात्मकइति । आत्मनिचैवंविचित्राश्चहीतिवक्ष्यमाणन्यायेनापरि
मितस्वरूपसामर्थ्यइत्यर्थइत्याद्यूह्यं । अत्रामितात्मकइत्युक्त्याविरोधिसर्वबाहुल्येत्यनुभाष्योक्तदिशाचबहुत्ववाचिनःशब्दा

SGDF
Sri Gangeshwar Digital Foundation

उदाहरणं । बहुत्वमेवपूर्वपक्षयुक्तिः । सूत्रेऽतिरेकाच्चेत्याधाराधेयसमर्थनंचाभ्युच्चयेन । गुहांप्रविष्टावित्यत्रात्तेत्युक्त्याकर्मफलात्तृत्वमेवतत्रव्युत्पाद्यं । द्वित्वंचैकस्ययुज्यतइत्यनुभाष्यादौत्वभ्युच्चयत्वेनएकस्यानेकत्वव्युत्पादनं । अतोनपुनरुक्तिरिति दर्शितं ॥ ३ ॥ नन्वथापिनसर्वशब्दवाच्यताविष्णोः । आत्मनआकाशःसंभूतइतितैत्तिरीयादौश्रुतभूतोत्पत्तिप्रतिपादकवाक्यस्थाकाशादिशब्दानांकार्यत्वेसतिकारणत्वरूपावांतरकारणत्वलिंगेनाकाशादिभूतमात्रवाचकत्वादित्यतःप्राप्तं कारणत्वे नचाकाशादिषुयथाव्यपदिष्टोक्तेरिति । तदर्थो वांतरंकारणंचेति । पूर्ववदनुषंगः । संभूतवाक्येश्रुतंकार्यत्वेसतिकारणत्वरूपंयदवांतरंकारणंचतदेकोजनार्दनः । नकेवलंआत्मनइतिश्रुतंमूलकारणमितिवाप्रागुक्तसमुच्चयेवाचशब्दः । तथाचान्यत्रैवनियतैरपिउत्पत्तिमत्त्वादिलिंगेनान्यत्रैवप्रसिद्धैरप्याकाशवाय्वग्न्यादिशब्दैर्मुख्यतया परममुख्यत्वेनैकोजनार्दनउदितः । नतुआकाशादिभूतं । कुतः । शब्दैः प्रागुक्तसर्वशब्दवाच्यत्वबोधकैर्नामानिसर्वाणि तावाएताः तमेवैकंजानथेत्यादिशब्दैरित्यर्थः । विरुद्धमवांतरकारणमेकोजनार्दनः कथमित्यतोमितात्मकइत्यनुवर्त्यं । अमितेषुअनेकेषुआकाशादिष्वात्मास्वरूपंयस्यसइत्यर्थः । आकाशादिषुस्थितत्वादितियावत् । तथाचाकाशाद्युत्पत्तौआकाशाद्यंतर्गतत्वेनविष्णोरुत्पत्त्यावाय्वादिस्थरूपोत्पत्तिहेतुत्वेनवाऽवांतरकारणत्वंयुक्तमितिभावः । कथमजस्यजनिमत्त्वमित्यतोपिद्युभ्वादिनयोक्तस्मरणाय मितात्मकइति व्यवच्छिद्ययोज्यं । मितःव्यक्तःआत्मास्वरूपंयस्यसइत्यर्थः । जनेरीशेभिव्यक्तिरूपत्वस्यद्युभ्वाद्यायतनमित्यत्राभिधानादुत्पत्तिरत्राभिव्यक्तिः । नत्वभूत्वाभवनादिरूपेतिभावः। क्रियाप्रवर्तकत्वेनप्रादुर्भावोहरेर्जनिः।आकाशादिषुनान्यो

स्ति ह्यभिमानोभिमानिनःइत्यनुभाष्योक्तेः।नन्वाकाशादिषुहरेःस्थितिरेवकुतः।इत्यतोपि शब्दैरिति ।यआकाशेतिष्ठन् यो वायौतिष्ठन् इत्यादावुक्तांतर्यामिब्राह्मणोक्तैःशब्दैरित्यर्थः । ननुयआकाशेतिष्ठन्नित्यादावपिहरिरितिकुतः । इत्यतोपि शब्दैरिति । यमाकाशोनवेदयंवायुर्नवेदेत्यादिरूपैराकाशाद्यविदितत्वामृतत्वाद्यंतर्यामिनयोक्तधर्मबोधकैःशब्दैःयआकाशेतिष्ठन्नित्यादावुक्तोहरिरेवेत्यर्थः।ननुयमाकाशोनवेदेत्यादिशब्दैरपिकुतोहरिरित्यतोपि शब्दैरिति। सयोतोश्रुतइत्यादिरूपैर्हरेरविदितत्वादिधर्मबोधकैः । तेषांशब्दानांवैष्णवत्वादित्यर्थः । अत्रसमाकर्षादित्यादिसूत्राष्टकस्यतत्वप्रदीपन्यायरत्नावलीन्यायचंद्रिकासंबंधदीपिकादिप्राचीनग्रंथोक्तरीत्याकारणत्वेनेत्यधिकरणशेषत्वात्पृथक्तदर्थोनसंगृहीतः। यद्वोक्तवक्ष्यमाणसर्वशब्दानांपदवर्णादिरूपेणविष्णुवाचित्वोक्तिपरंज्योतिर्नयार्थसंग्रहेणैवसमाकर्षादितिनयार्थोपिसंगृहीतः । तथाहि । यदुक्तं ज्योतिर्नयेसर्वशब्दानांविष्णौमुख्यत्वमिवान्यत्रापिमुख्यत्वान्नकर्मादिलोपोविष्णौशब्दानांव्युत्पत्त्ययोगोवानेति । तदयुक्तं । तथात्वेअक्षादिशब्दवदनेकेषुमुख्यतापत्त्या मुख्यतयासर्वशब्दैर्विष्णुरेवोच्यतइतितत्तुसमन्वयादितिसमन्वयसूत्रोक्तावधारणायोगइत्यादिचोद्यनिरासायप्राप्तं ॥ ४ ॥ समाकर्षादिति सूत्राष्टकं । तस्याप्यर्थः । कर्मवाच्यैश्चवाक्यइति । पूर्ववदनुषंगः । कर्मादिवाचकैर्मुख्यतयान्यत्रनियतैरुक्तवक्ष्यमाणसर्वशब्दैरेकोजनार्दनोमुख्यतयापरममुख्यतयावाच्यइत्यर्थः । अमुख्यवृत्तौगौणी लक्षणेति भेदवन्मुख्यवृत्तावपिमुख्यत्वं परममुख्यत्वमिति द्वैविध्यसत्त्वादितिभावः। नचतत्रमानाभावःशब्दैः परस्यवाचकाश्शब्दाःसमाकृष्येतरेष्वपीतिवृत्तितारतम्यबोधकशब्दैः परममुख्यत्वमुख्यत्वयोर्हरौतदन्यत्रचावगमादित्य

SDF
Sri Gurgeshwari Digital Foundation

र्थः।प्राक्प्रतिनयंपरममुख्यतयेत्यादिव्याख्यानमस्माभिरेतदभिप्रायेणैवकृतं। नन्वीशेपरममुख्यत्वेऽन्यत्रसिद्धिर्नस्यादित्यतोऽन्यत्रैवनियतैरन्यत्रैवव्यवह्रियमाणैरतएवान्यत्रनियतैरन्यत्रैवव्युत्पन्नैरपिशब्दैर्वाच्यइति लोकस्यजगत्येवनैयत्येनशब्दव्यवहारेण। तत्रैवतच्छ्रोतृणांव्युत्पत्तेर्नैयत्यादीशेतथाबहुलव्यवहाराभावेनव्युत्पत्त्यभावाच्चान्यत्रप्रसिद्धेरज्ञानमूलत्वोपपत्तेरितिभावः।नन्वस्ययदेकांशाखांजीवोजहातीति।वायुनावैगौतमसूत्रेणेतिजीववाय्वोरपिस्वातंत्र्यप्रतीतेः।तयोरपिसर्वशब्दवाच्यत्वंस्यादित्यतो ऽप्यन्यत्रनियतैरपीति ।अन्यत्रनियतैरपि अन्यत्रवाचकैरपि।शब्दैः जीववाय्वादिशब्दैरेकोजनार्दनोमुख्यतयावाच्यइत्यर्थः। जीवादिशब्दैस्तत्तदंतर्यामिणोगृहीतत्वेनतत्रप्रतीतस्वातंत्र्यस्यापितदंतर्यामिगतत्वेनपादांत्यप्राणनयेऽभिधानादितिभावः।ननुमुख्यतयान्यत्रनियतैरन्यत्रवाचकैरपिशब्दैःपरममुख्यतयाहरिर्वाच्यइत्ययुक्तं ।मुमुक्षुंप्रतिकर्मदेवताद्युक्तौफलाभावान्मुक्तेर्ब्रह्मज्ञानादेवसिद्धेस्तस्यचपदसमन्वयादिनैवसिद्धेरित्यतो ऽप्यन्यत्रनियतैरिति । कर्मदेवतावाचित्वेनस्थितैरपिशब्दैरंततोमुख्यतोमहातात्पर्येणोदितइत्यर्थः।कर्मदेवतावाचित्वेनस्थितानांवाक्यानामंततोब्रह्मपरत्वमित्येवंरूपवाक्यान्वयाभावेमंदानांप्रतिपदान्वयायोग्यतयातत्रवैमुख्येनब्रह्मज्ञानाद्यभावःस्यादितिभावइत्याद्यूह्यं॥५॥नन्वथापिनहरेःसर्वशब्दवाच्यता परमपुरुषेस्त्रीत्वाभावेनसर्वस्त्रीशिरोमणिलक्ष्मीवाचिप्रकृत्यादिस्त्रीशब्दवाच्यत्वाभावात्। नचखट्वादिशब्दवदुपपत्तिः। समन्वयस्यगुणपूर्त्यर्थत्वेनार्थसाधुत्वस्यैववाच्यत्वात् । तदधीनत्वन्यायाश्रयणेपिस्वातंत्र्यस्यैवसिध्यास्त्रीशब्दप्रवृत्तिनिमित्तरूपगुणासिद्धेः।नामानिसर्वाणीत्यस्यसंकोचसंभवाच्चेत्यतःप्राप्तं प्रकृतिश्चेति सूत्रपंचकं। तदर्थः प्रकृतिरिति।पूर्ववदनु

SGDF Sri Gargeshwari Digital Foundation

षंगः। प्रकृतिःप्रकृष्टाकृतिर्यस्येतिप्रकृतिशब्दोक्तःप्रकृष्टकृतिमानेकोजनार्दनः। तथास्त्रीलिंगेनान्यत्रनियतैरन्यत्रैवप्रसिद्धैःसैषा प्रकृतिरित्यादौश्रुतप्रकृतितदुपलक्षितस्त्रीलिंगशब्दैरेकोजनार्दनोमुख्यतयापरममुख्यवृत्योदितोनतुलक्ष्म्यादिः।कुतः। शब्दैः हंतैतमेवसर्वाणिनामान्यभिवदंतीत्यादिप्रतिज्ञादृष्टांताभ्यांसर्वशब्दवाच्यत्वोपपादकप्रभृतिभिर्नामानिसर्वाणीत्यादिभिःप्रागु क्तैश्चशब्दैरित्यर्थः। तथाहरेःप्रकृतिशब्दवाच्येच्छास्वरूपत्वावेदकैःप्रकृतिर्वासनेत्येवतवेच्छानंतकथ्यतइति। सोभिध्यासजूति रित्यादिशब्दैस्तथाएषस्त्र्येषपुरुषइत्यादिभिःसाक्षात्स्त्रीपुरुषशब्दवाच्यत्वावेदकैःशब्दैर्मुख्यतयोदितत्वंज्ञायतइत्यर्थः। निमि त्ताभावइत्यतोपि शब्दैरिति। अथहैषआत्माप्रकृतिमनुप्रविश्यात्मानंबहुधाचकार। तस्मात्प्रकृतिरित्यादिप्रकृतिशब्दप्रवृत्ति निमित्तप्रकृष्टकृतिमत्त्वावेदकैः। तथायद्भूतयोनिमिति सूतिरव्यवधानेनेत्यादिभिःस्त्रीलिंगशब्दमात्रप्रवृत्तिनिमित्तभूताव्यव धानेनप्रसवहेतुत्वरूपस्त्रीत्वावेदकैःश्रुतिस्मृतिरूपैःशब्दैर्हरौनिमित्तभावावगमादित्यर्थ ॥ ६॥ नन्वथापिनहरेःसर्वशब्दवाच्य ता। शून्यासत्तुच्छादिशब्दानांनिस्वरूपवाचिनांसस्वरूपेहरावयोगान्निःस्वरूपेनियमनायोगेनतदधीनत्वन्यायासंभवाच्चेत्यतः प्राप्तं। एतेनसर्वेव्याख्याताव्याख्याताइति। तदर्थः शून्यमेवच। इत्याद्यन्यत्रनियतैरपिमुख्यतयोदितः। शब्दै रिति। एवकारस्यान्यत्रैवेत्यन्वयः। चःपूर्वोक्तसमुच्चये। इत्यादीत्यविभक्तिकं।इत्यादिभिरित्यर्थः। तथाचान्यत्रैवनियतैर्निः स्वरूपवाचित्वेनान्यत्रैवप्रसिद्धैः शून्यमसदभावस्तुच्छमित्यादिभिःशब्दैः एकोजनार्दनएवमुख्यतयोदितः। नशून्यादिः। कुतः। शब्दैः। नामानिसर्वाणि तमेवैकंजानथ तावाएताःसर्वाऋचः हंतैतमेवपुरुषंसर्वाणिनामान्यभिवदंती त्यादिभिःस

SGDF
Sri Gargeshwari Digital Foundation

र्वशब्दवाच्यत्वावेदकैःशब्दैरित्यर्थः। निमित्ताभावइत्यतोपि शब्दैरिति। शमूनंकुरुतेयस्मादितिनिर्वचनपरशब्दैः।तत्प्रति स्वातंत्र्यावेदकसर्वशब्दैरित्यर्थः । पादार्थमुपसंहरति। इत्याद्यन्यत्रनियतैरपिमुख्यतयोदितः । शब्दैरिति। इत्यादीत्यनेनसमन्वितर्ततत्पादीयाव्यक्तादिकृत्स्नशब्दपरामर्शः । तथाचइत्यादिभिःअव्यक्तशब्दप्रभृतिभिरन्यत्रैवप्रसिद्धैरेकोजनार्दनोमुख्यतयोदितइति। अध्यायार्थमुपसंहरति। अतोनंतगुणोयच्छब्दायोगवृत्तयइति । अतःअन्यत्रोभयत्रान्यत्रैवचप्रसिद्धैरशेषशब्दैर्वाच्यत्वाज्जनार्दनोऽनंतगुणइति। तावताकथमनंतगुणइत्यतउक्तं। यच्छब्दाइति। यद्यस्माद्योगेनावयवार्थसंबंधेनवृत्तिर्येषांतइतियोगवृत्तयोयौगिकाःशब्दाः तस्मादित्यर्थः ॥ संक्षेपभाष्यविवृतौराघवेंद्रेणभिक्षुणा ॥ कृतायां तत्वमंजर्यांसमाप्तोध्यायआदिमः ॥ १ ॥ इतिश्रीमद्ब्रह्मसूत्रभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांप्रथमाध्यायस्यचतुर्थःपादः ॥ १ ॥ ४ ॥ इतिप्रथमाध्यायःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननुयदुक्तं अतोनंतगुणइति तदसाध्विव। तत्रयुक्त्यादिभिर्विरोधात्। ततएवहरेर्दोषित्वस्याप्यापाताच्चेति । अतःप्राप्तो द्वितीयोध्यायः। तस्यैकवाक्यत्वसिद्धयेप्रतिपाद्योक्तिपरतया सर्वदोषोज्झितस्तस्माद्भगवान्पुरुषोत्तमः ॥ उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशःइति । अंतिमभाष्यमादावाकृष्ययोज्यं। तथाहि। उक्ताइत्यावर्त्य। सर्वशइत्यपि। तस्य भगवतः। सर्वशोवेदेन कृत्स्नवेदेन। पूर्वाध्यायोक्तन्यायानुगृहीतेनेतिभावः। उक्ताः सर्वशोगुणाः सर्वकर्तृत्वादयोगुणाः अविरुद्धाश्चयुक्तिसमयादिविरोधरहिताश्चोक्ताः। सूत्रकृताप्रतिपादिताइत्यर्थः। तस्मा त्सर्वविरोधानांपरिहृतत्वा द्भगवान्पुरुषोत्तमःसर्वदोज्झितउक्तः प्रतिपादितइति पूर्वोक्तार्थेप्रतीताशेषविरोधनिरासेननिर्दोषाशेषगुणताहरेरत्रनिर्णीतासूत्रकृतेतियावत्। आद्यपादार्थोक्तिपरतयानायुक्तंतद्वदेच्छ्रुतिरित्यप्यादावाकृष्ययोज्यं। अतोनंतगुणइत्युक्तंप्रमेयमयुक्तं। युक्तिविरुद्धंनवदेच्छ्रुतिरित्याहात्रपादेसूत्रकृदितिशेषः। युक्ति समय श्रुति युक्त्युपेतश्रुति विरोधभेदेनविरोधस्यचातुर्विध्यात्तत्र प्राबल्याद्युक्तिविरोधमादौनिराहेत्यर्थः। आद्यनयस्यस्मृत्यविरोधपरस्ययुक्तिविरोधपरत्वमप्यस्ति । स्मृतिविरोधस्ययुक्तिसमयादिचतुर्विधविरोधरूपत्वादितिभावः। ननुयदुक्तंअतोनंतगुणइति तन्न। शवसांख्यबौद्धआर्हतादिस्मृतिषु शिवादेरेवसर्वकर्तृत्वादिमहिम्नोवर्णनेनतद्विरोधात्। नचतासामप्रामाण्यं। सर्वज्ञशिवादिप्रत्यक्षमूलत्वेनतदयोगादित्याशंक्यतन्निरासायप्राप्तं स्मृत्यनवकाशेत्यादिसूत्रत्रयं। तदर्थभाषते श्रौतस्मृतिविरुद्धत्वात्स्मृतयोनगुणान्हरेः। निषेद्धुंशक्नुयुरिति। श्रौतीभिःश्रुतिसंवादिनीभिःपांचरात्रादिभिःस्मृतिभिःविरुद्धत्वाद्विशेषेणरुद्धत्वाद्बाधितत्वादितियावत्। शैवादिस्मृतयोहरेर्गुणान्निषेद्धुंनशक्नुयुः।तदभावबोधनाक्षमाइत्यर्थः। सर्वज्ञतमविष्णुप्रत्यक्षमूलत्वाच्छ्रुतिसंवादाच्चवैष्णवस्मृतीनांप्राबल्यमितिभावः। नचाप्तोक्तानांशैवादिस्मृतीनामप्रामाण्यायोगादनवकाशत्वमित्यतोननिषेधेयुरित्यनुक्त्वानशक्नुयुरित्युक्तं। तदुक्तसाधनानुष्ठानेपियोग्यफलानुपलब्धेरलब्धप्रामाण्यानामेतन्निषेधेशक्त्यभावादित्यर्थः। शिवादेःसर्वज्ञत्वेप्ययोग्यजनप्रतारणार्थंकृतत्वेनाप्तोक्तत्वस्यैवतासामभावादप्रामाण्यस्यैवोपपत्तेरितिभावः ॥ १ ॥ ननुफलविसंवादेनाप्रामाण्येशैवादिस्मृतिवदेवश्रुतिश्रौतस्मृतीनामपितथात्वंस्यात्। वेदादिष्वपिफलविसंवादस्यबहुलमुपलंभादित्यतःप्राप्तं नविलक्षणत्वादस्येत्यादि सूत्र

SGDF Sri Gargeshwari Digital Foundation

द्वयं । तदर्थः वेदानित्यत्वान्मानमुत्तममिति । श्रौतस्मृतयइतिविभागविपरिणामाभ्यांअनुवर्त्यं । वेदाःश्रौतस्मृतय
श्चोत्तमंप्रमाणं कुतइत्यतः श्रौतस्मृतिप्रामाण्यस्यश्रुतिप्रामाण्यायत्तत्वाद्वेदप्रामाण्येहेतुमाह । नित्यत्वादिति । वेदानामि
तियोग्यतयान्वेति। अपौरुषेयत्वादित्यर्थः। अप्रामाण्यस्यदोषैकहेतुत्वाद्वाक्येचदोषाणांस्वतंत्रपुरुषदोषनिमित्तत्वाद्वेदेचाभिन
वानुपूर्वीरचयितृपुरुषस्याभावेनतद्दोषनिबंधनदोषाणामभावनियमादितिभावः। नित्यत्वंच वाचाविरूपनित्यया नित्यावेदाः
समस्ताश्चेत्यादिश्रुतिस्मृतिसिद्धत्वान्नासिद्धमितिभावः । अत्रवेदस्यनित्यत्वंनाम सजातीयानुपूर्वीकत्वं । नवर्णवत्कूटस्थनि
त्यत्वमितिध्येयं । नहिवयंवेदस्यकूटस्थनित्यतांब्रूमइति क्रमस्यकृतकत्वेपीत्यादितत्वनिर्णयटीकोक्तेः । यत्तुनित्यावेदाःपुराणा
द्याःकालःप्रकृतिरेवच । नित्यानित्यमित्यादितत्वसंख्यानटीकायांनित्यत्वंनामकूटस्थतयाद्यंतशून्यत्वमितिवचनं तत्तुसर्वज्ञे
श्वरबुद्धिक्रममपेक्ष्य । नत्वस्मदादिप्रमोत्पादकक्रममपेक्ष्य । सर्वज्ञत्वादीश्वरस्यतद्बुद्धौसर्वदाप्रतीयमानत्वादितितत्वनिर्ण
योक्तेः । ननुमास्त्वप्रामाण्यंवेदस्य तद्धेतुदोषाणामभावात् । प्रामाण्यंतुकुतः । तस्याप्तोक्तत्वादिगुणहेतुकत्वादित्यतोपि नि
त्यत्वादिति । सहजत्वादित्यर्थः । मानत्वस्येतियोग्यतयान्वेति । वेदप्रामाण्यंहि यथार्थज्ञानजननशक्तिः । साचसहजैव
ज्ञानजननशक्तेरेवप्रमाजननशक्तित्वात्तथाचमानत्वस्यप्रमाजननसामर्थ्यस्यनित्यत्वात्स्वाभाविकत्वात् । गुणानपेक्षत्वादिति
यावत् । वेदाउत्तमंमानमित्यर्थः । ज्ञानजनकत्वमेवासिद्धमित्यतः श्रौतेतिप्रस्तावाच्छ्रुतयइतिवाच्येवेदाइत्युक्तिः वेदाह्येवैनं
वेदयंतितस्मादाहुर्वेदाइत्यादेर्विदिधात्वर्थज्ञानजनत्वकद्योतनाय । तथाचबोधकत्वाद्दोषाभावेनविपरीतबोधकत्वाभावाद्वेदा

SGDF
Sri Gargeshwari Digital Foundation

उत्तमंमानमित्यर्थः। उक्तंचजैमिनिसूत्रे । औत्पत्तिकस्तुशब्दस्यार्थेनसंबंधस्तस्यज्ञानमुपदेशोव्यतिरेकश्चार्थेनुपलब्धेस्तत्प्रामाण्य मित्यादि । वेदाइत्युक्त्यावेदाह्येवैनमितिश्रुतिसूचनेनमानांतरसंवादानपेक्षमेववेदप्रामाण्यमितिसूचितं । एवंचसतिप्रामाण्ये विसंवादःकर्तृवैगुण्यादिकृतइतिकल्प्यं । अधिकारिणांफलोपलंभादितिभावेनोत्तममित्युक्तं ॥ २ ॥ नन्वथापि अतोनंतगुणइ त्ययुक्तं । आपोब्रुवन् मृदब्रवीत् ताआपऐक्षंतेत्यादिवेदवचसः अबादिकंनवक्तृजडत्वाद्धटवदित्यादियुक्तिविरुद्धत्वेनामान त्वेतत्सामान्यादितरेषुतथात्वमितिजैमिनिन्यायेनसर्ववेदवचसिप्रामाण्येअनाश्वासादित्यतःप्राप्तं अभिमानिव्यपदेशस्त्वि तियोगद्वयं । तदर्थः देवतावचनादापोवदंतीत्यादिकंवचः । नायुक्तवादीति । आपोवदंतीत्यर्थानुवादः । शाखांत रवाक्यंवा । आपोब्रुवन्नित्यादिकंवचःनयुक्तिविरुद्धार्थवादि । कुतः । देवतावचनात् । देवताकर्तृकवचनादित्यर्थः । उपलक्ष णमेतत् । ईक्षणादेर्देवताकर्तृकत्वादित्यर्थः । तदेवकुतः । देवतावचनात् । अबादिशब्दैरबाद्यभिमानिचेतनरूपदेवताना मभिधानादित्यर्थः । ननुकथंयुक्तिविरोधमात्रेणाबादिपदानाममुख्यार्थांतरग्रहणं । प्राबल्यमागमस्यैवजात्यातेषुत्रिषुस्मृतं । इत्युक्तेरित्यतोबादिजडादप्यभिमानिचेतनेतच्छब्दानांमुख्यत्वमितिसूचनायवचनादित्यभिधावृत्तिरुक्ता । तत्राबादिशब्दप्र वृत्तिनिमित्तास्वादिकंप्रतिस्वातंत्र्यरूपतदधीनत्वसूत्रोक्तन्यायस्मारणायस्वामिवाचिदेवतापदप्रयोगः । अन्यथाचेतनेत्येवब्रू यात् । ननुदेवतानास्त्येव मानाभावात् । शरीरेंद्रियादिमत्त्वेचोपलंभापत्तेः । अंतर्धानशक्तौचनमानमित्यनुपपत्तिनिरासा यापि देवतावचनादिति । पृथिव्याद्यभिमानिन्योदेवताःप्रथितौजसइत्यादितादृशदेवताप्रतिपादकागमरूपवचनादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

तथाचदेवता तद्विग्रह तदंतर्धानाभिमन्यमानव्यापकत्वादेःसिद्धत्वान्नकोपिदोषइति ॥ ३ ॥ नन्वथापिनसर्वकर्तृत्वाद्यनंत
गुणोहरिरितियुक्तं । सर्वेभावाःप्रलयेऽसंतोभावत्वात्कार्यवदितियुक्त्यालयेभावमात्रासिद्धौकार्यस्यकर्त्रुपादानपूर्वकत्वनियम
युक्त्या असदेवेदमग्रे सयद्यदेव तन्मनोकुरुतेत्यादिश्रुत्युपसर्जनकया कारणत्वेनोपेतस्यलयवर्तिविश्वप्रागभावस्यकर्तृत्वसाधने
न तद्विरोधादनन्यगत्यातस्यैवोपादानत्वात् । नचजडस्यकर्तृत्वायोगः । वृक्षेणस्थीयतइत्यादौकर्तृवाचितृतीयादर्शनात् । न
चाभावस्यभावोपादानत्वायोगः । नीरूपस्यवायोरूपयुक्ताग्र्युपादानत्ववदुपपत्तेः । कुतएवेश्वरः कुतस्तरांतस्यसर्वकर्तृत्वं कुत
स्तमामनंतगुणतातस्य इत्यतःप्राप्तं असदितिचेदित्यादिसूत्रषट्कं । तदर्थः असन्नैवकारणंदृश्यतेक्वचिदित्यादि ।
अत्रासच्छब्देनलयवर्तिविश्वप्रागभावउच्यते । कारणशब्दःकर्तृवचनः । अभावोनैवकर्ताकुतइत्यतोपि असदिति । हेतुग
र्भमिदं । अभावत्वान्निषेधैकस्वरूपत्वात् । तावताकुतोकर्तृतेत्यतोपि असन्नैवकारणंदृश्यतेक्वचिदिति । अभावःकर्ताक्वा
पिनोपलभ्यतइतिव्यभिचाराभावोक्त्यायोऽभावःसोकर्तेतिव्याप्तिलाभात्तद्बलादितिभावः । तृतीयायोगित्वरूपकर्तृत्वदृष्टा
वपिहरावभिमतस्यबुद्धिपूर्वकृतिमत्त्वरूपकर्तृत्वस्यक्वचिदभावेऽनुपलंभादितिभावः । ननुलोकेऽदृष्टमपि अस्तुविश्वप्रागभा
वस्योक्तदिशाकर्तृत्वमुपादानत्वंच । तथाचाप्रयोजकोहेतुरित्यतोप्यसदिति । असदेवेत्येवकारान्वयः । यदिअसदभावः
कर्तृउपादानकाणरंतर्हिक्वचित्प्रलयेऽसदेवस्यादितिशेषः । अभावमात्रावशेषःस्यात् । कार्यनाशेउपादानकारणावशेषनिय
मात् । नेदमनिष्टमित्यतोपि नदृश्यतेक्वचिदिति । क्वापिप्रमाणेलयेऽभावमात्रावशेषस्यादर्शनादित्यर्थः । भावत्वंतुलय

रूपेकालेव्यभिचारि । श्रुतिगतिस्तुवक्ष्यते । तथाचाप्रामाणिकस्वीकाररूपत्वादनिष्टमेवेतिनाप्रयोजकोहेतुरितिभावः । किंच
प्रामाणिकपरित्यागरूपत्वाच्चेदमनिष्टमित्यप्याह । असदित्यादिना । कारणंक्वचित्प्रलयेऽसन्नैव । अभावोनैवकिंतुभावए
व । कुतः । दृश्यतेक्वचित् । अनुमानरूपेप्रमाणेतथोपलंभादित्यर्थः । विमतोत्पत्तिः भावाधीना । उत्पत्तित्वाद्घटोत्पत्तिवत् ।
विमतोविनाशःसशेषः नाशत्वाद्घटनाशवत् । इत्यनुमानेनलयेभावकारणसिद्धेरितिभावः । नन्वभावस्यनिषेधैकस्वरूपत्वेन
विवक्षितकर्तृत्वायोगेपि घटादौकर्तृत्वेनदृष्टस्यजीवस्यैवलाघवयुक्त्याविश्वकर्तृत्वमप्यस्तु । तथाप्रधानस्यविश्वोपादानस्यवा
स्तुकर्तृत्वंलाघवात् । अकारणकमेवोत्पद्यतांजगदुक्तयुक्तेः । नचयुक्तिरप्रयोजिका । जीवाद्भवंतिभूतानि प्रधानादिदमुत्पन्नं
अकस्माद्धीदमाविरासीदित्यादिश्रुतिमूलत्वादित्यतोऽमूषांपूर्वोक्तश्रुतेश्चान्यथासिद्धिमेतेनेतिषष्ठगुणसूत्रस्मारितामाह । अ
सज्जीवप्रधानादिशब्दाद्ब्रह्मैवनापरं । वदंतिकारणत्वेनक्वापीति । एतेनसर्वेव्याख्याताइत्यत्रोक्तन्यायेनेतिभावः ।
तथाचयुक्तिर्निर्मूलत्वादप्रयोजिकैवेतिभावः । यद्वाऽसन्नैवकारणमित्यत्रासत्पदोद्धारेणजीवपदावापेनजीवःक्वापिकारणंनैवदृ
श्यते । येनलाघवावतारःस्यादितिव्याख्येयं । जीवस्यसुखदुःखादौस्वतंत्रकर्तृत्वाभावदर्शनेनघटादावपितथानुमानादितिभा
वः ॥ ४ ॥ नन्वथापि अनंतगुणोहरिरित्यसाधु । अल्पगुणजीवाभिन्नत्वात् जीववत् इतियुक्तिविरुद्धत्वात् । नचासिद्धिः ।
परेव्ययेसर्वएकीभवंतीतिश्रुतिसिद्धत्वात् । श्रौतैक्यस्यचब्रह्मधर्मत्यागेनतस्यजीवसालक्षण्येनवाजीवधर्मत्यागेनतस्यब्रह्मसा
लक्षण्येनवोभयधर्मत्यागेनचिन्मात्रेणवानिर्वाह्यत्वादित्यतःप्राप्तं भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति । तदर्थः

SGDF
Sri Gargeshwari Digital Foundation

पूर्णगुणोहरिरिति । निर्दोषश्रुतिसाक्षिभ्यांप्रमितेशजीवधर्मत्यागायोगेनैक्यस्यबाधिततयाहेतोरसिद्धिः । श्रौतैक्योक्तिस्तु
उदकेउदकांतरस्यैक्योक्तिवत्स्थानैक्यादिनागौणीनेयेतिभावः ॥ ५ ॥ नन्वथापिनसर्वकर्तृत्वाद्यनंतगुणोहरिरितिसाधु । वि
मतासृष्टिःकर्त्रन्यस्वतंत्रसाधनसाध्या सृष्टित्वात्पटसृष्टिवदित्यनेकस्यस्वातंत्र्यसाधकयुक्तिविरोधेनेशस्यैवस्वातंत्र्यबोधकवेद
स्याप्रामाण्यादित्यतःप्राप्तं तदनन्यत्वमारंभणशब्दादिभ्य इत्यादियोगसप्तकं । तदर्थः स्वातंत्र्यादिति । हरेरिति
विपरिणामेनान्वयः । नायुक्तंतद्वदेच्छ्रुतिः इतिचेहाप्यन्वेति । हरेरेवस्वातंत्र्यादन्यस्यास्वातंत्र्याद्युक्तिविरुद्धवादिनीश्रुति
र्नभवति । येनोक्तदोषःस्यादित्यर्थः । कुतोहरेरेवस्वातंत्र्यमित्यतोपि नायुक्तमित्यादि । तत् हरेरेवस्वातंत्र्यमन्यस्यास्वा
तंत्र्यमित्येतत् । किंस्विदासीदधिष्ठानमारंभणं नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमेत्यादिसाधनांतरस्वातंत्र्यनि
राकरणपराश्रुतिर्वदेत् । तथाऽयुक्तंन युक्तिशून्यंन । सर्वस्यतत्तंत्रत्वात् साधनसत्ताप्रदत्वादित्यादियुक्तिसिद्धंचयतोऽतइ
तियोज्यं । स्वरूपनिराकरणपरेयंकुतोनेत्यतोऽयुक्तंतदिति । तत् साधनस्वरूपनिराकरणमयुक्तमित्यर्थः । कुतइत्यतोपि
नायुक्तंतद्वदेच्छ्रुतिरिति । तत् साधनजातंश्रुतिर्वदेत्प्रतिपादयति । तदयुक्तंन । विमतासृष्टिःकर्त्रन्यसाधनसाध्यासृ
ष्टित्वात्पटसृष्टिवदितियुक्तिसिद्धंचयतोऽतइतियोज्यं । अद्भ्यःसंभूतःपृथिव्यैरसाच्चेति तमआसीदिति अद्भ्यःसंभूतोहिरण्य
गर्भइत्यष्टावित्यादिश्रुत्यादौसाधनांतरसत्त्वोक्त्यन्यथानुपपत्तेःस्वातंत्र्यरूपधर्मांतरेणनिषेधोनस्वरूपेणेतिभावः । तथातद्य
दासीत्तदावृतमासीत् तस्माद्धान्यन्नपरःकिंचनासेत्यादिकाश्रुतिः । तत् हरिस्वातंत्र्यादिस्पष्टंवदेत् । अतश्चेतिचयोज्यं ।

SGDF
Sri Gargeshwari Digital Foundation

अप्रामाणिकत्वाच्चसाधनांतरस्वातंत्र्यंनोपेयमित्याह। नायुक्तंतद्वदेच्छ्रुतिरिति। तत्साधनांतरस्वातंत्र्यमयुक्तंयुक्तिशून्यंश्रु
तिर्नवदेत् । श्रुत्यसिद्धंचेत्यर्थः । प्रत्यक्षंतुतत्रनैवयोज्यं । अतःप्रमाणैरनुपलंभान्नसाधनांतरस्वातंत्र्यमितिभावः । विमतासृ
ष्टिःकर्त्रन्यस्वतंत्रसाधनसाध्येत्यादियुक्तिस्तु प्रागुक्तश्रुत्यादिनाबाधिता । साधनसत्त्वश्रुतिस्तुपरतंत्रसाधनपरेतिभावः ।
नन्वेवंहरेरेवस्वातंत्र्येस्वरूपसामर्थ्येनैवसर्वसृष्ट्याद्युपपत्तौसाधनांतरोपादानमपितस्यनस्यादित्यतोपि नायुक्तंतदित्यादि।तत्
साधनांतरोपादानंस्वतंत्रस्यापिहरेरयुक्तंन। लीलयोपपत्तेरितिभावः । गमनशक्तस्यपुंसोलीलयादंडमालंब्यगच्छतोपंगुत्ववदै
श्वर्याविरोधात् । लीलयातूपादानमितिकुतः। अशक्तस्यैवकुतोनेत्यतआह। तद्वदेच्छ्रुतिरिति । लीलयैवसाधनांतरोपादान
मित्येतत् शक्तोपिह्यन्यथाकर्तुंस्वेच्छानियमतोहरिः । कारणैर्नियतैरेवकरोतीदमित्याद्यनुभाष्योक्तश्रुतिर्वदेद्यतोतइत्यर्थः । इ
त्याद्यूह्यं ॥ ७ ॥ नन्वथापिनहरिरेवस्रष्टृत्वाद्यनंतगुणइतियुक्तं । जीवोमहदादिविश्वकर्ताचेतनत्वादीशवाद्यंगीकृतेशवदित्या
दियुक्त्या जीवाद्भवंतिभूतानीत्यादिश्रुत्यनुभवसंवादिन्याजीवकर्तृत्वसाधिन्याविरुद्धत्वेनेशस्रष्टृत्वश्रुतेरमानत्वादित्यतःप्राप्तं
इतरव्यपदेशादित्यादि सूत्रषट्कं । तदर्थः सर्वकर्तृत्वान्नायुक्तंतद्वदेच्छ्रुतिरिति । हरेरित्यस्ति । हरेरेवसर्वकर्तृत्वान्नो
क्तयुक्तिविरुद्धवादिनीश्रुतिरित्यर्थः । कुतएवं । जीवकर्तृत्वमेवकुतोनेत्यतोप्ययुक्तंतदिति । तच्चजीवकर्तृत्वमयुक्तं युक्ति
शून्यं । तथा हिताकरणाहितकरणकृत्स्नप्रसक्त्यादियुक्तिविरुद्धंचयतोतइति । चेतनत्वंत्वप्रयोजकमितिभावः। श्रुत्यादिमूलं
कथमेवमित्यतोपिश्रुतिस्तज्जीवकर्तृत्वंनवदेदितियोज्यं । पूर्वोक्तदिशाब्रह्मपरत्वात् । स्वतंत्रकर्तृत्वानुभवस्त्वस्वातंत्र्यानुभव

SGDF
Sri Gargeshwari Digital Foundation

बाधितइतिभावः ॥ ७ ॥ ननुजीवइवेशेपिकृत्स्नप्रसक्त्यादियुक्तिविरोधदोषसाम्यात्‌हस्तादिकरणशून्यत्वाच्चतस्यापिस्रष्टृत्वाद्यनंतगुणतानयुक्तेत्यतःप्राप्तं श्रुतेस्तुशब्दमूलत्वादित्यादिसूत्रपंचकं । तदर्थः नायुक्तंतद्वदेदित्यादि । तत्‌ हरेः स्रष्टृत्वाद्यनंतगुणत्वं । अयुक्तं कृत्स्नप्रसक्त्यादियुक्तिविरुद्धं न । कुतः । तत्‌ लोकेविरुद्धधर्माणामीशेऽविरुद्धत्वंयोसौविरुद्धोविरुद्धइत्यादिश्रुतिस्तथा तत्‌अप्राकृतहस्तपाण्यादिमत्त्वंवाऽपाणिपादोजवनोगृहीतेत्यादिश्रुतिर्वेदेद्यतोतइति । ननु श्रुत्युक्तत्वेपिकथंयुक्तिविरुद्धमुपेयमित्यतोपि नायुक्तंतदिति । तत्‌ प्रागुक्तंयुक्तिविरुद्धंन । यतस्तत्‌प्रकृतंब्रह्मायुक्तं युक्त्ययोग्यं । नहियुक्त्यगम्येयुक्तिविरोधइतिभावः । कुतएतत्‌ । तत्‌ युक्त्यगम्यत्वं । औपनिषदःपुरुषइत्यादिश्रुतिर्वेदेद्यतोतइति । किंचतद्ब्रह्मनायुक्तंसर्वविरोधशामकानंतशक्तियुक्तमेव । विचित्रशक्तिःपुरुषःपुराणोनचान्येषांशक्तयइत्यादिश्रुतिर्वेदेत्‌।जीवंतुनैवंयतोतइति ॥ ८ ॥ नन्वथापिनस्रष्टृत्वाद्यनंतगुणत्वंहरेःसाधु। स्रष्टृत्वादेःफलवत्त्वेऽपूर्णतापत्तेरसतिचफलेप्रेक्षावत्त्वाभावापत्तेरित्यादियुक्तिविरोधादित्यतःप्राप्तं नप्रयोजनवत्त्वादित्यादिसूत्रद्वयं । तदर्थः नायुक्तमित्यादि । तत्‌ स्रष्टृत्वाद्यनंतगुणत्वं। अयुक्तं उक्तरीत्याफलमुखयुक्तिविरुद्धं न । कुतः । तत्‌स्रष्टृत्वादिसाध्यफलमनपेक्ष्यैवस्रष्टृत्वादिगुणवत्त्वंकेवलंलीलयैवेति देवस्यैषस्वभावोयमाप्तकामस्यकास्पृहेत्यादिश्रुतिर्वदेद्यतोतइत्यादियोज्यं । लोकेमत्तस्यनृत्तगानादिवत्‌ पूर्णस्यापिहरेर्लीलारूपतयास्रष्टृत्वोपपत्तेरितिभावः । श्रुतावेषइत्यस्येच्छारूपःसृष्ट्यादिव्यापारइत्यर्थः ॥ ९ ॥ नन्वथापिनस्रष्टृत्वाद्यनंतगुणत्वंहरेःसाधु । निर्निमित्तंप्राणिनांविभागेनसुखदुःखादिदानेवैषम्यस्यनैर्घृण्यस्यचापत्तेरित्यादियुक्तिविरोधादित्यतः

प्राप्तं वैषम्यनैर्घृण्ये नसापेक्षत्वादित्यादि सूत्रत्रयं । तदर्थः नायुक्तंतदित्यादि । तत्‌ स्रष्टृत्वाद्यनंतगुणत्वं नायुक्तंप्रागुक्तयुक्तिविरुद्धंनभवति । कुतः। तत्‌स्रष्टृत्वादिकंपुण्येनपुण्यंलोकंनयतिपापेनपापमित्यादिकाश्रुतिःकर्मसापेक्षंवदेद्यतोतइतियोज्यं।अनादितत्तदीयकर्मापेक्षयासुखादिदानान्नवैषम्यादियुक्तिविरोधइतिभावः।नन्वेवंकर्मणोस्वातंत्र्येपुनर्वैषम्याद्यापत्तिः । स्वातंत्र्येतुहरेःसर्वस्वातंत्र्यादिगुणहानिरित्यतोपि नायुक्तंतदित्यादि । तत्‌ हरेःस्रष्टृत्वस्वातंत्र्यादिगुणवत्त्वं उक्तयुक्तिविरुद्धंन । कुतः । तत्‌ स्वाधीनकर्मापेक्षयाफलदानं सकारयेत्पुण्यमथापिपापंनतावतादोषवानीशितापीत्यादिकाश्रुतिरदोषंवदेद्यतोतइतियोज्यं। तत्तदीयानादिपूर्वपूर्वपुण्यादिकमपेक्ष्यात्मनातैस्तैःकारितोत्तरोत्तरपुण्यादिकमपेक्ष्यसुखदुःखादिफलदानेनप्राप्तवैषम्यादेरदोषत्वस्यश्रुतावुक्तत्वाद्वेदाप्रामाण्यकारणत्वाभावान्नकोपिदोषइतिभावः ॥ १० ॥ नन्वथाप्यनंतगुणोहरिहरित्यसाधु। हरिर्नानंतगुणः चेतनत्वाच्चैत्रवत्‌ । दोषवान्‌गुणवत्त्वाच्चैत्रवदित्यादियुक्तिविरुद्धत्वादित्यतःप्राप्तं सर्वधर्मोपपत्तेश्चेति । तदर्थः नायुक्तंतदित्यादि । तत्‌ हरेरनंतगुणत्वादिकं । नायुक्तं युक्तिविरुद्धंन । कुतः । तत्‌ हरेर्निर्दोषाशेषसद्गुणत्वं गुणाःश्रुताइत्यादिकाश्रुतिर्वेदेद्यतोतइति । तथानायुक्तंतत्‌ उक्तंप्रमेयंयुक्तिहीनंन । किंतुहरिःसर्वदाप्राप्तानंतगुणः तत्प्रेप्सुत्वेसतितत्रशक्तत्वात्‌ । हरिःसदात्यक्ताशेषदोषः तज्जिहासुत्वेसतितत्रशक्तत्वात्‌ । सामान्यव्याप्त्याचैत्रवदित्यादियुक्तियुक्तमेवयतोतइति । प्राचीनयुक्तिस्तूक्तश्रुतियुक्तिबाधितेतिभावः । पादार्थमुपसंहरति नायुक्तमित्यादि । तत्‌ तस्मात्पूर्ववाद्युक्तयुक्तीनांसिद्धांतयुक्तश्रुतियुक्तिबाधितत्वाद्भगवतःसर्वकर्तृत्वाद्यनंतगुणवत्त्वबोधिकायतोवाइमानिभूतानिजा

SGDF Sri Gargeshwari Digital Foundation

यंतइत्यादिश्रुतिर्नयुक्तिविरुद्धंवदेदित्यर्थः । श्रुतिरित्येकवचनंअर्थैक्याभिप्रायेण । पुनस्तस्यार्थवित्तये चकारब्रह्मसूत्राणीत्यादिविदति ॥ ११ ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांद्वितीयाध्यायस्य प्रथमःपादः ॥ २ ॥ १ ॥ ननुश्रुतिःनायुक्तवादिनीत्युक्तं तथापिसांख्यचार्वाकवैशेषिकादिनानामतविरुद्धवादिनीविष्णुकर्तृत्वादिश्रुतिरप्रमाणंस्यादित्यतस्तेषांमतानामप्रामाण्यंविवरीतुंद्वितीयःपादःप्राप्तः । तस्यभाष्यानुभाष्ययोर्विवृतत्वादिहसंक्षेपेणार्थमाह । भ्रांतिमूलतयासर्वसमयानामयुक्तितः । नतद्विरोधाद्वचनंवैदिकंशंक्यतांव्रजेदिति । व्याससमयान्यसर्वसमयानांभ्रांतिमूलतयाभ्रांतेर्हेतुत्वेन । मिथ्याज्ञानजनकत्वेनेतियावत् । तदेवकुतः । भ्रांतिमूलतया । भ्रांतिरित्युपलक्षणं । भ्रमप्रमादविप्रलिप्सादिपूर्वकत्वेन । तदेवकुतः । अयुक्तितः युक्तिशून्यत्वाद्युक्तिरुद्धत्वाच्चेत्यर्थः । एतच्चव्यक्तंभाष्यादावितिभावः । तद्विरोधा त्तैःसमयैर्विरोधाद्वैदिकंवचनंश्रुतिरप्रमाणमितिशंकास्पदतां नव्रजेदित्यर्थः । अस्यसर्वस्यन्यायमुक्तावल्यादौअस्माभिर्विवृतत्वान्नात्रैतद्विव्रियते । अक्षपादकणादौचसांख्ययोगार्हतास्तथा । शिवशक्तिमहायानलोकायतपुरःसराः । दुरागमाइतिबृहद्भाष्योक्तपाद्मस्मृत्यादौस्पष्टमेवदुरागमत्वंतेषामिति ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांद्वितीयाध्यायस्यद्वितीयःपादः ॥ २ ॥ २ ॥ नन्वेवमुक्तदिशायुक्तिसमयानामाभासत्वेनविष्णोरुक्तस्रष्टृत्वादिगुणानांतद्विरुद्धत्वाभावेपि अधिदैवाधिभूताद्यनादित्वावेदकश्रुतिविरुद्धत्वंस्यादित्यतःश्रुतिविरोधंपरिहर्तुंतृतीयःपादःप्रवृत्तः । तदर्थोक्तिपरतया उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशइ

SGDF
Sri Gargeshwari Digital Foundation

त्यंतिमार्धमत्राप्याकृष्ययोज्यं । तथाहि पूर्वाध्यायेऽशेषश्रुतिसमन्वयेनोक्तास्तस्यहरेःस्रष्टृत्वादयः सर्वशः सर्वेगुणावेदेना
विरुद्धाःउक्ताः सूत्रकृताप्रतिपादिताइत्यर्थः । हरेःस्रष्टृत्वादिगुणवत्त्वेआकाशाद्यनुत्पत्तिश्रुत्यविरोधंवक्त्यस्मिन्पादइतिया
वत् । ननुश्रुतिसमन्वयेनविष्णुरेवसर्वकर्तृत्वाद्यनंतगुणइतिसमन्वयाध्यायोक्तमयुक्तं । अनादिर्वाअयमाकाशः वायुर्वाव
नित्यः नित्योनित्यानामित्यादिनाआकाशवायुजीवानुत्पत्तिबोधकवेदेन तथावायोरग्निःअग्नेरापःइत्यादिना अग्न्यादेःस्वा
तंत्र्येणवाय्व्राद्यभिमानिचैतन्यकर्तृत्वबोधकेनस्वातंत्र्येण वाय्वादिजडोपादानकत्वबोधकेनचवेदवाक्येनविरुद्धत्वादित्यतः
प्राप्तानि नवियदश्रुतेरिति एतेनमातरिश्वेति ज्ञोतएवेति तेजोतस्तथाह्याहेति आपइतिच पंचाधिकरणा
नि । तेषामर्थमाह । आकाशादिसमस्तंचतज्जंतेनैवेति । अत्राकाशपदेनावकाशभूताकाशयोः तदभिमानिचित्प्रकृति
विघ्नेशयोर्ग्रहः । आदिपदेनच वायुतेजःप्रभृतिभूततदभिमानिदेवानां तथासौत्रवियत्पदोपलक्षितस्यप्रकृतिजीवकालमहदहं
मनोबुद्ध्यादेस्तदभिमानिनश्चग्रहः । एवंचाकाशादि अधिभूतमधिदैवंच समस्तं तज्जं तस्मात्पूर्वप्रकृतहरेःसकाशाज्जातं ।
पराधीनविशेषावाप्तिरूपजन्मवदित्यर्थः । अत्रतज्जमित्यत्रजंजन्मवदित्यनेनवियदित्यादिनयत्रयार्थोक्त्याऽद्यशंका तस्माद्ध
रेर्जातंतज्जमित्यनेनतेजोतइत्याद्यधिकरणद्वयार्थोक्त्यांत्यशंकाचनिरस्ता । वियत्यविवादात् । तेजःप्रभृतेरतिव्यवहितस्यात्म
संभूतत्वेकिंचिद्व्यवहितवायोरात्मजत्वस्यसंभूतिवाक्येकैमुत्यलब्धतया सूत्रकृतातेजःप्रभृतेरेवोक्तावपि कैमुत्यमननुसृत्यभा
ष्यकृताआकाशादिसमस्तंचतज्जमित्युक्तं । केनहेतुनासमस्तंजन्मवदिति तज्जमितिचज्ञायतइत्यत स्तेनैवेतिवैदिकंवचनमि

SGDF
Sri Gargeshwari Digital Foundation

त्येतत्परामृश्यते । आत्मनआकाशःसंभूतः इदंसर्वमसृजत आत्मावाइदमेकएवाग्रइत्यादिवैदिकवचनेनैव तथा तेवाएतेचिदा
त्मानोव्युच्चरंति एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच खंवायुर्ज्योतिरापःपृथिवी तत्तेजोसृजत तदपोसृजतेत्यादिनाचज
न्मवत्त्वं तज्जातत्वंचज्ञायतइत्यर्थः । अतएवउत्पत्तिवचनबाहुल्यादाकाशाद्यनुत्पत्तिवचनानिस्वरूपोत्पत्यभावादिपरतयागौ
णार्थानिनेयानीतिनतद्विरोधइतिभावः । नन्वेवमपि वायोरग्निरित्याद्यन्यजातत्ववचनविरोधइत्यतोपि तेनैवेति आकाशा
दःपरामर्शः । करणेतृतीया । तेनैवाकाशादिनैव। द्वाररूपसाधनेनतज्जं। नतुद्वारकारणमनपेक्ष्येत्येवार्थः । अन्यजातत्वश्रुतिः
द्वारकारणपरेत्युक्तंभवति । अत्रैवकारप्रयोगेणेदंचोद्यंनिरस्तं । तेनविनापिकर्तुंशक्तस्यद्वारवैयर्थ्यमिति । शक्तस्यापिलीलयाते
नैवश्रौतद्वारेणसमस्तस्यजननादिति ।अत्रज्ञोतएवेत्यस्यापादसमाप्तिक्रियमाणजीवविचारसंगततयाव्यवहितत्वेपि तस्य एतेन
मातरिश्वेत्यस्यच विशेषशंकानिवर्तनेन वियन्नयोक्तसर्वजन्मरूपार्थसमर्थनमात्रपरत्वात् । तेजोतः आपइत्यनयोरप्यन्योपल
क्षणतयाकैमुत्येनवासर्वस्यतज्जत्वोक्तिपरत्वंचद्योतयितुंनयपंचकस्यार्थमाकाशादिसमस्तंचतज्जंतेनैवेतिसंक्षिप्याभाषतेति । य
त्तुहरेःसाक्षादन्यद्वाराचसर्वस्रष्टृत्वमुक्तंतदयुक्तं। तस्यपृथिवीसृष्टौ अद्भ्यःपृथिवीतिह्यपांद्वारत्वश्रुतेः ताआपऐक्षंत ताअन्नमसृजं
तेत्यपामन्नद्वारत्वश्रुत्याविरुद्धत्वेनतुल्यबलतयाद्वयोरपिद्वारश्रुत्योरप्रामाण्यादित्यतःप्राप्तं पृथिव्यधिकाररूपशब्दांतरा
दिभ्यइतिसूत्रं । तस्याप्यर्थः आकाशादिसमस्तंचतेनैवाकाशादिना आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यःपृथिवीत्या ॥ ३४ ॥
दिश्रुत्युक्तद्वारभूतसाधनेनैवतज्जमित्युक्त्यासंगृहीतोध्येयः । ताअन्नमसृजंतेतिश्रुत्यंतरस्थान्नशब्दस्यपृथिव्यर्थत्वेनाविरोधादि

तिभावः । केनहेतुनान्नश्रुतेःपृथिव्यर्थत्वंज्ञायतइत्यतोपि तेनैवेति। आपश्चपृथिवीचान्नं पृथिवीवाअन्नमित्यादिवैदिकवचनेनै
वेत्यर्थः । ननुनहरेःसृष्ट्यादिकर्तृत्वंयुक्तं । रुद्रोमाविशांतकइत्यत्रश्रुतावंतकपदेनरुद्रस्यसंहर्तृत्वोक्त्यातद्विरोधादित्यतःप्राप्तं
तदभिध्यानादेवतुतल्लिंगात्सइतिसूत्रं। तदर्थंभाषते लीयतइति । तेनैवेति आकाशादिसमस्तमितिचवर्तते । आका
शवायुतेजःप्रभृत्यधिदैवाधिभूतांतंसमस्तमपि तेनैव प्रस्तुतहरिणैव लीयते । नतुरुद्रेणेत्यर्थः। केनमानेनज्ञेयमित्यतआह । ते
नैवेति । यमप्येतिभुवनंसांपरायेसनोहरिर्घृतमिहायुषेत्तुदेवः यइदंविलापयतिसहरिः स्रष्टापाताचसंहर्तासएकोहरिरित्यादि
वैदिकवचनेनैवेत्यर्थः । अंतकश्रुतेःकागतिरित्यतोपि तेनैवेति। रुद्रेणैवद्वारसाधनेन भगवताकर्त्रा लीयतइत्यर्थः । द्वारपरा
साश्रुतिरितिभावः । अस्यांयोजनायां समस्तपदंसंभावितसर्वपरं। केनैवंज्ञायतइत्यतोपि तेनैवेति।सरुद्रेणविलापयति स्रष्टृ
त्वादिकमन्येषांदारुयोषावत् निमित्तमात्रमीशस्येत्यादिवैदिकवचनेनेत्यर्थः। यत्तुक्रमाद्विलीयतइत्यादिश्रुत्या लोकानुसारित्व
युक्त्यांचोत्पत्तिक्रमेणैवविलीयतइतिप्राप्ते व्युत्क्रमाद्विलयश्चैवेत्यादिश्रुतिभिःपूर्वोत्पन्नानांसामर्थ्याधिक्ययुक्त्याच विपरीतक्र
मेणलीयतइतिवक्तुं विपर्ययेणतुक्रमोतउपपद्यतेचेतिसूत्रं तदर्थोबुद्धिस्थवाचिनातेनैवेत्यनेननिरवकाशश्रुत्यादिप्रसिद्धेनै
वबुद्धिस्थेनविपरीतक्रमेणैवाकाशादिसमस्तंचलीयतइत्युक्त्यासंगृहीतोध्येयः । क्रमश्रुतयस्तुविपरीतक्रमस्यापिक्रमत्वात्तत्परत्वे
नसावकाशाइतिभावः। समस्तं च तु विज्ञानमनस्तत्वेविनाइत्युक्त्याचांतराविज्ञानमनसीक्रमेणेत्येतन्नयार्थोपिसंगृहीतः । न
नुहरेरपि असतःसदजायतेति सइदंसर्वंविलाप्यांतस्तमसिनिलीनइतिचजन्मलययोःश्रवणान्नतस्यसर्वकर्तृता । नचनजायतेन

SGDF Sri Gargeshwari Digital Foundation

तत्व म्रियतइतिश्रुतिविरोधः । अस्याजन्मलयाभावश्रुतेः जीवेजन्मलयाभावश्रुतेःइवेश्वरस्वरूपपरत्वेनजन्मलयश्रुतेस्तुपराधी मंजरी.
॥ ३५ ॥ नविशेषदेहावाप्तितत्त्यागाख्यजन्मलयपरत्वेनचव्यवस्थोपपत्तेरित्यतःप्राप्तं असंभवस्तुसतोनुपपत्तेरिति । नात्माश्रुते २।३
र्नित्यत्वाच्चताभ्यः इतिचाधिकरणद्वयं । तदर्थमाह सोनुत्पत्तिलयःकर्तेति । सः अशेषजन्मलयहेतुत्वेनप्रस्तुतो
हरिः पराधीनविशेषावाप्तिरूपोत्पत्तिशून्यः । देहत्यागाख्यलयशून्यश्चेत्यर्थः । कुतःकर्तेतिहेतुगर्भमिदं । कर्तृत्वात्स्वतंत्र
त्वादित्यर्थः । स्वतंत्रःकर्तेतिस्मरणात् । तज्जन्मश्रुतिर्वायोरीशजत्वपरा । विलीनश्रुतिरप्यपिहितत्वपरेतिभावः । अ
त्रअसंभवस्त्वित्यस्यासंभवज्जन्मनोर्नभोनभस्वतोःश्रुत्यैवजन्मोक्तौ तर्हिताद्दृशस्यापीशस्यश्रुत्यैवजन्मास्त्वित्युत्पन्नचोद्यनि
रासकतयापूर्वत्रैवसंगतत्वेनपूर्वत्रनिवेशेपि तथानात्माश्रुतेरित्यस्यतुसर्वस्यव्युत्क्रमेणश्रुत्यैवलयोक्तौ तर्हिब्रह्मणोपितथैवसो
स्त्वितिशंकानिरासकतयालयप्रकरणानंतरंनिवेशेपि श्रोतुर्बुद्धिसौकर्यायव्यवहितयोरपि एकत्रैवसंक्षिप्यैवार्थभाषणं । एवम
ग्रेपिबोध्यं । ननु यथाकाशादेर्जन्मोक्त्यैवलयःसिद्धः एवंभगवतोप्यसंभवस्त्वित्यनेनजन्माभावोक्त्यैवलयाभावःसिद्धः।
तत्किंनात्मेतिसूत्रेण नह्याकाशादेर्लयव्युत्पादनार्थमधिकरणांतरमस्ति । तदभिध्यानादित्यादौकेनलयइत्यादेरेवचिंतनादिति
चेत् । उच्यते । पराधीनविशेषावाप्तिरूपजन्मशून्यस्यापिलीलयादेहोत्पादनत्यागरूपलयोनेतिसमर्थनार्थत्वादवैयर्थ्यं । अ
स्यनित्योनित्यानामितिदेहनित्यत्वस्याप्युक्तेरिति । नन्वथापि अणुर्ह्येषआत्मेतिजीवाणुत्वश्रुतेर्व्याप्ताह्यात्मानइतितदनणुत्व ॥ ३५ ॥
श्रुतिविरोधेनामानत्वेनप्रागुक्तश्रुतिसमन्वयोहरावयुक्तइत्यतःप्राप्तं उत्क्रांतिगत्यागतीना मित्यादिसूत्रसप्तकं।तदर्थमाह

SGDF
Sri Gargeshwari Digital Foundation

जीवस्तद्वशगःसदेति । गच्छतीतिगमेर्डः । सदोत्क्रांतिकालेपरलोकादिगमनागमनकालेचप्रस्तुतंहर्यधीनगमनागमनादि
मान्जीवइत्यर्थः । सोस्माच्छरीरादुत्क्रम्यामुंलोकमधिगच्छतीत्यादिश्रुतेर्गत्यागतिमत्त्वादणुर्जीवः । व्याप्तश्रुतिर्ब्रह्मपरेतिभा
वः । अणुत्वेसौत्रयुक्तिसूचनार्थैवंनिर्देशः । नचेश्वरेव्यभिचारः । तत्राणुत्वस्याप्यक्षरनयसिद्धत्वात् । नचमध्यमपरिमाणत्वेप्यु
पपत्तिः । अनित्यत्वापातेनतस्यनचपर्यायादपीत्यत्रोक्तदिशानिरस्तत्वादितितात्पर्यात् । नचगत्यादेर्मनोगतस्यात्मन्युपचाराद
सिद्धिः । सतत्रपर्येतिजक्षन्क्रीडन्निनितिमुक्तावपिश्रवणादतएवसदेत्युक्तिः । अत्रगत्यादिमान्जीवइत्येववाच्येगत्यादेरीशव
शत्वोक्तिस्तुस्वात्मनाचोत्तरयोरितिसूत्रोक्तंगत्यादेरीशाधीनत्वंचसंग्रहीतुं । परेणनीयतइत्यादिश्रुतेस्तेनजीवमादायहरेर्लोकां
तरगमनेजीववदेवदुःखभोगादिकंस्यादितिनिरस्तं । स्वतंत्रत्वेनतस्यतत्परिहारसंभवादितिसूचितं । उक्तंचसंभोगप्राप्तिरिति
चेन्नवैशेष्यादिति । परमधार्मिकइत्यत्रेवतद्वशइत्यत्राप्यर्थोध्येयः । नन्वथापिसएकधानसप्तधेतिजीवैकरूप्यश्रुतेः सपंचधा
ससप्तधेतितद्बाहुरूप्यश्रुतिविरोधेनामानत्वान्नहरौश्रुतिसमन्वयोयुक्तः।नचबाहुरूप्यमणौजीवेयुक्तं। योगप्रभावात्कायव्यूहेन
बाहुरूप्यमित्यस्यविभावेवसंभवेनाणावयोगात् । नचभिन्नांशशून्यस्यापिजीवस्याघटितघटकशक्त्याऽगस्त्यादेःसमुद्रपानादि
कमिवयुक्तंबहुरूपत्वमितिवाच्यं । तथासतिजीवस्येश्वरेणसाम्यापातादित्यतःप्राप्तं व्यतिरेकोगंधवत्तथाचदर्शयतीति ।
तदर्थमाह । जीवस्तद्वशगःसदेति । जीवःयोगिभूतोंशीजीवःभगवद्वशःसन्नेवांशतःपृथग्गतिमानित्यर्थः । योगिजीव
स्ययोगाराधितभगवत्प्रसादेनांशानांपृथग्गतिसंभवेनबहुरूपत्वस्येशाधीनत्वान्नतेनगुणसाम्यापातः । यथायथेश्वरःकुरुतेत

SGDF
Sri Gargeshwari Digital Foundation

थातथाभवतीतिश्रुतेःऐकविध्यश्रुतिःस्वरूपैक्यपरेतिभावः । नन्वथापि द्वासुपर्णेत्यादिजीवेशभेदश्रुतेःतत्त्वमस्याद्यभेदश्रुति
॥ ३६ ॥ विरुद्धत्वेनामानत्वेजीवेशभेदासिद्ध्यानहरेर्विश्वकर्तृत्वादौश्रुतिसमन्वयोयुक्तइत्यतःप्राप्तं पृथगुपदेशादिति सूत्रद्वयं ।
तस्यार्थो जीवस्तद्वशगःसदेति । जीवःसदातद्वशगोहर्यधीनत्वेनवर्तमानो नकदाचित्तदैक्यंप्राप्नोतीत्यर्थः । तर्ह्यभेदश्रुति
रमानंस्यादित्यतोजीवस्तद्वशइत्येववाच्येतद्वशगइत्युक्तं । गमिरत्रज्ञानार्थः । आनंदादेरुपलक्षणं । जीवःप्रस्तुतहर्यधीनज्ञाना
नंदादिमांश्चेत्यर्थः । तथाचेश्वरवज्जीवोपिज्ञानादिमानितिकृत्वाआदित्योयूपःसिंहश्चैत्रइत्यादिवदभेदश्रुतिःसादृश्यादभेदपरे
त्युक्तंभवति । नन्वथापिज्ञोतएवेतिजीवस्याप्युत्पत्तिरुक्ता । तथात्वेजीवोविनाशी जनिमत्त्वादितियुक्त्युपेतया ब्रह्मँल्लयमभ्यु
पैतीतिजीवानित्यत्वंश्रुत्या सोनादिनापुण्येनपापेनचानुबद्धः । परेणनिर्मुक्तः आनंत्यायकल्पतइति जीवनित्यत्वश्रुतेर्विरुद्ध
त्वेनामानत्वेप्राप्ते ज्ञोतइत्यत्रचरेतोरूपोपाध्युत्पत्त्युक्तावपि उपाध्युत्पत्त्याप्रतिबिंबरूपजीवोत्पत्तेरावश्यकत्वेविनाशित्वध्रौव्या
दित्यतःप्राप्तं यावदात्मभावित्वाच्चनदोषस्तद्दर्शनादिति । तस्याप्यर्थः जीवस्तद्वशगःसदेति । जीवःसदा
तद्वशत्वेनविद्यमानःनकदाचिदुपाधिनाशादिनाहीयतइत्यर्थः । बाह्यदेहरूपोपाधेर्जन्मलयवत्त्वेपि स्वरूपोपाधेरन्यस्याना
दिनित्यस्यभावात् । तस्ययोनुत्पत्तिलयइत्युक्तदिशानादिनित्यबिंबभूतेश्वरसन्निधेश्चभावेनानादिनित्योजीवइतिभावः ।
नन्वथापिजीवस्य विज्ञानात्मासहदेवेश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्रेत्यादिज्ञानानंदात्मकत्वादिश्रुतेः सदुःखाद्विमु ॥ ३६ ॥
क्तआनंदीभवतीत्यादिनाआनंदाद्यनात्मकत्वश्रुतिविरुद्धत्वेनामानत्वेप्रागुक्तश्रुतिसमन्वयायोगइत्यतःप्राप्तं पुंस्त्वादिवत्त्व

स्यसतोभिव्यक्तियोगादि त्यादिसूत्रद्वयं । तस्याप्यर्थः । जीवस्तद्वशगःसदेति । गच्छतिरत्रज्ञानार्थो निवृ
त्तेगतमितिप्रयोगान्निवृत्त्यर्थोवा । एवंचजीवस्तद्वशगःहर्यधीनाभिव्यक्तिशब्दितानंदगोचरानुभववानितिवाहर्यधीनाभिव्य
क्त्याख्याविद्यानिवृत्तिमानितिवार्थः । यथा बाल्येसतोपिपुंस्त्वादेर्यौवनेभिव्यक्त्याइदानींपुमान्नपुरेत्याद्युक्तिस्तथा । जी
वस्वरूपस्यैवानंदादेःप्रागविद्यावृतस्यमुक्तावपीशप्रसादायत्ताया आनंदज्ञप्तिरूपाया अविद्यानिवृत्तिरूपायावा अभिव्य
क्तेर्भावेनदुःखाद्विमुक्तआनंदीभवतीत्यादिव्यपदेशोपपत्त्याजीवस्यानंदाद्यात्मकत्वे नश्रुतिविरोधइतिभावः । अत्रजीवोभिव्य
क्तिमानितिवाच्येतस्येशवशत्वोक्तिरनादिभावरूपाविद्याख्यावरणस्यनिवृत्तिरसंभावितेतिशंकानिवृत्त्यर्थंअचिंत्यशक्तिकेश्व
रनिवर्त्यत्वंद्योतयितुं । एतच्चतदभिध्यानादित्यत्रव्यक्तमितिभावः । नन्वथापियत्कर्मकुरुतेतदभिसंपद्यतइतिजीवकर्तृत्वश्रु
तेः नान्यःकर्तेतितदकर्तृत्वश्रुत्याइतरव्यपदेशादित्यत्रहिताकरणादिनातदकर्तृत्वोक्त्याचविरुद्धत्वेनामानत्वप्राप्तेरित्यतःप्राप्तं
कर्ताशास्त्रार्थवत्त्वादित्यादिसूत्रनवकं । तस्याप्यर्थः जीवस्तद्वशगःसदेति । कर्तेत्यन्वेति । जीवःसदातद्वश
गःसन्कर्ता नत्वीशवत्स्वतंत्रःसन्कर्तेत्यर्थः । नान्यःकर्तेतिश्रुतिःपूर्वोक्तिश्चस्वतंत्रकर्तृत्वनिषेधपरेतिभावः । अत्रसदेत्युक्तिः
जक्षन्क्रीडन्नितिमुक्तावपिकर्तृत्वश्रवणेननकदाचिन्निवर्ततइतिकर्तृत्वंतात्विकमितिवक्तुं । तद्वशइत्येवपूर्तौतद्वशगइत्युक्तिर्भ
गवदधीनविहितनिषिद्धविषयप्रवृत्तिनिवृत्तिरूपगतिमानित्यर्थप्रतीत्याविधिनिषेधरूपशास्त्रार्थवत्त्वरूपयुक्तिसूचनाय । ज्ञा
नंयथातद्वशंनतुस्वाधीनमेवंकृतिरपीत्युपलब्धिवदनियमइतिसूत्रार्थसंग्रहायचेति । गतेरपिईशवशत्वोक्तिरीशस्यविध्याद्यवि

SGDF Sri Gargeshwari Digital Foundation

षयत्वंसूचयितुं । नन्वथापिजीवानांअंशाएवहीमेजीवाःपरस्येतीशांशत्वश्रुतेःनैवांशोनसंबंधइत्यनंशत्वश्रुतिविरोधेनामानत्व प्राप्तेः । जीवानांमत्स्यादिवत् ईशांशत्वेमत्स्यादिसाम्यापत्तेः । मत्स्यादेश्चजीवसाम्यापत्तेश्चेत्यतःप्राप्तं अंशोनानाव्यपदेशादित्यादि सूत्राष्टकं । तदर्थः जीवस्तद्वशगःसदा । तदाभासोहरिःसर्वरूपेष्वपिसमःसदेति । गतिरत्रप्रवृत्तिः । अपिस्तदाभासोपीत्यन्वेति । जीवःसर्वदाहर्यधीनप्रवृत्तिमान् । तदाभासोपि हरिप्रतिबिंबभूतश्च । हरिःमत्स्यादिसर्वरूपेष्वपिसदासमइत्यर्थः । तथाचजीवस्येशाधीनप्रवृत्तिमत्त्वादीशप्रतिबिंबत्वाच्चमत्स्यादेस्तदुभयाभावात्तयोरीशांशत्वाविशेषेपिनसाम्यापत्तिः । जीवस्यभिन्नांशत्वान्मत्स्यादेरभिन्नांशत्वादितिभावः । अत्रोक्तासुसर्वास्वपियोजनासुउक्तार्थेषुप्रमाणापेक्षायांवैदिकवचनपरामर्शकतयातेनैवेतिपदंप्रतियोजनमनुवृत्यभाष्योक्तवचनान्यूह्यानि । ग्रंथगौरवभयान्नप्रपंच्यते । नन्वथापिजीवस्यरूपंरूपंप्रतिरूपोबभूवेतिप्रतिबिंबत्वश्रुतेर्नैवांशोनसंबंधइत्यप्रतिबिंबत्वश्रुत्यासुरनरादिविचित्रजीवराशेरविचित्रेश्वरप्रतिबिंबत्वायोगादितियुक्त्युपेतयाविरुद्धत्वेनामानत्वप्राप्तेरित्यतःप्राप्तं अदृष्टानियमादित्यादिसूत्रत्रयं । तदर्थः तदाभासोहरिःसर्वरूपेष्वपिसमःसदेति । अपिस्तथापीत्यर्थः । जीवइत्यस्ति । यद्यपिहरिःसर्वरूपेषुसदासमःएकरूपः । तथापि जीवस्तदाभासःहरिप्रतिबिंबइत्यर्थः । बिंबावैचित्र्येपितदीयानाद्यदृष्टवैचित्र्येणदेवदानवमानवादिवैचित्र्यसंभवात्प्रतिबिंबता युक्तेतिभावः । एतस्मिन्नेवार्थेजीवस्तद्वशगःसदेतिवानुवर्त्यतच्छब्दस्यबुद्धिस्थादृष्टाद्यर्थपरामर्शित्वंवर्णयित्वोक्ताभिप्रायोध्येयः ॥ ३७ ॥

॥७॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांद्वितीयाध्यायस्यतृतीयःपादः ॥२॥३॥

SGDF Sri Gargeshwari Digital Foundation

नन्वेवंकतिपयश्रुत्यविरोधेपिश्रुतिस्मृत्युदितयुक्तिसहितश्रुतिविरोधस्तुप्रागुक्तसमन्वयसिद्धगुणानांस्यादित्यतःप्राप्तःचतुर्थपादः । तदर्थमाह उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशः इत्यग्रेतनार्धेनात्राप्याकृष्टेन। नकेवलंकतिपयश्रुत्यविरोधोपिकिंतुसर्वशः। सर्वेणश्रुत्याद्युपात्तयुक्तिसहितेनापिवेदेनाविरुद्धाः उक्ताःप्रतिपादिताःसूत्रकृतास्मिन्पादइत्यर्थः । तथाहि श्रुतिसमन्वयेनयत्सर्वकर्तृत्वादिगुणोहरिरित्युक्तंतदयुक्तं । यत्प्राप्तिर्यत्परित्यागइतिस्मृत्युक्तसर्वजन्ममृतिहेतुत्वयुक्त्युपेतयानैषप्राणउदेतीतिप्राणानुत्पत्तिश्रुत्याआत्मतएषप्राणोजायतइतिप्राणोत्पत्तिश्रुतेरप्रमाणत्वादित्यतःप्राप्तं श्रेष्ठश्चेति सूत्रद्वययुक्तंषष्ठमधिकरणं । तदर्थमाह । मुख्यप्राणश्चेति । तदुद्भवइतिअत्राप्याकृष्यते। चशब्दोप्यर्थःसंस्तेनाप्यन्वेति। तच्छब्दःपूर्वप्रकृतजीवेश्वरयोःपरामर्शकः तदुद्भवश्च । तस्यजीवराशेरुद्भवोजन्म उपलक्षणमेतत्। मृतिश्चयस्मात्सइतिव्युत्पत्त्यासर्वजीवजनिमृतिहेतुरपि । मुख्यप्राणश्च तदुद्भवः तस्मात्प्रकृतहरेःसकाशादुद्भवोजन्मयस्येतिव्युत्पत्त्याभगवदधीनोत्पत्तिमानित्यर्थः । नकेवलमेतेनमातरिश्वेत्यत्रोक्तोबाह्योमुख्यवायुः किंतुआध्यात्मिकप्राणरूप्यपीतिवावक्ष्यमाणेंद्रियापेक्षयावासमुच्चयेचशब्दः । तेन एतेनमातरिश्वाव्याख्यातइत्यनेनापौनरुक्त्यंसूचितं । अत्रउद्भववानित्येवपूर्तौअत्रपुनर्विप्रतिपत्त्यभावेनकारणत्वस्यसूत्रकृताविचारात्सिद्धवत्कृत्यतदुद्भवइत्युक्तं । तदुत्पत्तिःपराधीनविशेषावाप्तिरूपेतिसूचयितुंवा । तेनसौक्ष्म्येणवाएषोवतिष्ठतेस्थूलत्वेनोदेतीतिश्रुत्युक्तदिशानुत्पत्तिश्रुतिःस्वरूपपरा । जन्मश्रुतिःशरीरपरेतिव्यवस्थासूचिता । प्राणइत्येवपूर्तौमुख्यप्राणइत्युक्त्यामुख्यप्राणःपरस्माच्चेतिस्मृत्यादिसिद्धंहरेर्मुख्यप्राणजन्मेतिसूचितं । तेनयत्प्राप्तिर्यत्परित्यागइत्याद्युक्तमाहात्म्यवतोपिततोप्यतिमहतोहरेरुत्पत्त्युक्त्यायुक्तिविरोधोप्यपोढः । त

SGDF
Sri Gargeshwari Digital Foundation

दुक्तंन्यायविवरणे । महत्त्वान्महतांविष्णुःकर्ताप्राणस्यचैकराट् । किंनामनसृजेदेषयेनशक्त्येदमावृतमितिश्रुतेस्ततोपिमाहात्म्या
द्विष्णोरिति । नन्वथापिसर्वेवाएतेमुख्यदासाइति मुख्यस्यैवरूपाणिप्राणाद्या इतिचश्रुत्योःप्राणापानव्यानोदानसमानशब्दितप
चवायूनांमुख्यप्राणदासत्वतत्स्वरूपत्वबोधिकयोःप्राणापानादयःसर्वइतिस्मृत्युक्तमुख्यप्राणाज्ञाधीनत्वयुक्त्या पायूपस्थेअपानंच
क्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठतेमध्येतुसमानएषह्येतद्धुतमन्नंसमंनयतीत्यादिश्रुत्युक्तव्यक्तसद्गुणत्वयुक्त्याचोपेतयोस्तु
ल्यबलयोर्विरुद्धत्वेनाप्रामाण्येप्रागुक्तसमन्वयायोगइत्यतःप्राप्तं । पंचवृत्तिर्मनोवद्व्यपदिश्यतइत्यष्टममधिकरणं । तस्याप्यर्थः
मुख्यप्राणइति। प्राणशब्दोत्रयएषप्राणइतरान्प्राणानित्यत्रेवप्राणापानव्यानोदानसमानाख्यपंचवायुपरः । तंत्रेणवर्गद्वयवाची।
एवंचमुख्याःप्रधानाःस्वरूपभूताइतियावत् । प्राणशब्दिताःप्राणापानादयःपंचवायवोयस्यसइति । तथामुखेप्रधाने । मणिर्मुखंप्र
धानश्चेत्युत्तमस्यवचोभवेत्।इतिबृहद्भाष्योक्तेः । भवामुख्याः । प्रधानवायावुत्पन्नाइतियावत्।प्रधानवायुदासभूताःप्राणाःप्राण
शब्दिताःपंचवायवोयस्यसइतिच । मुख्यप्राणइत्यर्थः । अतएवप्राणइतिवाश्रेष्ठइतिवानिर्देशमकृत्वामुख्यप्राणइतिनिरदिक्षत् ।
स्वरूपभूतप्राणादिपंचकवान्दासभूतप्राणादिपंचकवांश्चमुख्यप्राणस्तदुद्भवइत्यन्वयेनचवर्गद्वयस्यापितेजोतस्तथाह्याहेत्युक्तन्याये
नेश्वरादेवजन्मेत्यपिसूचयितुमेवंनिर्देशः। अन्यथापृथगेवतदर्थमवक्ष्यत्। नन्वथापिप्राणएवाधस्तादितिप्राणव्याप्तिपरश्रुत्यायतः
सर्वंजगद्व्याप्तमितिस्मृत्युक्तजगद्धारकत्वयुक्त्युपेतयाप्राणोऽणुरितिश्रुतेरमानत्वेप्रागुक्तसमन्वयायोगइत्यतःप्राप्तं । अणुश्चेतिन ॥ ३८ ॥
वमाधिकरणं । तदर्थः मुख्यप्राणश्चेति । प्रकृष्टमननंचेष्टायस्येतिप्राणः । अनचेष्टायामितिधातोर्भावेघञ् । मुख्यश्चासौप्राण

श्चेतिप्रकृष्टचेष्टाख्यक्रियावान्मुख्यप्राणइत्यर्थः । तथाचउत्क्रांतिगत्यागतीनामित्युक्तन्यायेनोत्क्रांत्यादिक्रियावत्त्वादणुरित्यर्थः ।
चशब्दाद्व्याप्तश्चेतिसमुच्चीयते । अंतर्वाणुर्बहिर्महानितिश्रुत्यादेहांतःप्राणरूपेणाणुत्वस्यबहिर्मुख्यवायुरूपेणव्याप्तत्वस्यावगमा
दितिभावः । प्राणइत्येवपूर्तौमुख्यप्राणइत्युक्तिःअणुर्वैमुख्यप्राणोयउत्क्रामतिनाडीभिरितिन्यायविवरणोक्तश्रुतिसूचनाय । श्रे
ष्ठोणुरित्येववाच्येयौगिकप्राणशब्दोक्तिरुत्क्रांतिसूत्रोक्तन्यायस्मारणार्था । तथाचप्राणाणुत्वश्रुतेरपिसयुक्तिकत्वान्नव्याप्तिश्रुतिबा
धेनाप्रामाण्यमितिभावः ॥ ९ ॥ नन्वथापिनोपादानंहींद्रियाणामितिस्मृत्युक्तनिरुपादानत्वयुक्त्युपेतया प्राणाएवानादयइतींद्रि
याणामनुत्पत्तिश्रुत्या तथानित्यंमनोनादित्वात् नह्यमनाःपुमांस्तिष्ठतीतिसयुक्तिकमनोनुत्पत्तिश्रुत्या तथावाग्वावनित्या नह्येषो
त्पद्यतेऽस्यांहिश्रुतिरवतिष्ठतइति अनादिनित्यश्रुत्याश्रयत्वयुक्त्युपेतयावागिंद्रियानुत्पत्तिश्रुत्याच एतस्माज्जायतेप्राणोमनःसर्वें
द्रियाणिचेतिसर्वेंद्रियोत्पत्तिश्रुतेर्विरुद्धत्वेनाप्रामाण्येप्रागुक्तसमन्वयायोगइत्यतःप्राप्तानि तथाप्राणाः । तत्प्राक्श्रुतेश्च । त
त्पूर्वकत्वाद्वाचइतित्रीण्यधिकरणानि । तेषामर्थः इंद्रियाणीति । तदुद्भवानीतिविपरिणम्यान्वेति । बहुवचनेनवाङ्मनस
योरपिग्रहः । मनःप्रभृतिसर्वाण्यपींद्रियाणिहर्यधीनोत्पत्तिमंतीत्यर्थः । अत्रोत्पत्तिमंतीत्येववाच्येतदित्युक्तिरुक्ताभिप्राया । तेनें
द्रियाणामनुत्पत्तिश्रुतिःसूक्ष्मरूपपरा जन्मश्रुतिस्तूपचयपरेतिव्यवस्थासूचिता । नित्यान्येतानिसौक्ष्म्येणहींद्रियाणितुसर्वशः ।
तेषांभूतैरुपचयःसृष्टिकालेविधीयतइत्यादेः मनःप्रभृतेरल्पोपचयादिनानित्यत्वोक्त्युपपत्तेरितिनयद्वयस्यविशेषशंकानिरासेनप्राण
नयोक्तार्थमात्रसमर्थनपरत्वद्योतनायवा वाङ्मनसयोरपिसहनिर्देशःकृतः ॥ १ ॥ २ ॥ ३ ॥ नन्वथापिसप्तप्राणाःप्रभवंतित

SGDF Sri Gangeshwari Digital Foundation

स्मात्सप्तार्चिषइति द्वादशवाएतेप्राणाद्वादशमासाइति इंद्रियाणांसंख्याविषयश्रुत्योरभिमन्यमानयोःसमसंख्यानियमेनाभिमानिनांसप्तत्वद्वादशत्वरूपसंख्यावत्त्वेनाभिमन्यमानेंद्रियाणामपितथात्वमितियुक्तेरुभयत्रसाम्येनतुल्यबलयोर्द्वयोरपिविरुद्धत्वेनाप्रामाण्यप्राप्तेरित्यतःप्राप्तं सप्तगतेरित्यादि सूत्रद्वयं । तस्याप्यर्थःइंद्रियाणीत्युक्त्यासंगृहीतः । श्रोत्रादीनितुपंचैवतथावागादिपंचकं । मनोबुद्धिसहायानिद्वादशैवेंद्रियाणिनित्वित्युक्तदिशामनोबुद्धिसाहित्येनश्रोत्रादिपंचकस्यसप्तत्वेनसप्तप्राणाइतिश्रुतेः द्वादशेत्युक्त्याद्वादशवाइतिश्रुतेश्चोपपत्तेःसूचनात् । अन्यथाप्राणाइत्येवब्रूयादिति ॥ ४ ॥ नन्वथापिदूरश्रवणदर्शनादियुक्त्युपेतया दिवीवचक्षुराततमितींद्रियव्याप्तिश्रुत्या प्राणावाअणवइतितदणुत्वश्रुतेर्विरुद्धत्वेनाप्रामाण्यंस्यादित्यतःप्राप्तं अणवश्चेति । तस्याप्यर्थःइंद्रियाणीत्युक्त्यैवसंगृहीतः । विषयद्रवणात्तेषामिंद्रियत्वमुदाहृतमित्युक्तदिशाद्रवणरूपक्रियावत्त्वेनाणुत्वस्यध्रुवादिपर्यंतंद्रवणोक्त्यातेजसाव्याप्तत्वस्यचसूचनेनेंद्रियाणुत्वानणुत्वश्रुत्योरविरोधसूचनादिति । अत्रसूत्रेषुतारतम्यक्रमानुरोधेनेंद्रियाणांविचारानंतरंसर्वेंद्रियप्रेरकस्यमुख्यप्राणस्यविचारइतिभावेनतस्याभ्यर्हितत्वंसूचयितुंभाष्येक्रमोल्लंघनं ॥ ५ ॥ नन्वथापिजीवस्यकरणान्याहुःप्राणानितींद्रियाणांजीवकरणत्वश्रुत्याजीववशत्वेनानुभवाज्जीवकरणानीतियुक्त्युपेतयाविरुद्धत्वेन ब्रह्मणोवाएतानिकरणानीतिब्रह्मकरणत्वश्रुतेरमानत्वेप्रागुक्तसमन्वयायोगइत्यतःप्राप्तं ज्योतिराद्यधिष्ठानंत्वित्यादिसूत्रत्रयोपेतंदशमाधिकरणं । तस्याप्यर्थः इंद्रियाणितदुद्भवानीति । सूक्ष्मरूपेणनित्यानींद्रियाणिसृष्टिकालेभूतैरुपचयरूपेशाधीनोत्पत्तिमंतीत्युक्त्या ॥ ३९ ॥
सर्वभूतप्रेरकेश्वरप्रयोज्यत्वस्यभूतकार्यैंद्रियाणांसूचनेनब्रह्मकरणत्वस्य जीवकरणत्वश्रुतेःजीवेंद्रियसंबंधस्यबहुकालीनपरत्वस्यच

SGDF Sri Gargeshwari Digital Foundation

सूचनात् । अन्यथेंद्रियाण्युत्पत्तिमंतीत्येवब्रूयात् । तदितिनावक्ष्यत् । अत्रतत्प्रयोज्यानींद्रियाणीत्येववाच्येतदुद्भवानीत्युक्तिः भूतप्रेरकत्वादीश्वरस्यतत्कार्येंद्रियप्रयोजकत्वंन्याय्यमितिज्योतिराद्यधिष्ठानमितिसूत्रांशसूचितयुक्तिसूचनार्था । यद्वातेनेशेनोद्भवः कार्याभिमुख्यंयेषांतानितदुद्भवानितत्प्रयोज्यानीत्यर्थः ॥ १० ॥ नन्वथापिप्राणावाइंद्रियाणिप्राणाहीदंद्रवंतीतिसामान्यतो मुख्यप्राणतदन्यप्राणमात्रेंद्रियत्वश्रुत्याविषयद्रवणरूपयुक्त्युपेतया द्वादशैवेंद्रियाण्याहुर्मनोबुद्धीतुद्वादशेइतिश्रुतेर्विरुद्धत्वेनामानत्वंस्यादित्यतःप्राप्तं तइंद्रियाणितद्व्यपदेशादित्यादिसूत्रत्रयात्मकैकादशाधिकरणं । तस्याप्यर्थः मुख्यप्राणश्चेंद्रियाणीति । मुख्यप्राणस्येंद्रियाणांचपार्थक्येननिर्देशात्संगृहीतः । तेनमुख्यप्राणस्यानिंद्रियत्वंतदन्येषामिंद्रियत्वमित्यर्थस्यसूचनेनद्वादशैवेतिश्रुतेर्मुख्यप्राणादन्यप्राणानांद्वादशत्वेनतत्परत्वस्यप्राणावाइंद्रियाणीतिसामान्यश्रुतेर्द्वादशैवेंद्रियाण्याहुःप्राणोमुख्यस्त्वनिंद्रियमितिविशेषश्रुत्यनुरोधेनमुख्यप्राणेतरप्राणपरत्वस्यचसूचनात् । अतएवप्राणाइत्यनुक्त्वाइंद्रियाणीत्युक्तिः । एवंसप्ताधिकरण्याइंद्रियविषयत्वद्योतनायेंद्रियाणीत्युक्त्यासप्तनयार्थमपिसमक्षिपत् । केचित्तुप्रागुक्तसर्वकर्तृत्वसिद्ध्यर्थइतरानादित्वशंकानिरासेनतदुत्पत्तिसमर्थनपरप्रधानाधिकरणप्रमेयस्यैवात्रसंक्षेपःकृतोनत्ववांतराधिकरणप्रमेयस्यापि । अनुभाष्येपिकिंचिन्निरूपणस्यदर्शनादित्याहुः ॥११॥ नन्वथापियस्माद्विरेचयेत्सर्वंविरिंचस्तेनभण्यतइतिस्मृत्युक्तविरिंचत्वयुक्तियुक्तयाविरिंचोवाइदंसर्वंविरेचयतीतिविरिंचस्यदेहादिकर्तृत्वश्रुत्यापरमाद्ध्येतेनामरूपेव्याक्रियेतेइतिहरेःतत्कर्तृत्वश्रुतेर्विरुद्धत्वेनामानत्वंस्यादित्यतःप्राप्तं । ॐसंज्ञामूर्तिकॢप्तिस्तुत्रिवृत्कुर्वतउपदेशादितिद्वादशमधिकरणं । तदर्थमाह । देहश्चैवतदुद्भवइति । देहइत्युपलक्षणं । नामरूपात्मक

SGDF
Sri Gargeshwari Digital Foundation

देहादिप्रपंचश्च । नकेवलंमुख्यप्राणइतिचार्थः । तदुद्भवएवनविरिंचोद्भवइत्येवकारार्थः । विरिंचकर्तृकत्वश्रुतिस्तुब्रह्माद्यास्तदवां
तराइतिस्मृत्याऽवांतरकर्तृत्वपरेतिभावः । अस्याधिकरणस्योपांत्यत्वेपिउत्पत्तिमत्त्वरूपैकार्थपरत्वद्योतनायक्रमोल्लंघनं । अत्रेशसं
भवइत्याद्यनुक्त्वातदितितत्पदप्रयोगेण सेयंदेवता इमास्तिस्रोदेवताः अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरोत्तासांत्रिवृतंत्रि
वृतमेकैकामकरोदित्यादिश्रुतौत्रिवृत्कर्तृत्वेनप्रसिद्धस्यपरामर्शमपिसूचयति । तेनरूपादिसृष्टेस्त्रिवृत्करणसापेक्षत्वात्तत्कर्तुरेवदेहा
दिकर्तृत्वमितियुक्तिःसूचिता ॥ १२ ॥ नन्वथापिआपोवावमांसमापःशरीरमिति पृथिवींशरीरमप्येतीति सोग्नेर्देवयोन्याआहुति
भ्यःसंभूयहिरण्यशरीरऊर्ध्वस्वर्गलोकमेतीतिचश्रुतिभिःप्रत्येकंशरीरस्याप्यत्वपार्थिवत्वतैजसत्वमात्रप्रापिकाभिःक्रमेणतत्प्रापकक
ठिनत्वादिरूपयुक्त्युपेताभिर्देहस्यैकैकभूतमात्रकार्यत्वप्राप्तेरिच्छयैकपक्षांगीकारेचान्यपक्षद्वयप्रापकसयुक्तिकश्रुतिद्वयस्य भूतत्रय
कार्यत्वेचापःशरीरमित्यादिविशेषोक्त्ययोगेनइमास्तिस्रोदेवताःपुरुषंप्राप्येतिभूतत्रयात्मकत्वश्रुतेश्चाप्रामाण्यादित्यतःप्राप्तं मांसा
दिभौममित्यादिसूत्रद्वयात्मकमंतिमाधिकरणं । तस्याप्यर्थमाह । देहश्चैवतदुद्भवइति । प्रागुक्तदिशात्रिवृत्पदसन्निधापितंवा
इंद्रियोपचयहेतुत्वेनसन्निधापितंवापृथिव्यप्तेजोरूपभूतत्रयंतदितिपरामृश्यते । देहश्चतदुद्भवएव । भूतत्रयजन्यएव । नत्वेकैकमा
त्रजन्यइत्येवकारार्थः । अत्रतदुद्भवइत्युक्त्यायस्मिन्देहेयस्यभूतस्योद्भूतिर्विशेषसंयोगोस्ति तन्निमित्तोविशेषव्यपदेशइतिसूचना
दापःशरीरमित्यादिविशेषश्रुतिगतिर्दर्शिता ॥ १३ ॥ नन्वथापियदाश्रयादस्यचेष्टेतिभारतोक्ताखिलचेष्टकत्वरूपमाहात्म्यवत्त्वा
त्प्राणःस्वतंत्रइतियुक्त्युपेतयानप्राणःकिंचिदाश्रितइतिप्राणस्वातंत्र्यश्रुत्या प्राणःपरवशोस्थितइतिप्राणपारतंत्र्यश्रुतेर्विरुद्धत्वेनाप्रा

माण्यंस्यादित्यतःप्राप्तं चक्षुरादिवदित्यादिसूत्रद्वयात्मकंसप्तममधिकरणं । तदर्थंभाषते । मुख्यप्राणवशेसर्वंसविष्णो
र्वशगःसदेति । सर्वंरुद्रादिजगत् समुख्यप्राणः । अत्रमुख्यप्राणःविष्णोर्वशगइत्येवपूर्तौमुख्यप्राणवशेसर्वमित्युक्तिः प्राणस्वा
तंत्र्यश्रुत्यादेरवांतरेश्वरानन्येश्वरपरत्वरूपगतिसूचनाय । अवांतरेश्वरत्वेनतस्येश्वरवचोभवेत् । अनन्येश्वरताप्राणेतदन्येश्वरव
र्जनादित्यादेः । तथाचक्षुरादेरिवमुख्यप्राणस्यापीशवशत्वेवांतरेश्वरत्वमपिनस्यात् तद्वदेवेतिशंकाव्युदासायचतत्राकरणत्वरूपयु
क्तिसूचनायमुख्यप्राणवशइतिमुख्यप्राणपदप्रयोगः । तानिहवाएतानिसर्वाणिकरणान्यथप्राणएवाकरणस्तस्मान्मुख्यस्तस्मान्मु
ख्यइत्याचक्षतइतिश्रुतेः । अत्रसर्वदाविष्णुवशगोनकदाचिदन्यथेत्युक्त्याउत्पत्ताविवपारतंत्र्येप्यस्तुकाचिद्व्यवस्थेतिनिरस्तं । मुख्य
प्राणःतदुद्भवइत्युक्त्यैवविष्णुवशइत्यस्यलाभोयद्यपि तथापीहप्राणस्वातंत्र्यश्रुत्यादिबलाच्छ्रेष्ठश्चेत्यत्रोक्तप्राणोत्पत्तिरयुक्तेतिशंका
यांप्राणस्यैतद्वशेसर्वमितिविशेषवाक्येनसामान्यस्वातंत्र्यश्रुत्यादेर्नेयत्वादितिपरिहारार्थत्वादस्याधिकरणस्यापौनरुक्त्यंध्येयं । अत
एवव्यवधानेनास्यभाषणं ॥ ७ ॥ अंतिमपादद्वयार्थोपसंहारंसूचयन्नध्यायार्थमुपसंहरति । सर्वदोषोज्झितस्तस्माद्भगवान्पु
रुषोत्तमः । उक्तागुणाश्चाविरुद्धास्तस्यवेदेनसर्वशइति । अत्रोत्तरार्धेपितस्मादित्यस्यानुवर्तनेनपादार्थोपसंहारस्तावद्बोध्यः ।
तथाहि । तस्माद्विरोधिभूतसर्वश्रुतीनांसावकाशितत्वात्तस्यभगवतःउक्ताःपूर्वाध्यायोक्तागुणाःस्रष्टृत्वादयोगुणाःसर्वशोवेदेनबा
ह्ययुक्त्युपेतेनश्रुतिस्मृत्युक्तयुक्त्युपेतेनचवेदेन । यद्वाधिभूताधिदैवपरमात्मजीवविषयेणाध्यात्मप्राणादिविषयेणचसर्वेणवेदेने
त्यर्थः । अविरुद्धाइत्यर्थः । समग्रश्लोकेनाध्यायार्थोपसंहारः । तथाहि । तस्मात्सर्वविरोधानांपरिहृतत्वाद्भगवान्पुरुषोत्तमःसर्व

SGDF
Sri Gargeshwari Digital Foundation

दोषोज्झितः । नकेवलमेतावत् । तस्यभगवतःसर्वशोवेदेनकृत्स्नवेदसमन्वयेनपूर्वाध्यायोक्तागुणाश्चाविरुद्धायुक्त्यादिविरुद्धान
भवंतीत्यर्थः॥ संक्षेपभाष्यविवृतौराघवेंद्रेणभिक्षुणा ॥ कृतायांतत्वमंजर्यांद्वितीयोध्यायईरितः ॥१॥ इतिश्रीमद्ब्रह्मसूत्राणुभा
ष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांद्वितीयाध्यायस्यचतुर्थःपादः ॥ ४॥ ॥ द्वितीयाध्यायःसंपूर्णः ॥छ॥
एवमुक्तदिशानिर्दोषानंतगुणोविष्णुश्चेत्किंमयाकार्यमित्यधिकारिणश्शंकायांमुक्तिहेतुभगवत्प्रीत्यर्थंसाधनमनुष्ठेयमितिभावेनसाध
नविचारार्थोयमध्यायइतिभाष्याद्व्यक्तं तत्राद्यपादेगत्यागतिस्वर्गनरकगर्भवासादिस्वरूपस्यैवोक्त्यामुक्तिहेत्वीशप्रीतिसाधनस्यानु
क्तेःकथमस्यपादस्यैतदध्यायेंतर्गतिरितिचोद्यनिरासायफलतोंतर्भावोक्तिपरतया तस्माद्विरक्तःसन्ज्ञानमेवसमाश्रयेदित्यंति
मभाष्यमादावप्याकृष्ययोज्यं । तथाहि । जीवइत्यनुवृत्तिःशेषोवा । तस्मादितिल्यब्लोपे इतिपंचमी । तदनुसंधायेति । एतत्पा
दप्रतिपाद्यमनुसंधायजीवोविरक्तोभवन्निितिज्ञानान्यसाधनेतज्जन्यफलेचवैराग्यायस्वर्गादिस्वरूपनिरूपणमत्रक्रियतइत्यर्थः । ननु
कथंवैराग्यमपिमुक्तिहेतुगतिजनकं । येनसाधनाध्यायांतर्भावोस्यपादस्यस्यादित्यतोपि तस्माद्विरक्तःसन्निति । तस्माद्वैराग्या
त् । विशब्दवाच्येपरमात्मनि । विःपक्षिपरमात्मनोरित्यभिधानात् विशेषेणरक्तःस्नेहयुक्तःभक्तइतियावत् । भवन्निति । अन्य
त्रवैराग्यात्भगवतिभक्तिदार्ढ्यंभवतीत्यर्थः। ननुतावतापिकथमीश्वरप्रीतिः। प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइतिज्ञानस्यैवमु
क्तिहेतुप्रीतिजनकत्वोक्तेरित्यनूक्तं । ज्ञानमेवसमाश्रयेदिति । अन्यत्रवैराग्याद्भगवतिदृढभक्तिमान्सन् । संशब्दोक्तैःश्रवण
मननिदिध्यासनरूपसाधनैरीश्वरज्ञानमेवाश्रयेदित्यर्थः । एवंपरंपरयावैराग्यस्यमुक्तिहेतुज्ञानोपायत्वोक्त्यावैराग्यभक्त्युपासन

SGDF Sri Gargeshwari Digital Foundation

ज्ञानपादानांचतुर्णांक्रमबीजमपिसूचितं । तदुक्तमनुभाष्ये । वैराग्यतोभक्तिदार्ढ्यंतेनोपासायदाभवेत् । आपरोक्ष्यंभवेद्विष्णोरिरिति पादक्रमोभवेत् । ननु भूतबंधस्तुसंसारोमुक्तिस्तेभ्योविमोचनं । भूतानांविनिवृत्तिस्तुमरणमितिस्मृतिभ्यांमृतिमात्रेणमुक्त्यवगमात् किंवैराग्यादिसाधनेनेत्यतःशुभादिकृतःमृत्वालोकांतरंगच्छतोजीवस्यभूतैरविनाभावसमर्थनार्थंसूत्रं तदंतरप्रतिपत्तौरंहतीत्यादि । तत्रविशेषाशंकासमाधानाभ्यांतदर्थस्यैवसमर्थनार्थं त्र्यात्मकत्वादित्यादीनिपंचाधिकरणानि । तेषांसूत्राणांतात्पर्यार्थंभाषते । शुभेनकर्मणास्वर्गमिति । जीवइत्यन्वेति । यातीत्याकृष्यते । इहमृत्वागच्छन्जीवःशुभेनपुण्येनकर्मणास्वर्गयाति । नतुशुभकर्मकृत्मुक्त्याख्यंपरंपदंयातीत्यर्थः । तथाचमरणमात्रेणपुनरावृत्तिमल्लोकस्यैवप्राप्त्यामोक्षाभावात् । भूतनिवृत्तेर्मुक्तित्वेपिमृतौनिःशेषभूतनिवृत्तेरभावात् । तदर्थंकाम्यशुभकर्मणिवैराग्यंविधेयमितिभावः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ननुतथाप्यपामसोममृताअभूमेत्यादिनाशुभकृतोपिमुक्तिप्रतीतेर्नपुण्येवैराग्यंयुक्तमित्यतःप्रासं । भाक्तंवानात्मवित्त्वात्तथाहिदर्शयतीति । तस्याप्यर्थः । शुभेनकर्मणास्वर्गमिति । ज्ञानेनैवपरंपदंयातीत्येतदप्याकृष्यते । काम्यकर्मकृच्चेत्तदासोमयागादिरूपशुभकर्मणास्वर्गयातिनतुमोक्षंनापिज्ञानमित्यर्थः । अपामेतिश्रुतौश्रुतममृतं किंचित्कालीनंस्वर्गाख्यमेव । नतुमुख्यमितिभावः । अकाम्यकृच्चेत्तदासोमयागाद्यकाम्यशुभकर्मणाजातेनेतिशेषः । ज्ञानेनैवपरंयातिनतुसाक्षादित्यर्थः । साक्षादेवकुतोनेत्यतोपि ज्ञानेनेति । यतो ज्ञानेनैवपरंपदंयातिनत्वन्येनातइतियोज्यं । तमेवंविद्वानमृतइहभवतिनान्यःपंथाअयनायेतिश्रुतेरितिभावः । ज्ञानेनैवपरंपदमित्यस्यात्रैववाच्यत्वेपिज्ञानफलयोःसर्वातिशयद्योतनायांतेभाषणं ॥ ७ ॥ नन्वथापिकृतस्यकर्मणःस्वर्गादौभोगेननिःशेषकरणात्कर्म

SGDF
Sri Gurgeshwari Digital Foundation

णाबध्यतेजंतुरित्यादेःकर्मनिबंधनस्यबंधस्यकर्माभावेस्थित्ययोगात्किंवैराग्येणेत्यतःप्राप्तं । कृतात्ययेनुशयवान्दृष्टस्मृतिभ्या मिति । तस्याप्यर्थः । शुभेनकर्मणास्वर्गमिति । विकर्मणेतियातीतिचान्वेति । कर्मणेत्यादितृतीयासहयोगे । सहयुक्तेप्रधा नइतिपाणिनीयस्मृतौविनापितद्योगंतृतीयाभवतीतितदभियुक्तव्याख्यानात् । वृद्धोयूनातल्लक्षणश्चेदेवविशेषइत्यत्रेव । अस्वर्गमिति चपदच्छेदः । तच्चस्वर्गादन्यमस्वर्गमितिभूलोकपरः । नञ्यूक्तमिवयुक्तमन्यस्मिन्सदृशाधिकरणेप्रतिपत्तिंगमयतीतिशाब्दिकन्या यात् । इमंचामुंचोभौलोकावनुसंचरतीत्यादौद्यावाभूम्योःप्रतिद्वंद्वितयाप्रसिद्धेश्च । तथाचकर्मणाविकर्मणाचसहतद्युक्तएवास्वर्गंभू लोकंयातीत्यर्थः । स्वर्गाल्लोकाद्भूलोकंपुण्यादिकर्मशेषयुक्तएवप्राप्नोति । तथाहि । स्वर्गादौभोगेनकर्मणोनिःशेषनाशाभावात् । तत्रवैराग्यंकार्यमितियुक्तमितिभावः ॥ ८ ॥ नन्वथापिकर्मी येनमार्गेणस्वर्गादिलोकंगतःतेनैवमार्गेणभूलोकंप्रत्यागच्छति । अप रिचितमार्गांतरकृतक्लेशाभावाच्चातीवकर्मादौवैराग्यंनविधेयमित्यतःप्राप्तं । यथेतमनेवंचेति । तस्याप्यर्थः । शुभेनकर्मणा स्वर्गंयातीति । स्वर्गमस्वर्गमितिचद्वेधाचपदच्छेदः । आङोप्यत्रोपश्लेषः । यथातथेतिशेषः । तथाच शुभेनकर्मणास्वर्गंयथायेन मार्गेणयाति । अस्वर्गंभूलोकंचईषत्तथायातीत्यर्थः । येनमार्गेणस्वर्गंप्राप्तःतेनैवमार्गेणकिंचिद्दूरमागत्यततोर्वाङ्मार्गांतरेणभूलोकं यातीत्यर्थः । धूमादभ्रमित्यादिभाष्योक्तश्रुतेरितिभावः । ईषदर्थेक्रियायोगेमर्यादाभिविधौचयः । एतमातंङित्तंविद्याद्वाक्यस्मरण योरङित् । इतिशाब्दिकोक्तेरीषदर्थत्वमाङोबोध्यं ॥ ९ ॥ नन्वथापिनकर्मणिवैराग्यं । रमणीयचरणारमणीयांयोनिमापद्यंतइ तिगमनागमनादेःकर्मांगभूताचारफलत्वश्रवणेनकर्मफलत्वाभावादित्यतःप्राप्तं । चरणादितिचेन्नतदुपलक्षणार्थेत्यादिसूत्रत्र

यं । तस्याप्यर्थः । शुभेनकर्मणास्वर्गंयातीति । स्वर्गमस्वर्गंभूम्यादिकंवायज्ञादिकर्मणायातिनतुतदन्येनाचारेणेत्यर्थः । श्रुतौ चरणशब्दस्ययज्ञादिकर्मोपलक्षणार्थत्वस्यवा यज्ञादिकाम्यार्थत्वस्यवोपपत्तेरितिभावः ॥ १० ॥ ननुतर्हिअस्तुकाम्येयज्ञादिकर्म णिवैराग्यं आगमनादेर्यज्ञादिशुभकर्मफलत्वात् । नतुविकर्मणिवैराग्यं । पापकृतःप्रत्यवायभयाभावेनपतनाभावात् । बिभ्यत्पत तिपादपादितिन्यायादित्यतःप्राप्तं । अनिष्टादिकारिणामपिचेत्यादिसूत्रत्रयं । तदर्थमाह । निरयंचविकर्मणा । मिथ्या ज्ञानेनचतमइति । यातीत्यन्वेति । वीत्यभाववाचीविरुद्धवाचीच । नामरूपाद्विमुक्तइत्यत्रापिनामरूपाविमुक्तत्वमुच्यतेविप्रि यइत्यादिवदितिषट्प्रश्नभाष्येवीत्यस्याभावार्थत्वोक्तेः । अनिष्टादिकारीहिद्विविधः । अज्ञो मिथ्याज्ञानीचेति । तत्रद्वयोःफलमु च्यते । विकर्मणास्वोचितकर्माननुष्ठानेन विरुद्धकर्मणापापकर्मणाचनिरयंयाति । नरकंचप्रतिपद्यते नकेवलंशुभफलाप्राप्तिमात्रमि तिचार्थः । मिथ्याज्ञानिनोऽधिकंचाह । मिथ्याज्ञानेनतमश्चयातीति । नरकमनुभूयपश्चान्नित्यनरकंतमश्चप्राप्नोति । मिथ्याज्ञानार्ह विकर्मणिमिथ्याज्ञानेचवैराग्यंविधेयमितिभावः ॥ ११ ॥ ननुनित्यनरकोनामनास्त्येव । यावदिंद्राश्चतुर्दशेतिनरकभोगस्यानित्यत्वो क्तेरित्यतःप्राप्तं । अपिसप्तेति । तस्याप्यर्थःनिरयं तमइतिचनरकभेदोक्त्यासूचितः । रौरवोथमहांश्चेतिस्मृतौ नित्यानित्यनरकवि भागोक्त्या यावदिंद्राइत्यादेरनित्यनरकविषयत्वेननित्यनरकस्यतमसोभावादितिभावः ॥ १२ ॥ नन्वथापिनरकस्यदुःखात्मकत्वा न्नरकेतत्साधनेवानवैराग्यंकार्यं । नचतस्यदुःखरूपतांगीकर्तुंशक्या । तस्यदुःखात्मकत्वे तद्भोक्तृजीवाप्रेरकत्वे हरेःसर्वंप्रवर्तयतीतिसर्व प्रेरकत्वश्रुतिविरोधेन तत्प्रेरकत्वेवाच्येदुःखभोक्तृनरकस्थप्रेरकस्यहरेरपिदुःखभोगप्रसंगादित्यतोदुःखाभोगेनैवतत्प्रेरकत्वंहरेर्वक्तुंसू

SGDF
Sri Gargeshwari Digital Foundation

त्रं । तत्रापिचतद्व्यापारादविरोधइति । तस्याप्यर्थमाह । निरयंचविकर्मणेति । वेःविशब्दवाच्यस्यपरमात्मनःकर्मणाप्रेर
णरूपव्यापारेणजीवोनिरयंचयातीतियोज्यं । नकेवलमितरावस्थाः नरकदुःखमपि तत्प्रेरणयैवानुभवतिजीवइतिचार्थः । दुःखरू
पनरकानुभवितृप्रेरकत्वेपिईश्वरस्येश्वरत्वादेव । दुःखसाक्षात्कारकृतनीचोच्चतारूपभोगांभावोपपत्तेरितिभावः ॥ १३ ॥ यत्तुय
त्रदुःखंतत्रसुखमितिव्याप्तेस्तमस्यपिसुखमस्तीत्यतस्तस्यदुःखैकरूपत्वंवक्तुं नतृतीयेतथोपलब्धेरित्यादिसूत्रपंचकं।तस्याप्यर्थःवि
कर्मफलदुःखरूपनिरयादपिमिथ्याज्ञानफलत्वेनतमसोविशिष्योक्त्यासंगृहीतोबोध्यः । तिर्यक्षुनरकेचैवसुखलेशोविधीयतइत्यादेः
नरकेसुखलेशसत्त्वेपितमसितदभावसूचनात् ॥ १४ ॥ नन्वथाप्यथैतयोःपथोर्नैकतरेणच तानीमानिचक्षुद्रमिश्राण्यसकृदावर्तीनि
भूतानिभवंतीतिश्रुतावेतयोर्देवयानपितृयाणयोर्मध्येयान्येकेनापिपथानगच्छंतितानीमानि अल्पानिसुखदुःखमिश्राणिसदागत्या
दिमंतीतिदेवयानपितृयाणरूपफलएवजीवानांस्वातंत्र्यंप्रतीयते । नहिपुरुषप्रयत्नाविषये नगच्छंतीतिप्रयोगोयुज्यते । अतो मूले
लब्धफलोनैवशाखाग्रंगंतुमिच्छतीतिन्यायेनफलएवस्वातंत्र्यात्किंवैराग्यरूपसाधनेनेत्यतःप्राप्तं विद्याकर्मणोरितितुप्रकृतत्वा
दिति । तदर्थमाह । ज्ञानेनैवपरंपदंयातीति । शुभेनकर्मणास्वर्गमित्यनुवर्त्य कर्मणैवेत्येवकारान्वयः । शुभकर्मणैवस्वर्गंयाति ।
भगवज्ज्ञानेनैवपरमंपदंयाति । नतुस्वर्गंपरमंपदंवास्वातंत्र्येणयातीत्येवकारार्थः । तथाचफलरूपयोःपरपदयानस्वर्गयानरूपदेवया
नपितृयाणयोर्ज्ञानकर्मरूपसाधकायत्तत्वेनजीवानांतत्रफलेस्वातंत्र्याभावादीशाधीनमपिस्वातंत्र्यंकर्मादिरूपसाधनएवेतिकाम्यक ॥ ४३ ॥
र्मणिवैराग्यंकार्यमेवेतिभावः ॥ १५ ॥ नन्वथापिनकर्मणिवैराग्यंयुक्तं । धूमोभूत्वाभ्रंभवतीतिश्रुतौकर्मकृतोमहासुखहेतुदेवताभाव

SGDF Sri Gargeshwari Digital Foundation

स्योक्तेरित्यतःप्राप्तं। तत्स्वाभाव्यापत्तिरुपपत्तेरिति। तस्याप्यर्थमाह। ज्ञानेनैवपरंपदंयातीति। शुभेनेत्याकृष्यान्वेति। स्वर्गमेवेत्येवकारान्वयः। शुभेनकर्मणाजीवःस्वर्गमेवयाति। नतुदेवतात्वादिकं। कुतः यतोज्ञानेनैवस्वयोग्यज्ञानेनैव। परंउत्तमं पदं स्वर्गरूपंदेवत्वंदेवतापदवींवायाति। नतुकर्मणा विद्यागम्यंपदंयस्मादित्युक्तेरित्यर्थः। धूमोभूत्वेतिश्रुतिस्तु धूमादिभावप्राप्तिश्चतद्गतौगतिरेवचेत्यादिस्मृतेर्देवतासायुज्यपरेतिभावः॥ १६ ॥ यत्तुस्वर्गादवरूढस्यकर्मिणः यथेतमाकाशमाकाशाद्वायुःवायुर्भूत्वाधूमोभवतिधूमोभूत्वाभ्रंभवतिअभ्रोभूत्वामेघोभवतीत्यादौबहुस्थानप्राप्त्युक्तेः। अनेकस्थानेषुकल्पांतंतत्तद्देवतासायुज्येनमहासुखहेतुत्वात्। किंकर्मणिवैराग्येणेत्यतःप्राप्तं नातिचिरेणविशेषादितिसूत्रं। तदर्थस्य शुभेनकर्मणास्वर्गमितिप्राचीनभाष्येणैवभोगावशिष्टशुभकर्मादिसहितोजीवः आईषत् अल्पकालेनैव अस्वर्गंस्वर्गादन्यत्भूम्यादिकंयाति। नतुचिरेणेतियोजनयासंग्रहसंभवान्नपृथगुक्तिः। स्वर्गाल्लोकादवाक्प्राप्तोवत्सरात्पूर्वमेवतु। मातुःशरीरमाप्नोतीत्यादेरिति ॥ १७ ॥ ननुतइहव्रीहियवाओषधिवनस्पतयस्तिलामाषाइतिजायंतइतिश्रुतौकर्मिणोव्रीह्यादिभावश्रवणात्सुखसाधनतयावेदोपदिष्टकर्मवतांव्रीह्यादिभावेनदुःखित्वेब्राह्मणोनिर्वेदमायादित्यादिवेदविहितवैराग्यादावपितच्छंकास्यात्। यज्ञानांहिंसायुतत्वेनततःपापस्यसंभवेनदुःखहेतुत्वस्यन्याय्यत्वेनसुखहेतुत्वेनविधानायोगाच्चेत्यतःप्राप्तं। अन्याधिष्ठितेपूर्ववदभिलापादित्यादि योगद्वयं। तदर्थस्यापिशुभेनैवेतिभाष्येणैवशुभेनकर्मणास्वर्गंयातीति यज्ञादिकर्मणःशुभत्वस्वर्गरूपसुखहेतुत्वयोरुक्त्या तथाशुभेनकर्मणाऽस्वर्गंस्वर्गादन्यत्पदमित्यन्वेति व्रीह्यादिस्थानमेवयाति। नतुतद्भावंप्राप्नोतीत्युक्त्याचसंग्रहोबोध्यः। यागीयहिंसायाःब्रह्महिंसावन्निषिद्धत्वाभावात्। प्रत्युतवायव्यंश्वेत

SGDF
Sri Gurgeshwari Digital Foundation

मालभेतेतिविहितत्वाच्च पापाहेतुत्वेनशुभत्वात्पापाहेतुत्वेनैवदुःखानापादकत्वात्तदुक्तयज्ञानांसुखसाधनत्वंदुःखाहेतुत्वंचयुक्तमेव । श्रीह्रियिवाइतिश्रुतिस्तुश्रीह्याद्यभिमानिजीवेनस्थानैक्यपरेतिभावः ॥ १८ ॥ यत्तु स्वर्गादवाग्गतश्चापिमातुरेवोदरंव्रजेदित्युक्तेः । स्वर्गादवरूढस्यपितृप्रवेशंविनैवमातृप्रवेशइत्याशंक्यपितृक्रमेणमातृप्रवेशंवक्तुंसूत्रं । रेतःसिग्योगोथेति । यच्चदेहंगर्भस्थितंक्वापिप्रविशेत्स्वर्गतोगतइत्युक्तेःपितृप्रवेशंयोनिप्रवेशंविनैवमातृप्रवेशोस्तु । आस्तीकादौदर्शनात् । द्रुपदमांधातृशुकादौदर्शनान्मातृप्रवेशोपिव्यर्थएवेत्याशंक्यकर्मिणांपितृक्रमेणयोनिद्वारामातृप्रवेशोस्त्यर्थंसूत्रं । योनेःशरीरमिति । तत्रपित्रादिक्रमेणैवजननमौत्सर्गिकं । क्वचिदन्यथाभावोबलवत्कारणकृतइतिभावेनप्रसिद्धत्वात् पित्रादिक्रममुक्त्वान्यथाभावेपिहेतुमाह । ज्ञानेनैवपरंपदं यातीति । शुकादिजीवायत्परंअन्यत्पदंस्थानंप्रसिद्धंमातापित्रादिस्थानंविना यत्स्थानांतर पुरुषमात्र प्रभृतिंयांति तज्ज्ञानेनैव भगवज्ज्ञानप्रभावेनैवेत्यर्थः । तेषांज्ञानित्वेनज्ञानप्रभावात्क्वचिदन्यथात्वेपि कर्मीपितृप्रवेशक्रमेणैवशरीरंप्रतिपद्यतइतिनियमाद्विधेयमेवकर्मणिवैराग्यमिति । तदुक्तमनुभाष्ये । जीवपुरुषयोनीनांसंगातिनियमोज्झितिं । अथशब्देनभगवानाहकारणतश्चतामिति । उक्तंचन्यायविवरणे । विशेषकारणादेवविशेषाज्जनिरिष्यते । सामान्यजननंचैवनृणांसामान्यहेतुतइति । उक्तंचसुधायां । जन्मकारणादृष्टाकृष्टोजंतुर्बीजादिसंबंधेनशरीरमापद्यतइत्युत्सर्गः । सचक्वचिज्ज्ञानतपोयोगादिलक्षणेनकारणविशेषेणापोद्यतइत्यादि । एवंसंक्षेपतोनिरूपितस्यैतत्पादीयाशेषनयार्थस्यपरंपरयामुक्तिहेतौवैराग्येउपयोगंवदन्नुपसंहरति । तस्मादिति । ज्ञानादन्यस्यास्थिरानर्थफलसाधनत्वात् । ज्ञानस्यैवस्थिरमहाफलसाधनत्वात् । अन्यत्रविरक्तःसन्भगवज्ज्ञानमेव संपदोक्तभ

क्तिश्रवणादिसाधनैराश्रयेत् । संपादयेदित्यर्थः ॥ १९ ॥ २० ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौराघवेंद्रयतिकृतायां तत्वमंजर्यांतृतीयाध्यायस्यप्रथमःपादः ॥ ३ ॥ १ ॥ एवमुक्तदिशोक्तार्थमनुसंदधतोधिकारिणोवैराग्योत्पत्तिसंभवेपि अनुबंधादिभ्यइतिवक्ष्यमाणदिशाभक्तिमतएवश्रवणादिभिरीश्वरापरोक्षज्ञानोदयाद्भक्तिनिरूपणार्थोयंद्वितीयःपादइति भक्तिरस्मिन्पादउच्यतइतिविस्तरभाष्यात्स्पष्टं । ननुतत्रभक्तिरुच्यतइतिकोर्थः । किंसाकर्तव्येतिविधीयतेकिंवातत्स्वरूपमुच्यते । नाद्यः । प्रयत्नागोचरत्वेनविधेयत्वाभावात् । नांत्यः । भगवन्माहात्म्यस्यैवनिरूपणेनभक्तिस्वरूपानिरूपणात् । भक्त्यर्थंभगवन्महिमोच्यतइतिश्रीमद्भाष्योक्तेश्च । नहिमहिमोक्तेर्भक्तावुपयोगोस्तीत्याशंकानिवृत्त्यर्थंविरक्तःसन्ज्ञानमेवसमाश्रयेदितिपूर्वभाष्यमत्रानुवृत्ययोज्यं । तथाहि । सन्नितिश्येनेनाभिचरन्यजेत अर्जयन्वसतीत्यादाविवलक्षणहेत्वोःक्रियायाइतिहेतौशतृप्रत्ययांतंपदं । वीतितंत्रं । विशब्दवाच्येपरमात्मनिविशेषेणरक्तःसन्रक्तोभवितुं भक्तोभवितुमितियावत् । भगवन्माहात्म्यज्ञानमेवसमाश्रयेत्संपादयेदित्यर्थः । माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोधिकः । स्नेहोभक्तिरित्युक्त्यामाहात्म्यज्ञानपूर्वकस्नेहस्यैवभक्तित्वान्माहात्म्यानुक्तौचतज्ज्ञानवत्स्नेहस्यचानुदयात्तयोरुत्पत्त्यर्थंअत्रपादेभगवन्माहात्म्योक्तिरितिभावः । अत्रैवकारेणैतच्चोद्यंप्रत्युक्तं । विनापिमाहात्म्यज्ञानंपुत्रादौस्नेहदृष्टेः । क्वचिन्माहात्म्यज्ञानेपिस्नेहादृष्टेरन्वयव्यतिरेकव्यभिचारान्माहात्म्यज्ञानंस्नेहाहेतुरिति । हेत्वंतरेणफलसिद्धावप्यस्यहेतुत्वाविरोधात् । कारिरींविनावृष्टिदृष्टेतिकारीर्यावृष्ट्यहेतुत्वाभावात् । ज्ञातमाहात्म्यस्यापिपुंसः स्नेहानुत्पत्तेर्मात्सर्यादिनिरुद्धत्वेनाकारणत्वानापादकत्वादितिभावः । ननुयदुक्तंप्रथमाध्यायेसर्वमीशाधीनमितितदसाध्विव ।

SGDF Sri Gangeshwari Digital Foundation

स्वाप्नपदार्थानामसत्यत्वेनतत्प्रतीतेर्बाह्यपदार्थाज्ञानाधीनत्वेनतेषांतत्प्रतीतेश्चेशाधीनत्वाभावात् । तथास्वाप्नतिरोधानमपिनेशाधीनं । स्वाप्नप्रतीतेर्बाह्यार्थाज्ञानाधीनत्वेनतदप्रतीतेर्बाह्यार्थज्ञानाधीनत्वौचित्यात् । जाग्रत्सुषुप्त्यवस्थयोरपिनेशाधीनत्वं । तयोःकालाद्यधीनत्वानुभवात् । सुषुप्तौजीवस्यसतासोम्यतदासंपन्नइतिश्रुत्याईशप्राप्त्युक्त्यातदधीनत्वोपगमेतदानाडीषुसुप्तोभवतीतिश्रुतिविरोधः । तथासुप्तप्रबोधस्यमूर्छायाश्चनेशाधीनत्वं । तयोर्भेरीताडनाद्यधीनत्वानुभवात् । मूर्छायामीशादन्यत्रचक्षुरादौजीवस्यावस्थाने जाग्रदाद्यवस्थानुप्रवेशेनभगवत्यवस्थानेसुप्तिसांकर्येणतस्याःपृथगवस्थात्वायोगाच्चेतिचोद्यानांनिरासायप्राप्तानि । संध्येसृष्टिराहहीति पराभिध्यानादिति देहयोगाद्वासोपीति तदभावोनाडीष्विति अतःप्रबोधोस्मादिति मुग्धेर्धसंपत्तिरिति षडधिकरणानि । तेषुकोमहिमाविष्णोरुक्तइत्यतस्तेषांभावार्थमाह । सर्वावस्थाप्रेरकश्चेति । सर्वासामवस्थानांस्वप्नतत्तिरोधानजाग्रत्सुषुप्तिसुप्तप्रबोधमोहरूपावस्थानांप्रेरको नियंता । सएकःपरमेश्वरइत्यग्रेतनंवाक्यमत्राकृष्ययोज्यं । वक्ष्यमाणेनसमुच्चयार्थश्चशब्दः । योऽध्यायद्वयेननिर्दोषगुणपूर्णोनिर्णीतःसइतितच्छब्दार्थः । स्वप्नतिरोधानसुप्तप्रबोधयोःपृथगवस्थात्वाभावेपिप्रसिद्धजाग्रदाद्यवस्थैकदेशत्वादेवावस्थात्वोक्तिः । यद्वाऽवस्थानामिति स्वप्नजाग्रत्सुषुप्तिमोहावस्थानामेवग्रहणंतत्तिरोधायकोबोधकश्चेतिचशब्दार्थः । यद्वावस्थाअवस्थितयःजीवानामवस्थानानि । तेषांप्रेरकइत्यर्थः । सूर्यादिभासकइतिवदयंनिर्देशोबोध्यः। अत्रसइत्युक्त्याप्रथमाध्यायोक्तमहिम्नएवात्रविशेषशंकानिरासेनप्रपंचनमितिसूचितं । तत्रपरमेश्वरइत्युक्त्यामनोगतांश्चसंस्कारान्स्वेच्छयापरमेश्वरः । प्रदर्शयतिजीवायेत्यादिवाक्यसूचनेनस्वाप्नानांमानसवासनोपादानेनेश्वरजन्य

SGDF
Sri Gargeshwari Digital Foundation

तयासत्यत्वांत् । बंधमोक्षादिसर्वेश्वरत्वात्स्वप्नाद्यवस्थाप्रेरकत्वंतस्ययुक्तमितिदर्शितं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ७ ॥ ननुलोके
राजादेःखंडेशत्वदर्शनेनेश्वरस्यापिकेषांचित्किंचिदवस्थायाःप्रेरकत्वमस्तु नसर्वेषांसर्वावस्थानामित्यतःप्राप्तं । सएवचकर्मानु
स्मृतिशब्दविधिभ्यइतिषष्ठमधिकरणं । तस्याप्यर्थः । सर्वेत्यादि । सर्वेतितंत्रं । सर्वासांप्रजानांसर्वासामवस्थानांप्रेरकःसः
यएकदेशप्रेरकत्वेनांगीकृतः सएकःपरमेश्वरःनत्वनेकइत्यर्थः । तत्रैकपरमपदाभ्यां प्रदर्शकस्तुसर्वेषांस्वप्नादेरेकएवतु । परमःपु
रुषोविष्णुरित्यादिवाक्यसूचनेनपरमेश्वरत्वहेतुरुक्तोभवति । अन्यथाईश्वरत्वमेवस्यान्नपरमेश्वरत्वं । तच्चवचनसिद्धमितिभावः ।
अत्रयद्यपितदभावोनाडीष्वितिनयेजीवस्यनाडीस्थितपरमात्मनिसुप्तिरित्युच्यते नतुसुप्त्यवस्थायामीशाधीनत्वं । तथामुग्धेर्धसंप
त्तिरितिनयेपिमोहावस्थायांजीवस्यभगवतिनसमग्रप्राप्तिः सुखानुसंधानात् । नाप्यप्राप्तिरेव । अन्यार्थादर्शनात् । अतःपरिशेषा
दर्धप्राप्तिरितिमोहावस्थानमेवोक्तं । नतुसुप्तिमोहावस्थयोरीशाधीनत्वमुच्यते । तथापितयोरवस्थयोरीशाधीनत्वस्यसएवचक
र्मानुस्मृतीत्येतन्नयेनैवसिद्धत्वंद्योतयितुंतदर्थोक्तिपर भाष्येणसर्वावस्थाप्रेरकइत्यनेनैवसहेतरषडधिकरणभावार्थोपिभाषितः । य
थोक्तंश्रीमद्भाष्येमोहनये । सोपिततएवेतिसिद्धमिति । नन्वेवंसुप्त्याद्यवस्थाप्रेरकत्वस्यापिसएवचेतिनयेनैवसिद्धेः । तदुक्त्यर्थे
संध्येसृष्टिराहहीत्यादिव्यर्थमितिचेन्न । सामान्यतोवस्थाप्रेरकत्वसिद्धावेवकिमेकदेशप्रवर्तकोथसर्वप्रवर्तकइतिचिंतावसरात् । अ
त्रसूत्रेषुजीवसंबंधिसुप्त्याद्यवस्थाप्रेरकत्वोक्त्याकैमुत्यन्यायसिद्धनानादेशकालस्थितनानाजडगतवृद्धिह्रासाद्यवस्थाप्रेरकत्वमित्य
पिसूचयितुंसर्वावस्थेतिसामान्योक्तिरिति ॥ ६ ॥ नन्वेवंसर्वेषांसर्वावस्थाप्रेरकत्वेधिष्ठानभूतप्रेर्यजीवानांसुरनरतिर्यगादिभेदेनभे

SGDF
Sri Gargeshwari Digital Foundation

दात्तत्प्रेरकोपिभिन्नाधिष्ठानगतघटादिवद्भेदवान्स्यात् । तथादक्षिणाक्षिमुखेविश्वोमनस्यंतस्तुतैजसः । आकाशेचहृदिप्राज्ञस्त्रिधा
देहेव्यवस्थितइति दक्षिणाक्ष्यादिदेशभेदेनविश्वोहिस्थूलभुङ्नित्यमिति जाग्रदादिकालभेदेनच तथा कार्यकारणबद्धौताविष्येते
विश्वतैजसौ । प्राज्ञःकारणबद्धस्त्वित्यादिरूपभेदवचनाच्चस्वरूपेषुभेदवान्स्यादित्यतःप्राप्तं । नस्थानतोपीत्यादिसूत्रत्रयं । त
दर्थमाह । सर्वरूपेष्वभेदवान् । सर्वदेशेषुकालेषुसएकःपरमेश्वरइति । सुरनरादिशरीरदक्षिणाक्ष्यादिसर्वदेशेषुजाग्रदा
दिसर्वकालेषुस्थितेषुविश्वादिसर्वरूपेष्वभेदवान्सपरमेश्वरइत्यर्थः । कुतइत्यतएकःपरमेश्वरइति । यतोनैवेश्वरद्वयमितिचक्षुरा
दिवत्त्वित्यत्रभाष्योक्तयुक्त्याएकोहिपरमेश्वरोनत्वनेकः । रूपाणांभेदेऽनेकेश्वरापातादितिभावः । ननुचरूपाणांभेदेप्येकस्मिन्नेव
रूपेभगवान्परमैश्वर्यवान् । अन्यानिरूपाणितदनुग्राह्याणिसंत्वतोनदोषइत्यतोपि । सर्वेति । सप्रागुक्तोभगवान्परमेश्वरःसर्व
देशकालस्थितरूपेष्वभेदवान् । अविशेषवानित्यर्थः । नन्वेवंसर्वदेशकालस्थितरूपाणामभेदेव्योमवत्पादाद्येकदेशेनैवतत्रतत्राव
स्थानमीश्वरस्येतिस्यात् । तच्चसप्तांगएकोनविंशतिमुखइत्यादिश्रुतिविरुद्धमित्यतोपि । सर्वेत्यादि । सर्वशब्दःसमग्रवाची ।
सर्वदेशेषुसर्वकालेषुसर्वरूपेषुपाणिपाद्यवयवैःसमग्ररूपेषुसत्सु अभेदवान्सपरमेश्वरइत्यर्थः । ननुसमग्ररूपेणसर्वदेशाद्यवस्थानंक
थंहरेरुपपद्यते । अन्यत्राद‍ृष्टत्वादित्यतः सएकःपरमेश्वरइतिहेतुगर्भे । सएकोपिपरमेश्वरत्वात्ताद‍ृशरूपेणाभेदवानिति । ऐ
श्वर्याद्रूपमेकंचसूर्यवद्बहुधेयतइतिस्मृतेरितिभावः । परमेश्वरइत्युक्त्यैव बद्धोबंधादिसाक्षित्वादितिस्मृतिसूचनेनभेदोक्तेर्गतिरपि ॥ ४६ ॥
सूचितेति ॥ ८ ॥ नन्वेवंसर्वदेशादौहरेःपाणिपादादिसमग्ररूपाणामवस्थितिमुपेत्यतेषामभेदोक्तौरूपवत्त्वाद्यज्ञदत्तवदनित्यत्वप्र

संगः । अरूपमव्ययं तदरूपमनामयमित्यादिश्रुत्यप्रामाण्यंचस्यादित्यतोहरेरप्राकृतरूपंवक्तुं अरूपवदेवेत्यादिसूत्रचतुष्टयं ।
तस्याप्यर्थः । सर्वेत्यादि । सपरमात्मासर्वरूपेष्वभेदवान् । सर्वस्वात्मीयकरचरणादिमद्विग्रहेष्वभेदवान् । ननुयज्ञदत्तादिजीव
संबंधिप्राकृतशरीरेषुयज्ञदत्तादिरिवभेदवानित्यर्थः।तथाचैकात्म्यप्रत्ययसारं आनंदरूपममृतमित्यादिश्रुतिस्मृतिभ्योज्ञानानंदाद्या
त्मकेश्वरतादात्म्येनरूपस्यप्राकृतदेहवैलक्षण्यात् । गृहांतर्नयनादिप्रकाशेसत्यपिचाक्षुषादिप्रकाशस्यलौकिकप्रकाशवैलक्षण्येनना
स्तिप्रकाशइत्यादिव्यवहारवत् अरूपमित्यादिश्रौतव्यवहारस्याप्राकृतरूपवत्त्वेनानित्यत्वाद्यप्रसंगस्यचोपपत्तेरितिभावः । कुतए
ताद‍ृशरूपवत्त्वंहरेः लोकेसर्वरूपाणांप्रकृत्याद्यात्मकत्वनियमादित्यतः सर्वदेशेष्वित्यादि । सर्वदेशेषुकालेषुसएकःपरमेश्वरः ।
प्रकृत्यादिसर्वस्वामीत्यर्थः । सर्वरूपाणांलोकेप्रकृत्याद्यात्मकत्वेपिहरेःप्रकृतिभूतादिसर्वेश्वरत्वान्नतत्रप्राकृतादिरूपंयुक्तं । स्वा
धीनेनस्वात्मबंधनाभावादितिभावः । क्वापिकदापिकिंचिदपिरूपंस्वात्मनाभिन्नंनेतिवक्तुंदेशकालसर्वपदानामुक्तिः । विवृतमेतद्द्वि
तीयगीताभाष्यादौतत्रतत्रैवेति ॥ ९ ॥ नन्वीश्वररूपाणांमत्स्यादीनामीश्वरेणाभेदेमत्स्यादीनामिवजीवादीनामपीश्वरांशत्वेने
श्वरेणाभेदोस्तु । नचपृथगुपदेशादितिजीवेश्वरभेदोक्तिविरोधः । सर्वजीवसमुदायस्येशत्वेनएकैकजीवस्येश्वरेणभेदाभेदादभेदेपि
भेदाविरोधादित्यतःप्राप्तं अतएवचोपमासूर्यकादिवदिति । तस्यतात्पर्यार्थमाह । सएकःपरमेश्वरइति । सविष्णुरेकःप
रमेश्वरः । नजीवोपीश्वरकोटौनिवेश्यतइत्यर्थः । अंशत्वंतुभेदेनैव । अंशोनानाव्यपदेशादित्यत्रद्वितीयेव्याख्यातमितिभावः
॥ १० ॥ ननुयदुक्तंजन्मादिसूत्रेसर्वकर्तेति सृष्टिस्थित्याद्यष्टव्यापारकर्तेति तदयुक्तं । सृष्टौसत्यांयावत्संहारंजगत्स्थितेःस्वतए

SGDF
Sri Gargeshwari Digital Foundation

वसिद्धेःसंहर्तुरसंहारातिरिक्तव्यापारस्यपालनरूपस्यायोगादित्यतःपालनाख्यंपृथग्व्यापारंवक्तुंप्राप्तं प्रकृतैतावत्त्वंहिप्रतिषेध
तीत्यादिसूत्रं । तथाभक्तिंविनास्तंभादेरिवपुरुषप्रयत्नेनैवेश्वरापरोक्ष्यसंभवाच्चभक्तिर्व्यर्था । तस्याव्यक्तैकस्वभावत्वेनस्तंभादि
वैलक्षण्येतुसुतरांव्यर्था । साधनशतेनापिताद्दशस्याद्दष्टस्येवापरोक्ष्यायोगादित्यतोनंतशक्तिकेनप्रसन्नेनेश्वरेणैवताद्दशस्यापिआपरो
क्ष्यंभवतीतिवक्तुंप्राप्तं तदव्यक्तमाहहीत्यादिसूत्रपंचकं । तथापूर्ववैशेषिकनयेसमवायापाकरणेनज्ञानानंदादिगुणानांवस्तुस्व
रूपत्वोपगमेनेश्वरस्यज्ञानादिगुणवत्त्वंनस्यात् । गुणवत्त्वांगीकारेचस्वरूपत्वंनस्यादित्यतोभगवतोगुणात्मकत्वंविशेषबलाद्गुणि
त्वंचेतिवक्तुं उभयव्यपदेशादित्यादिसूत्रचतुष्टयं । तेषामर्थमाह । परमेश्वरइति । एकइतिच । परश्चासौमेश्वरश्चेतिविग्रहः ।
सविष्णुःपरःपालकइत्यर्थः । पॄपालनपूरणयोःपचाद्यच् । धारणपोषणादिरूपव्यापारस्यरक्षादिरूपस्यभाष्योक्तश्रुत्यादिसिद्धत्वादि
तिभावः । मेश्वरःपरेत्यन्वेति । परस्यलोकविलक्षणस्याव्यक्तैकस्वभावस्येतियावत् । परमात्मनःसंबंधिन्याइतिवा परायाःउत्तमा
याइतिवा मायाःप्रमायाईश्वरापरोक्षज्ञप्तेरीश्वरःस्वामीत्यर्थः । नित्याव्यक्तोपिभगवानीक्ष्यतेनिजशक्तितइत्यादेः । अव्यक्तस्वभावो
पिप्रसन्नःसन्स्वात्मापरोक्षज्ञानंभक्तेभ्योददातीतिभावः । तथा एकःगुणादिभिरभिन्नइत्यर्थः । तर्हिकथंगुणित्वमित्यतोवस्तुसाम
र्थ्यापरपर्यायविशेषबलाद्गुणित्वंस्यादितिभावेनपरमेश्वरइति । यथाश्रुतएवार्थः ॥ १३ ॥ १४ ॥ १५ ॥ यत्त्वीश्वरज्ञानादिकंलौकिक
ज्ञानादिवदेवविज्ञानमानंदंब्रह्मेत्यादिनाज्ञानानंदादिपदवाच्यत्वादलौकिकंनेत्यतस्तस्यालौकिकत्वंवक्तुं परमतःसेतून्मानसंबं
धभेदव्यपदेशेभ्यइतिसूत्रत्रयं । तस्याप्यर्थः । सएकःपरमेश्वरइति । सएकोविष्णुरेवपरमेश्वरः । परमलौकिकंमाप्रमाआनं

SGDF Sri Gargeshwari Digital Foundation

दादेरुपलक्षणं। ज्ञानानंदादिगुणजातंयस्यसपरमः। सचासावीश्वरश्चपरमेश्वरइत्यर्थः। अलौकिकज्ञानादिमत्त्वेहेतुत्वेनेश्वरइति। एषसेतुर्विधृतिर्यएषआनंदःपरस्येति । एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीत्यादिनोक्तसेतुत्वोपजीव्यत्वबिंबत्वादिनास्वामीयतइत्यर्थः। अलौकिकेपिज्ञानानंदादौज्ञानादिशब्दप्रयोगस्तुतस्यार्थप्रकाशत्वानुकूलवेद्यत्वादित्यादिज्ञापनार्थइतिभावः ॥१६॥ नन्वेवमीश्वरज्ञानानंदादेर्ब्रह्मादिज्ञानानंदादिकंप्रतिबिंबत्वेब्रह्मादिज्ञानानंदादौतारतम्यवदीश्वरज्ञानानंदादिगुणेषुतारतम्यंस्यादित्यतःप्राप्तं स्थानविशेषादित्यादियोगद्वयं । तस्याप्यर्थः। सएकःपरमेश्वरइति । सविष्णुरेकःज्ञानानंदादिभिरेकप्रकारएवनतुतारतम्यवानित्यर्थः। बिंबानंदाद्यवैचित्र्येपिप्रतिबिंबवैचित्र्यस्यबिंबभूतभगवदैश्वर्यवशादुपपत्तेरितिभावेनोक्तं परमेश्वरइति । स्थानगुणस्याप्युपलक्षणं । ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः । ब्रह्मादीनांसूपपन्नाह्यानंदादेर्विचित्रतेतिस्मृतेरितिभावः ॥ १७॥ नन्वेवमीश्वरस्यबिंबत्वेसूपपन्नेसतितत्प्रतीत्यर्थंनभक्त्यादिसाधनापेक्षा ध्यानकालेपुरुषप्रयत्नेनप्रतीतस्यैवबिंबभूतविष्णुरूपत्वाद्यत्किंचिद्ध्यानेनेश्वरस्यफलदानायोगादित्यतोध्यानकालेप्रतीतस्याविष्णुत्वंवक्तुंसूत्रं तथान्यत्प्रतिषेधादिति । तस्याप्यर्थः सएकःपरमेश्वरइति। सविष्णुरेकःपरमेश्वरश्चेत्यर्थः । ध्यानप्रतीतस्यतु ध्यातृपुरुषबहुत्वेनानेकदुर्लक्षणत्वादिनानीश्वरत्वमितिकथंतस्यविष्णुत्वमित्यर्थः । ध्यानकालेप्रतीतस्याब्रह्मत्वेपिब्रह्माधिष्ठानत्वात्तद्ध्यानस्यब्रह्मध्यानत्वेनैतावतैवेश्वरस्यफलदानोपपत्तेः । ब्रह्मैवप्रतिबिंबेयदतस्तेषांफलप्रदमित्यादिस्मृतेरितिभावः । विष्णोर्ध्यानप्रतीतादन्यत्वयुक्तिसूचनायततोन्यइत्याद्यनुक्त्वाएवंविन्यासःकृतः ॥ १८ ॥ नन्वेवंध्यातृभ्यःफलदानवत् देशांतरेकालांतरेन्यस्यस्वातंत्र्यमपिदत्वाततःसृष्ट्यादिकमपि

SGDF
Sri Gargeshwari Digital Foundation

कुर्यात् । लोकेराजादौदेशादिभेदेनानेकस्वातंत्र्यस्यदर्शनात् । हरेरप्यवतारेषुविविधलीलादर्शनाच्चातोनतस्यैवसर्वकर्तृत्वमित्यतःप्राप्तं अनेनसर्वगतत्वमायामयशब्दादिभ्यइति । तस्याप्यर्थमाह । सर्वदेशेषुकालेषुसएकःपरमेश्वरइति । सर्वत्र सर्वदासएकएवस्वतंत्रःसन्सृष्ट्यादिकर्ता नत्वनेकइत्यर्थः । स्वातंत्र्यात्क्रीडतेविष्णुर्नहिस्वातंत्र्यमन्यगं । करोतीत्यादेरितिभावः ॥ १९ ॥ नन्वेवमपिनेश्वरस्यफलदातृत्वंप्रागुक्तंयुक्तं । तस्यकर्मविनाकृतस्यफलदातृत्वेकर्मणांवैयर्थ्यापातेनतद्विधायकवेदाप्रामाण्यापातात् । तस्यवैषम्यादिदोषानुषंगाच्चाकृतकर्मणांपुंसांफलादर्शनाच्च फलस्यकर्मान्वयव्यतिरेकित्वेनकर्मैवफलप्रदंनेश्वरइत्यतःप्राप्तं फलमतउपपत्तेरित्यादियोगचतुष्टयं । तस्याप्यर्थः । सएकःपरमेश्वरइति । सएकोविष्णुरेवपरःफलदानादिसमर्थः । नतुकर्म तस्याचेतनत्वेनस्वतःफलदानानुपपत्तेः । रातिर्दातुःपरायणं । पुण्येनपुण्यंलोकंनयतीत्यादेःकर्मनिमित्तीकृत्येश्वरएवफलदातेतिभावः ॥ २० ॥ नन्वेवमष्टादशभिर्नयैर्भगवतोयन्माहात्म्यवर्णनंतदयुक्तमिव । तस्यभक्त्यर्थत्वेनभक्तेरेवानुपयोगादित्यानंदज्ञानादिमत्त्वस्यमोक्षत्वेननित्यसिद्धत्वान्नित्यसिद्धस्यतस्याभिव्यक्तेरपिसुप्ताविवकदाचित्स्वयमेवसंभवादित्यतः प्राप्तं अंबुवदग्रहणात्तुनतथात्वमितिसूत्रं । तथाभक्तेरावश्यकत्वेपिकेषांचित्सम्यङ्मुक्तिः । केषांचिदसम्यङ्मुक्तिरित्यस्यायोगेनसर्वेषांमुक्तेरेकरूपत्वेनतद्धेतोर्भक्तेरपिब्रह्मादिष्वन्येषुचैकप्रकारत्वमेवोपेयं । तद्वैषम्यंतुनिर्बीजमित्यतःप्राप्तं । वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादित्यादियोगद्वयं । तयोरप्येकादशद्वादशाधिकरणयोरर्थंश्रुत्यर्थाभ्यांभाषते तद्भक्तितारतम्येनतारतम्यंविमुक्तिगमिति । विमुक्तिगं विशेषेणसम्यङ्मुक्तिः तत्रविद्यमानमानंदादितारतम्यं तद्भक्तितारतम्ये

न प्रकृतपरमेश्वरभक्तितारतम्येनहेतुनाभवतिनान्येनेतिश्रौतोर्थः । मुक्तौसर्वेषामविद्यानिवृत्त्यादेर्निश्शेषतोभावेनसम्यङ्मुक्तिभावेनतत्रस्वरूपानंदादितारतम्यस्य अथातआनंदस्यमीमांसाभवतीत्यादिश्रुत्यादिसिद्धत्वात् फलवैषम्यस्यसाधनवैषम्यैकाधीनत्वात् श्रुतिसिद्धमुक्तिगतब्रह्माद्यानंदतारतम्यान्यथानुपपत्त्याभक्तितारतम्यमुपेयमितिभावः । तथा सुप्तावानंदादेरीषदभिव्यक्तावपि सम्यगभिव्यक्तेरेवमुक्तित्वात्तस्याश्चभक्तिंविनायोगाद्भक्तेर्मुक्तिफलत्वसमर्थनात्सिद्धमिति मुक्त्यर्थंभक्तिरावश्यकीत्यार्थिकोर्थः । सामान्यासिद्धौविशेषचिंतायाअनवसरदुःस्थत्वेन विशेषोक्त्यासामान्यस्याक्षेपादिति भक्तिविचारपराधिकरणद्वयस्य सूत्रकृता अतएवचोपमेतिपूर्वसूत्रे ज्ञानानंदादिमत्त्वरूपस्यभगवत्सादृश्यस्यजीवेप्रकृतसुप्ताविवभक्तिंविनाप्यभिव्यक्तिसंभवाद्भक्तिर्व्यर्थेत्यादिशंकानिरासार्थतयावांतरसंगतिवशेनमध्येनिवेशितत्वेपि तदर्थस्यांतेभाषणंत्वेतत्वादीयसर्वाधिकरणेषुविष्णुमाहात्म्यनिरूपणस्यभक्तावुपयोगइतिसूचयितुं ॥ ११ ॥ १२ ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांतृतीयाध्यायस्यद्वितीयःपादः ॥ ७ ॥ ३ ॥ २ ॥ एवमाद्यसूत्रस्थाथपदोक्ताधिकारिविशेषणवैराग्यभक्ती निरूप्येदानींजिज्ञासाशब्दोक्तोपासनानिरूपणार्थोयंपादः । तदर्थोक्तिपरतयाऽग्रेतनं उपास्योविष्णुरितिपदद्वयमादावाकृष्ययोज्यं । इत्युच्यतइतिशेषः । विष्णुर्जिज्ञासापरपर्यायश्रवणमननध्यानरूपोपासनाविषयःकार्यइत्युच्यते । तद्विषयासाकार्येत्यत्रपादेनिरूप्यतइत्यर्थः । व्यक्तंचजिज्ञासोपासनयोरेकार्थत्वमनुभाष्ये सोपासनाचद्विविधाशास्त्राभ्यासस्वरूपिणी । ध्यानरूपापराचेति । उक्तंचटीकायां उपासनानामब्रह्मजिज्ञासेति । तत्राद्यनयार्थे सर्ववेदविषयश्रवणमनने कार्ये इत्येवंरूपं । तस्यमंदमध्योत्तमाख्य

SGDF
Sri Gargeshwari Digital Foundation

सर्वाधिकारिकत्वस्फोरणायांतेविवक्षुर्ध्यानरूपोपासनाप्रकारोक्तिपरनानानयार्थान्विक्षिप्योक्तान्छ्रोतृबुद्धिसौकर्यायसोपानारोहण
न्यायेनाधिकारिक्रममनुसृत्यसंक्षिप्याह सच्चिदित्यादिना ॥ तत्रसर्वमुमुक्षूपास्येशगुणानांसंख्यानिर्देशाभ्यांकॢप्तौनियामका
भावेनानिर्णयान्नकस्याप्युपासन मित्युपासनासामान्याक्षेपनिरासायसर्वमुमुक्षुसाधारणगुणोपासनांवक्तुंपंचमाधिकरणं आनंदा
दयःप्रधानस्येति । तदर्थमाह । सच्चिदानंदआत्मेतिमानुषैश्चसुरेश्वरैः । यथाक्रमंबहुगुणैरिति । सर्वैरुपास्योविष्णुरि
त्यत्राप्यन्वेति। सुरेश्वरैश्चेतिचान्वेति । उपासनाशब्दोत्रध्यानमात्रपरोनपूर्वत्रेवत्रितयपरः । आत्मशब्दश्चलोकेशरीरप्रतिसंबंधिवा
चित्वादिहेशशरीरस्थानीयसर्वचिदचित्प्रतिसंबंधिवाचीसन्स्वामिपरः । यद्वा आदानार्थत्वतश्चायमात्मशब्दःपतिंवदेदितिचतुर्था
नुभाष्योक्त्या भृत्यानादत्तइतिस्वामिपरः । निर्दोषःज्ञानमानंदःस्वामीत्येवंप्रकारेणबहुगुणैरनेकगुणैःनत्वेकैकगुणेनमनुष्यप्रभृति
ब्रह्मांतैःसर्वैरपिमुमुक्षुभिरुपास्योध्येयोविष्णुरित्यर्थः । कुतः । यथाक्रममिति । स्वप्राप्यफलमनतिक्रम्येत्यर्थः । निर्दोषज्ञानानं
दानुभवरूपमोक्षस्यसर्वाधिकारिप्राप्यत्वात्फलसाम्येनोपासनायाःकार्यत्वात्तंयथायथोपासतइत्यादेरात्मत्वोपासनस्यचप्रीतिहेतु
त्वात् । सच्चिदानंदआत्मेतिब्रह्मोपासाविनिश्चिता । सर्वेषांचमुमुक्षूणांफलसाम्यादपेक्षितेत्यादिस्मृतेरितिभावः ॥ ५ ॥ यत्तुतस्य
प्रियमेवशिरइत्यादि श्रुत्युक्तस्यप्रियशिरस्त्वादेरपि सर्वापेक्षितत्वात्सर्वोपास्यतेतिप्राप्ते नेतिवक्तुंसूत्रं । प्रियशिरस्त्वादीत्यादि ।
तस्याप्यर्थः । सच्चिदानंदआत्मेति । चोवधारणे । विष्णुरुपास्यइत्यन्वेति । सच्चिदानंदआत्मेत्येवमानुषादिभिर्ब्रह्मान्यैरुपास्यो
विष्णुर्नप्रियशिरस्त्वादिसर्वगुणविशिष्टत्वेनापि । कुतः यथाक्रमंस्वप्राप्यफलानुसारात् प्रियशिरस्त्वादेःसर्वाप्राप्यत्वादितिभावः

SGDF
Sri Gargeshwari Digital Foundation

॥ ६ ॥ यदपि उक्षासद्यावापृथिवीबिभर्ति एषोहिसर्वेषुलोकेषुभातीतिश्रुतभरणप्रकाशयोःसर्वापेक्षितत्वात्सर्वोपास्यतातयोरपी
तिप्राप्तेनेतिवक्तुं । संभृतिद्युव्याप्त्यपिचातइतिचतुर्दशमधिकरणं । तदर्थोपि सच्चिदानंदआत्मेतीत्येवमानुषैरुपास्योविष्णुर्नसं
भृतिद्युव्याप्तिमत्त्वेनापि। तयोर्देवमात्रोपास्यत्वादित्युक्त्यसंगृहीतः ॥ १४ ॥ तथा दुष्टजननिग्रहस्यसर्वसज्जनापेक्षितत्वात् तंप्र
त्यंचमर्चिंषाविध्यमर्मन् इत्याद्युक्तवेधादिगुणानामपिसर्वोपास्यतेतिप्राप्ते नेतिवक्तुं वेधाद्यर्थभेदादिति यत्तुषोडशमधिकरणं
तदर्थोयत्यादिरूपैरपिमानुषादिभिःसच्चिदानंदआत्मेत्येवोपास्योनवेधादिगुणवत्त्वेनेत्यर्थोक्त्यैवसंगृहीतः । तत्रोभयत्रहेतुर्यथाक्र
ममित्येव तदर्थःपूर्ववत् ॥ १६ ॥ यदपि प्रियशिरस्त्वादिवत्योवैभूमेतिश्रुतंनिरतिशयत्वापरपर्यायंभूमत्वमपिसर्वप्राप्यंनेति
नसर्वोपास्यमितिप्राप्ते सर्वोपास्यमेवेतिवक्तुं। भूम्नःक्रतुवज्ज्यायस्त्वमित्यादि सप्तत्रिंशमधिकरणं । तदर्थोपिबहुगुणैरित्युक्त्या
संगृहीतः।बहुःपूर्णतायामितिछांदोग्यभाष्योक्तेः। बहुशब्दःपूर्णत्ववाचीतथाचसच्चिदानंदआत्मेत्येवंप्रकारेणबहुगुणैःपूर्णगुणैःमानु
षादिसुरेश्वरांतैरुपास्योविष्णुरित्यर्थः ॥३७॥ यच्चपूर्णत्वरूपंभूमत्वंज्ञानानंदादिगुणेषुमानुषैस्सुरेश्वरैश्चैकप्रकारेणैवोपास्यमितिप्राप्ते
मासपक्षदिनानंत्यादिवत्पूर्णत्वमपिमानुषादीनांतारतम्येनैवोपास्यमितिवक्तुं नानाशब्दादिभेदादितिसूत्रं। तदर्थोपियथाक्रमंब
हुगुणैःस्वयोग्यतानुरोधेनपूर्णत्वेनज्ञातगुणैर्मानुषादिभिरुपास्यइत्युक्त्यासंगृहीतोध्येयः ॥३८॥ यदपिदुरितनिवृत्त्यर्थकतयाकाम्यं
नृसिंहाद्युपासनंमोक्षानुपयोगित्वान्मुमुक्षुणानकार्यमितिप्राप्तेमुमुक्षुणापिताद्दशफलप्राप्तीच्छुनाताद्दशोपासनंपरंपरयामोक्षोपयोगि

SGDF.
Sri Gargeshwari Digital Foundation

त्वात्कार्यमेवेतिवक्तुं विकल्पोविशिष्टफलत्वादितिसूत्रं । तदर्थोपि यथाक्रमंदुरितनिवृत्त्यादिरूपस्वप्राप्यफलानुरोधेनमानुषा
दिभिर्नृसिंहादिरूपीविष्णुरुपास्यइत्युक्त्यासंगृहीतः ॥३९॥ एतेनैवार्थादिसाधनतयाकाम्यभगवद्रूपविशेषाद्युपासनमपि सर्वेषामाव
श्यकमितिप्राप्ते मुमुक्षूणांनावश्यकमन्येषामावश्यकंमुमुक्षूणामपिकामप्रहाणेनभगवत्प्रीत्यर्थत्वेनावश्यकमित्यादिवक्तुंप्राप्तस्य का
म्यास्तुयथाकामंसमुच्चीयेरन्नित्यादिसूत्रस्यार्थोपिसंगृहीतः । यथाक्रमंस्वस्वप्राप्यकाम्याकाम्यफलानुरोधेनबहुगुणैर्विष्णुरुपा
स्योमानुषादिभिरित्यर्थकथनात् ॥४०॥ यत्तुतमेवैकंजानथेत्यादिश्रुतेर्विष्णुरेकएवोपास्योनान्येपिदेवाइतिप्राप्तेऽन्येपिभगवत्परिवा
रत्वेनोपास्यानप्रधानत्वेनेतिवक्तुंअंगावबद्धास्त्वित्यादि षट्त्रिंशमधिकरणं । तदर्थोप्युक्तोमानुषैश्चेत्यादिना । सुरेश्वरैरिति
सहयोगेतृतीया । सहयुक्तेप्रधानइत्यत्र युक्तइत्युक्त्यासहपदाप्रयोगेपि तदर्थसत्त्वेपितृतीयायाःस्मरणात् । तथाचसुरेश्वरैर्ब्रह्मादि
भिरप्रधानैःपरिवारभूतैश्चसह विष्णुर्मानुषादिभिरुपास्योनकेवलइत्यर्थः ॥ ३६ ॥ यत्तूक्तंचतुर्गुणैरेवविष्णोःसर्वोपास्यत्वनिर्णयाद्दे
वैरपितावद्भिरेवोपास्योनाधिकगुणैरितिप्राप्तेस्वस्वप्राप्यफलानुरोधेनचतुर्भ्योधिकैरपिगुणैरुपास्योविष्णुरितिवक्तुं इतरेत्वर्थसा
मान्यादिति सप्तममधिकरणं । तदर्थमाह । सुरेश्वरैर्यथाक्रमंबहुगुणैरिति । विष्णुरुपास्यइत्यन्वेति । सच्चिदानंदआत्मेतीति
वर्तते । इतिशब्दःप्रभृत्यर्थः । सुरेश्वरैस्सच्चिदानंदात्मप्रभृतिभिर्बहुगुणैरुपास्योविष्णुरित्यर्थः । तत्रहेतुर्यथाक्रममिति । स्वस्वप्राप्य
फलानुरोधेनेत्यर्थः । मनुष्येभ्योऽतिशयितफलस्यप्राप्यत्वात्ततोऽधिकगुणोपासनायाःकार्यत्वात्फलानुसारित्वादुपासनायाःमनु ॥ ५० ॥
ष्येभ्योतिशयितफलवत्त्वेहेतुसूचनायसुरैरित्यनुक्त्वासुरेश्वरैरित्युक्तं । सुराश्चतेईश्वराश्चलोकस्येतिविग्रहः । किंसर्वैर्देवैःसाम्येनोपा

स्योनेत्याह । यथाक्रममिति । अनादिस्वस्वयोग्यताक्रमानुरोधेनेत्यर्थः ॥७॥ एतेनोपासनायोग्यतानियमेप्रमाणाभावादुपासना
नयोग्यतानुसारिणीतिप्राप्ते मुक्तावानंदतारतम्यान्यथानुपपत्तिसिद्धत्वाद्योग्यतानियमस्यतदनुसारिण्येवोपासनेतिवक्तुंप्राप्तस्य
यावदधिकारमवस्थितिराधिकारिणामिति विंशाधिकरणस्यार्थः ॥२०॥ तथाऽनागंतुकोपासनाया आगंतुकयोग्यताधीनत्वा
योगादर्जुनादींद्रांशानामुत्पत्त्यादिमतांस्वरूपभूतयोग्यतायाअनादित्वायोगान्नयोग्यतानुसारिण्युपासनेतिप्राप्ते अंशांशिनोरभेदेन
योग्यताप्यनादिरेवेतितदनुसारिण्येवेतिवक्तुंप्राप्तस्य एकआत्मनःशरीरेभावादिति पंचत्रिंशाधिकरणस्यार्थश्चसंगृहीतोभवति
॥३५॥ तथा सुरेश्वरैरित्यादिनैवांगेषुयथाश्रयभावः । नवातत्सहभावश्रुतेरित्येतत्पादीयोपांत्यांतिमनययोरप्यर्थस्संगृही
तोध्येयः । तत्राद्यनयेविष्णौसूर्याद्याश्रयचक्षुष्कत्वादिगुणानांचतुर्गुणमात्राधिकारित्वेननिर्णीतमनुष्याधिकारित्वायोगाद्देवाधिका
रिकत्वस्याश्रुतत्वेनानधिकारिकतयानुपास्यतेतिप्राप्ते शीर्ष्णोद्यौरित्यादिश्रुतौदेवानांयतोजन्मतत्रैवस्थितिरितितत्तदंगाश्रितत्वो
क्त्यादिबलादुपास्यतेत्युक्तं । अंत्यनयेतुदेवाधिकारिकत्वस्यशीर्ष्णोद्यौरित्यादिवाक्यसन्निधावश्रवणेपिक्वचिच्छ्रुतिषुश्रवणात् ।
शीर्ष्णोद्यौरित्याद्युक्त्यन्यथानुपपत्त्याचदेवाधिकारिकत्वसिद्धेर्देवोपास्यतेत्युक्तं । तदर्थद्वयस्यापिसुरैश्चयथाक्रमंस्वस्वप्राप्यतदंगा
श्रितत्वरूपफलक्रमानुरोधेनबहुगुणैःसूर्यादितत्तद्देवाश्रितचक्षुराद्यंगकत्वादिरूपानेकगुणैर्विष्णुरुपास्यइत्युक्त्याप्राप्तत्वात्सुरेश्वरैरि
त्युक्तं । तत्रब्रह्मणोविशेषमाह ब्रह्मणात्वखिलैर्गुणैः । उपास्यःसर्ववेदैश्चेति । विष्णुरित्यन्वेति । यथाक्रममितिवर्तते । संपूर्ण
स्वप्राप्यफलानुरोधेनेत्यर्थः । संपूर्णफलस्यब्रह्मप्राप्यत्वात्तेनसच्चिदानंदात्मप्रभृतिभिरशेषैर्गुणैर्नानावेदोक्तैरुपास्योविष्णुरित्यर्थः

SGDF Sri Gargeshwari Digital Foundation

॥ ४१ ॥ ४२ ॥ एतेनसर्वगुणोपसंहारेणेश्वरध्यानस्यकर्तुमशक्यत्वादकर्तव्यत्वेप्राप्ते विध्यादिबलात्कर्तव्यत्वंवक्तुंप्राप्तस्य उपसं
हारोर्थाभेदादित्यादिद्वितीयाधिकरणस्य तथाकतिपयगुणोपासनयैवफलसिद्धेर्नाखिलगुणैरुपास्योविष्णुरितिप्राप्तेल्पगुणोपा
सनेनाप्राप्यफलविशेषभावात्सर्वगुणैरुपासनाकार्यैवेतिवक्तुंप्राप्तस्य सर्वाभेदादन्यत्रेमइतिचतुर्थाधिकरणस्यचार्थउक्तोभवति ।
अत्रब्रह्मणेतिब्रह्माण्याअप्युपलक्षणं । गुणैरित्युक्त्याक्रियासुविशेषःसूचितः ॥ २ ॥ ४ ॥ अत्राधिकारिभेदेनाल्पगुणबहुगु
णाखिलगुणैरुपास्यत्वोक्त्यागुणोपसंहारानुपसंहारयोरधिकारिभेदेनकार्यत्वोक्तिपरस्य प्राप्तेश्चसमंजसमिति नयस्यार्थः तथोप
संहारानुपसंहारयोःप्रमितत्वाद्युक्त्याऽवश्यकर्तव्यत्वोक्तिपराणां आध्यानायप्रयोजनाभावात् । आत्मगृहीतिरितरवदु
त्तरात् । अन्वयादितिचेत्स्यादवधारणात् । नवाविशेषात् । पुरुषविद्यायामपिचेतरेषामनाम्नानादितिपंचानांन
यानामर्थश्चसंगृहीतोभवति ॥ ३ ॥ ८ ॥ ९ ॥ १० ॥ १३ ॥ १५ ॥ तथा तत्रगुणैरुपास्यइतिगुणानामप्युपास्यत्वोक्त्याविष्णु
गुणानामप्यलौकिकत्वस्य परमतइत्यत्रोक्तत्वात्तेषांचबुद्धावनारोहान्नध्येयत्वमितिप्राप्ते उपदेशेनतज्ज्ञानसंभवादलौकिकमोक्षा
ख्यफलानुसारित्वादलौकिकैरेवगुणैरुपास्यइतिवक्तुंप्राप्तस्य कार्याख्यानादपूर्वमित्यस्यार्थः तथासर्वत्रयथाक्रमंस्वस्वप्राप्यफ
लक्रमानुरोधेनोपास्यइत्युक्त्यैवोपासनायास्स्वानुसारिफलदत्वसमर्थनपरस्य समानएवंचाभेदादितिनयस्यार्थोप्युक्तः । तथा
मुक्तावितिवासंसारइतिवाकालविशेषमनुपादायोपास्योविष्णुरितिसामान्योक्त्यासदाप्युपास्यत्वलाभात् हानौतूपायनशब्दशे
षत्वादितिमुक्तावप्युपासनोक्तिपरनयार्थः गुणैरुपास्यइत्युक्त्याकर्मभिरुपासनंतुमुक्तिदशायांननियतमितिसूचनायमुक्तौकर्मोपा

SGDF
Sri Gargeshwari Digital Foundation

स्त्यनियमोक्तिपरस्य छंदतउभयाविरोधादित्यस्यार्थश्चसंगृहीतोभवति ॥ ११ ॥ १२ ॥ १७ ॥ १८ ॥ तथासर्वैरधिकारि भिरुपास्यइतिसर्वपदोक्त्यैवोपासनाजन्यज्ञानद्वारासर्वेषांमुक्तिनैयत्यसूचना दनियमःसर्वेषामितिनयार्थोपिसंगृहीतः ॥ १९ ॥ तथाऽधममध्यमोत्तमाधिकारिणांब्रह्मांतत्वकथनेनाधिकारिणांमुख्यप्राणावधित्वोक्तिपरस्य इयदामननादितिनयस्यार्थउपास्यो विष्णुरित्येकवचनांतेननिर्दिश्यब्रह्मादिसर्वोपास्यत्वोक्त्यामुख्यप्राणादनंतरंविष्णोरेकस्यैवोत्तमत्वोक्तिपरस्य व्यतिहारोविशिं षंतिहीतरवत् । सैवहिसत्यादयइतिनयद्वयस्यार्थःसंगृहीतः ॥ २२ ॥ २३ ॥ तथातत्राधिकारिवर्गेवा उपास्येश्वरकोटौ वा श्रीतत्वनिर्देशाभावेनाबद्धत्वस्येश्वरतंत्रत्वस्यचसूचना तस्यनिरुपाधिकभक्त्यतिशयेनैवविष्णूपासनंनविधिबद्धत्वादिनेतिव क्तुंप्राप्तस्य कामादितरत्रेत्यस्यार्थोपिसूचितः ॥ २४ ॥ यत्तूक्तंध्यानरूपोपासनोपयोगितयासर्वैरपियथाशक्तिसर्ववेदविषयश्रव णमननाभ्यांब्रह्मणोज्ञेयत्वंवक्तुंप्राप्तं सर्ववेदांतप्रत्ययमित्यादिसूत्रपंचकं । तदर्थंभाषते । सर्ववेदैश्चसर्वैरपियथाबलं । ज्ञेयोविष्णुरिति । सर्वैरपि मानुषादिभिरशेषैरधिकारिभिर्ज्ञेयः । नकेवलमधिकैर्गुणैरितिचार्थः । यथाऽयोग्यगुणैर्नोपास्यःकिं तुव्यवस्थयैवमानुषादिभिःस्वस्वयोग्यगुणैरेवोपास्योविष्णुः नतथाज्ञानेविशेषः । अखिलैर्गुणैःसर्वैर्वेदैश्चयथाबलंविष्णुर्ज्ञेयइति सर्ववेदांतनयस्यवक्ष्यमाणध्यानरूपोपासनोपयोगितयोपोद्धातत्वेनसूत्रकृताऽऽदौनिवेशितत्वेपि उपासनोपयोगस्फोरणायोपास नायामेवाधिकारिव्यवस्था नत्विहसास्तीतिद्योतनायचोपासनोक्त्यनंतरमत्रतदर्थभाषणंकृतं । अन्यथाज्ञानवदुपासनायामप्य विशेषेणसर्वेप्यधिकारिणइतिधीःस्यादिति ॥ १ ॥ अत्रसर्वैरपीतिपदमावर्त्यं । ज्ञेयइत्यपरोक्षज्ञानपरंबोध्यं । तथाचसर्वैरप्यधि

SGDF
Sri Gargeshwari Digital Foundation

कारिभिः सर्वैरपिश्रवणमननिदिध्यासनप्रीतिपूर्वकगुरूपदेशहरिगुरुभक्तिशमदमादिभिरपि यथाबलंज्ञेयो परोक्षीकर्तव्यइत्यर्थः। तथाचसति फलभेदोक्त्याश्रवणादित्रितयकर्तव्योक्तिपरस्य तन्निर्धारणार्थनियमइंतिनयस्य प्रदानवदेवहितदुक्तमित्यादिगुरुविषयनयत्रयस्यभक्त्यादिकमप्यंगमित्युक्तिपरस्य अनुबंधादिभ्यइतिनयस्य भक्तेरेवस्वातंत्र्येणज्ञानहेतुत्वंपराकृत्यप्रधानांगत्वंवक्तुंप्राप्तस्य परेणचशब्दस्यताद्विध्यमितिनयस्य ज्ञेयइत्युक्त्याज्ञानस्यपुमर्थहेतुत्वसूचनात् विद्यैवतुनिर्धारणात् । श्रुत्यादिबलीयस्त्वाच्चनबाधइति नयद्वयस्यचार्थःसंगृहीतोध्येयः ॥२५॥२६॥२७॥२८॥३१॥३४॥२९ ॥३०॥ यत्तु यथाबलं विष्णुर्ज्ञेयइत्युक्तंज्ञानेतारतम्यमयुक्तं । दृष्ट्वैवतंमुच्यतेनापरेणेत्यादौसर्वेषामविशेषितज्ञानेनैवमोक्षश्रवणादित्यतोस्त्येवोपासनातारतम्यात्तत्फलेज्ञानेपितारतम्यमितिवक्तुंप्राप्तं प्रज्ञांतरपृथक्त्ववदृष्टिश्चतदुक्तमिति। तदर्थमाह। विशेषस्तुज्ञानेस्यादुत्तरोत्तरमिति। उपासनातारतम्यवदीशापरोक्षज्ञाने विशेषस्तु तारतम्यं। उत्तरोत्तरं मानुषानारभ्यब्रह्मांतंस्यात्। तेनविनामुक्तौतारतम्यानुपपत्तेः। ज्ञानतारतम्यस्योपासनातारतम्याधीनत्वात्। अतएवपूर्वमुपासनातारतम्यंभाषितमितिभावः ॥३२॥ यत्तु भगवद्रूपाणामविशेषाद्यत्किंचिद्रूपज्ञानमपिमुक्तिहेतुर्नतुस्वबिंबभूतरूपविशेषज्ञानमेवेतिप्राप्ते रूपाणांसाम्येपिरूपविशेषज्ञानमेवमुक्तिहेतुर्नतुज्ञानमात्रमितिवक्तुंप्राप्तं नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिरितिसूत्रं तदर्थोपिज्ञानेभगवदपरोक्षज्ञाने । विशेषस्तु स्वबिंबविषयकत्वरूपविशेषस्तु। स्यान्मुक्तयइत्यर्थकथनेनसंगृहीतोध्येयः ॥३३॥इतिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांश्रीराघवेंद्रयतिकृतायांतृतीयाध्यायस्यतृतीयःपादः ॥ ३॥ ३॥ ७॥ एतत्पादार्थोभाष्यएवव्यक्त

त्वादिहनोक्तः। यद्वा विशेषस्तुज्ञानइत्यनुवर्त्यपूर्वपादोक्तोपासनाजन्यापरोक्षज्ञानेसामर्थ्यातिशयरूपविशेषस्तूच्यते। अत्रपादइत्यध्याहृत्यैतत्पादार्थोक्तिपरतयाव्याख्येयं। तत्रज्ञानस्यमोक्षतदन्यसर्वपुमर्थहेतुत्वंवक्तुंपुरुषार्थोतइत्यादिसूत्रनवकं । तदर्थंभाषते । सर्वेपिपुरुषार्थाःस्युर्ज्ञानादेवनसंशयःइति। नकेवलंमोक्षः किंतुपुरुषैरर्थ्यमाना यावंतःकामास्तेसर्वेपीत्यर्थः । ननुयदेवविद्ययेत्यादिनाज्ञानस्यमोक्षान्यस्वर्गादिपुमर्थविषयेतद्धेतुकर्मप्रति शेषत्वावगमात्कथंज्ञानादेवेत्युक्तिरित्यतोनसंशयइत्युक्तिः । कागतिर्ज्ञानस्यकर्मशेषत्वोक्तेरित्यतोपि सर्वेपिपुरुषार्थाःस्युर्ज्ञानादेवनेति। उत्तरोत्तरमितिवर्तते। सर्वेपि प्रागुक्तमानुषादिसमस्ताधिकारिणोपि। ज्ञानादेवपुरुषार्थाः। अर्शआदिभ्योच् स्वर्गादिपुरुषार्थवंतोनभवंति। किंतुउत्तरोत्तरंपूर्वोक्ताधिकारिषूत्तरोत्तरंसुरेश्वराद्युत्तमाधिकारिणएवसर्वेपिज्ञानादेवसर्वपुमर्थवंतोभवंतीत्यर्थः । तथाचज्ञानस्यस्वर्गादौकर्मशेषत्ववादस्तुमानुषपरोवा प्रतिबद्धदेवविषयो वेतिभावः ॥ १ ॥ यत्तुज्ञानस्यस्वावच्छेदकदेहपातानंतरमेवमुक्त्यहेतुत्वेकालांतरेपितद्धेतुत्वंनस्यादित्यतःप्राप्तं । एवंमुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरितिचरममधिकरणं । तदर्थोपि ज्ञानादेवसर्वेपिपुरुषार्थाःस्युर्नसंशयइत्युक्त्यासंगृहीतोध्येयः । असतिप्रतिबंधेतद्देहानंतरमेव । प्रतिबंधेतुसति कालांतरइत्यंगीकारेदोषाभावादितिभावः ॥ ११ ॥ यच्चज्ञाने सर्वेषांनाधिकारिताकिंतुयथाशक्तिकृत्स्नाध्ययनवतामेव। सापितारतम्येनैवनत्वेकप्रकारेणेत्येतत्प्रतिपादयितुं असार्वत्रिकी नाविशेषादितिचनयद्वयं। तदर्थसंग्रहाय सर्ववेदैश्चसर्वैरपियथाबलंज्ञेयोविष्णुरितिअनुवर्त्येहापियोज्यं। तथाहि ज्ञेयइत्यपरोक्षज्ञानमत्राभिप्रेतं। सर्वेवेदायेषांतैःसर्ववेदैरितिबहुव्रीहिः । चोवधारणे । यथाबलं सर्ववेदाध्ययनवद्भिरेव । सर्वैरपि मा

SGDF Sri Gargeshwari Digital Foundation

नुषादिब्रह्मांतैःसर्वैरधिकारिभिर्यथाबलंविष्णुर्ज्ञेयोपरोक्षीकर्तव्यइत्यर्थः ॥ २ ॥ ३ ॥ अत्रसर्वैरित्यावर्त्य । एकंउक्तरीत्यामानु
षाद्यधिकारिपरं । अन्यत्तुज्ञानेतिकर्तव्यतारूपधर्मपरं । अनादिमुक्तियोग्यता देवतादिरूपस्वोत्तमपदानाकांक्षत्वा नाविष्कर
णादिरूपधर्मैर्विष्णुर्ज्ञेयः साक्षात्कार्यो नान्यथेति । तेन योग्यानामेवज्ञानप्राप्तिर्नत्वयोग्यानामासुरप्रकृतीनामित्येतदर्थकस्य स
र्वथापितुतएवोभयलिंगादितिनयस्य तथाज्ञानस्यदेवादिपदाकांक्षाशून्यैरेवप्राप्यत्वंवक्तुंप्राप्तस्य नचाधिकारिकमपीत्य
धिकरणस्य तथाज्ञानस्यायोग्येभ्योतिगोपनंवक्तुंप्रवृत्तस्य अनाविष्कुर्वन्नन्वयादित्यधिकरणस्यचार्थःसंगृहीतोध्येयः ॥ ५ ॥
॥ ६ ॥ ९ ॥ यत्तुज्ञानिनःसदसत्प्रवृत्तौविशेषोक्त्यर्थं स्तुतयेनुमतिर्वेत्यादिविंशतिसूत्रमधिकरणं । तदर्थंभाषते । नलिप्य
तेज्ञानवांश्चसर्वदोषैरपिक्वचित् । गुणदोषैस्सुखस्यापिवृद्धिह्रासौविमुक्तिगौ । नृणांसुराणांमुक्तौतुसुखंक्लृसंयथा
क्रममिति । सर्वदोषैःसदापापैरपिज्ञानवान्अपरोक्षज्ञानवान्नलिप्यतेच । नकेवलंसर्वपुरुषार्थभागितिचार्थः । अयंचकामका
रेणचैकइत्यादेरर्थः । यद्वा ज्ञानित्वेपिमानुषदेवयोर्लेपाभावेपि विशेषद्योतकतयाज्ञानवांस्त्विवतितुशब्दार्थकश्चकारः । सकोविशे
षइत्यतः परामर्शंजैमिनिरित्यादिसूत्राभिप्रेतंमानुषाणांतावत्तंविशेषमाह । गुणदोषैःसुखस्यापिवृद्धिह्रासौविमुक्तिगौ । नृ
णामिति । ज्ञानानंतरभाविपुण्यपापैर्नृणांमुक्तौस्वरूपसुखस्यापिस्रक्चंदनवनितादिविषयभोगहेतुकव्यक्त्यतिशयतदभावलक्षण
वृद्धिह्रासौभवतइत्यर्थः । अत्रनलिप्यतइत्युक्तिः तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशावितिचतुर्थाध्यायाद्यपादीयसूत्रोक्तिश्चमु
क्तिप्रतिबंधकत्वाशुचित्वादिराहित्यमात्राभिप्रायेतिभावः । तदुक्तमनुव्याख्याने ज्ञानोत्तरस्यपापस्यचतुर्थेऽलेपउच्यते । अशु

SGDF Sri Gargeshwari Digital Foundation

चित्वादिकंतस्यनभवेदितितत्फलं । अत्रज्ञानफलस्यैवमुक्तेर्नियततोच्यतइति । एवंमानुषाणामलेपेविशेषमुक्त्वादेवानां अनुष्ठेयं बादरायणइत्यादिसूत्राभिमतंविशेषमाह । सुराणांतुयथाक्रमंसुखंक्लृप्तमिति । क्लृप्तमेवनह्रासवदित्यर्थः । येनतारतम्यक्रम भंगःस्यादितिभावेनोक्तं । यथाक्रममिति । सुराणांत्विवितितुशब्दस्तु देवानामपिनप्रायःक्लृप्तस्यतुकथंचन । प्राप्तह्रासोभवेत्का पिमहतातुविकर्मणेत्याद्यनुभाष्योक्तविशेषद्योतकः ॥ ४ ॥ यत्तु तत्वाभिमानिदेवानामेवसंपूर्णप्रजाकृतपुण्यफलमित्यर्थसाधकं स्वामिनःफलश्रुतेरित्यधिकरणं । तस्याप्यर्थो । नृणांसुराणामित्यादिनासंगृहीतोध्येयः । तथाहि गुणदोषैरित्यतोविभा गेनगुणैरित्यन्वेति । नृणांप्रजानांगुणैःपुण्यैःक्लृप्तंसंपूर्णमितियावत् । सुखंतुसुराणांयथाक्रमं तत्तद्देवताधिक्यानुरोधेनभवेत् । प्र जानांत्वल्पमेवेति ॥ ७ ॥ अत्रफलमितिवाच्ये सुखमितिपुण्यफलमात्रोक्तिःप्रजाकृतपुण्यफलमेवदेवानांनपापफलं । तत्त्वसुरा णां । पुण्यमेवामुंगच्छति नहवैदेवान्पापंगच्छतीतिश्रुतेरितिद्योतयितुं । देवानांसंपूर्णपुण्यफलोक्त्यैवतेषांसर्वाश्रमधर्मवत्त्वसूचना त् कृत्स्नभावात्तुगृहिणोपसंहारइतिनयार्थोप्युक्तप्रायः ॥ ८ ॥ साधनसंपत्तिजन्मन्येवदेहेऽपरोक्षज्ञानोत्पत्तेरदर्शनात् । का लांतरेप्युपासनयाऽपरोक्षज्ञानोदयोनस्यादित्यतोसतिप्रतिबंधेतज्जन्मनि प्रतिबंधेतुजन्मांतरइतिवक्तुंप्राप्तस्य ऐहिकमप्रस्तुतप्र तिबंधइतिनयस्यार्थस्तु तेनयात्यपरोक्षतामित्यग्रेव्यक्तत्वादिहनोक्तः । तथाचाग्रेविवरिष्यामः ॥ १० ॥ सुधींद्रगुरुशिष्ये णराघवेंद्रेणभिक्षुणा ॥ कृतायांतत्वमंजर्यांतृतीयोध्यायईरितः ॥ ३ ॥ इतिश्रीकृष्णद्वैपायनकृतश्रीमद्ब्रह्मसूत्राणुभाष्य विवृतौतत्वमंजर्यांश्रीराघवेंद्रयतिकृतायांतृतीयाध्यायस्यचतुर्थःपादः ॥ ३ ॥ ४ ॥ ॥ तृतीयाध्यायःसंपूर्णः ॥

SGDF
Sri Gargeshwari Digital Foundation

अस्मिन्नध्यायेआद्यसूत्रस्थातःपदोक्तकर्मक्षयोत्क्रांतिमार्गभोगरूपमोक्षाख्यंफलंनिरूप्यतइतिश्रीमद्भाष्यादेवा त्रैवाग्रेप्रतिपादनदि शावा ऽध्यायार्थःसुज्ञानः । तथैवपादार्थाअपि । तत्रांत्यनयेकर्मक्षयाख्यंफलंवक्ष्यन्सप्तभिर्नयैरत्यावश्यकांतरंगसाधनंज्ञानस्योच्यते । तदर्थंभाषते । विष्णुर्ब्रह्मतथादातेत्येवंनित्यमुपासनं । कार्यमापद्यपि ब्रह्मतेनयात्यपरोक्षतामिति । तत्रायंविवेकः । सकृदनुष्ठिताग्निष्टोमादिनास्वर्गफलदर्शनात्श्रवणादिनापिसकृदनुष्ठितेनैवज्ञानमस्त्वित्यतःप्राप्तस्याऽऽवृत्तिरसकृदुपदेशादितिनयस्यार्थो नित्यमुपासनंकार्यमिति । श्रवणादिरूपमुपासनंनित्यंकार्यंनतुसकृदेवेत्यर्थः । व्रीह्यवघातादिवदृष्टार्थत्वेनयावज्ज्ञानोदयंश्रवणादेरावर्त्यत्वादितिभावः ॥ १ ॥ यत्तुहरेःस्वामित्वस्यातिप्रसिद्धत्वान्नित्यंतदुपासनंनावश्यकमित्यतःप्राप्तं । आत्मेतितूपगच्छंतिग्राहयंतिचेति । तदर्थः । आदातेत्येवंनित्यमुपासनं । कार्यमापद्यपीति । विष्णुरित्यन्वेति । विष्णुरादातास्वामीत्येवंप्रकारेणनित्यमुपासनंकार्यं । नित्यमित्यस्यविवरणमापद्यपीति । आत्मेत्युपासनंकार्यंसर्वथैवमुमुक्षुभिः । नानाक्लेशसमायुक्तोप्येतावन्नैवविस्मरेदित्युक्तेरितिभावः । स्वामीतिवाच्येआदातेत्युक्तिरादत्तेभृत्यानित्यात्मेत्यात्मशब्दोयोगेनस्वामिवाचीतिसौत्रात्मपदंव्याख्यातुं । आदानार्थत्वतश्चायमात्मशब्दःपतिंवदेदित्यनुव्याख्यानोक्तेः । आदातेतीत्येवपूर्तौप्रकारवाच्येवंशब्दोक्तिरात्मत्वंविशेषणमित्येवंरूपेणोपासनंकार्यंनतुजीवत्वेनेतिवक्तुं । आत्माविष्णुरितिध्यानंविशेषणविशेष्यतइत्यादेः । तेनविष्णुरात्मतयाजीवत्वेनोपास्यइत्येवंवदंतोनिरस्ताः ॥ २ ॥ एतेननामब्रह्मेत्युपासीतेत्यादौ नामाद्यभिमानिरूपप्रतीकतादात्म्येनोपासनमपाकुर्वतो नप्रतीकेनहिसइतिनयस्याप्यर्थःसंगृहीतः । विष्णुरादातेत्यनंतरंविष्णुर्नामादावित्यस्याप्यभि

प्रेतत्वेनविष्णुर्नामादावित्येवंनित्यमुपासनंकार्यं नतुविष्णुर्नामेत्येवंरूपेणेतिव्याख्यानसंभवात् ॥ ३ ॥ यत्तुविष्णोरतिप्रीतिहेतुत्वेनोत्कृष्टत्वरूपब्रह्मत्वोपासनस्यावश्यकत्वंवक्तुं ब्रह्मदृष्टिरुत्कर्षादितिसूत्रं । तदर्थंभाषते विष्णुर्ब्रह्मेत्येवंनित्यमुपासनंकार्यमापद्यपीति । पूर्ववद्व्याख्यानं । आधिव्याधिनिमित्तेनविक्षिप्तमनसोपितु । गुणानांस्मरणाशक्तौविष्णोर्ब्रह्मत्वमेवतु । स्मर्तव्यमित्यादेः । अत्रविष्णुरादाताब्रह्मेत्येवमितिसौत्रक्रमेनुसर्तव्येप्येवमुक्तिरात्मत्वोपासनमपिब्रह्मत्वयुक्तमेवकार्यमितिसूचयितुं । आत्मेत्येवयदोपासातदाब्रह्मत्वसंयुता । कार्यैवसर्वथेत्यादेः । अतएवद्वयोःसमुच्चयेतथाशब्दः ॥ ४ ॥ देवानांस्वाश्रयांगकत्वगुणवत्त्वेनेश्वरोपासनस्यांगेषुयथाश्रयभावइत्युपासनापादएवोक्तस्यात्राादित्यादिमतयश्चेत्यनेनावश्यकत्वमात्रोक्त्यासुरेश्वरैः । यथाक्रमंबहुगुणैर्विष्णुरुपास्यइत्युपासनापादीयभाष्येणैवसंगृहीतप्रायत्वादत्रतदर्थस्यानुक्तिः । यद्वाआदातेत्यनंतरमितिशब्दंप्रभृत्यर्थकमपिवा तथापदमनुक्तसमुच्चयार्थंवा व्याख्याय स्वस्वोत्पत्त्यंगकश्चविष्णुरेवमित्यर्थमुक्त्वाऽऽदित्यादिमतयश्चांगउपपत्तेरित्येतदर्थसंग्रहोपिध्येयः ॥ ५ ॥ तथास्मरणध्यानसाधारण्येनोपासनमात्रस्यनित्यंकार्यत्वभाषणाद्ध्यानमात्रांगासनादीत्थंभावोक्तिपरस्याऽऽसीनःसंभवादितिनयस्यार्थोत्रनोक्तः । यद्वाएवमित्यनेनैवासनादीत्थंभावमपिपरामृश्यासीनइतिनयार्थोपिसंग्राह्यः । यद्वोपासनमित्यावर्त्यं । एवंनित्यमुपासनंकार्यं । किंकृत्वा उपासनं आसनस्योप उपासनं । आसनेउपविश्येत्यर्थः ॥६॥ यदपिमुक्तिपर्यंतमुपासनस्यकार्यत्वोक्तिपरं आप्रायणात्तत्रापिहिदृष्टमितिसूत्रं । तदर्थोपिनित्यंयावन्मुक्तिउपासनंकार्यमित्युक्त्यैवसंगृहीतइति ॥ ७ ॥ ननुसाधनाध्यायेवक्तव्यस्योपासनस्यात्रकर्मक्षयाख्यफलोक्तिपरपादेनिरूपणमसंगतमित्यतो ज्ञानस्यांतरं

SGDF
Sri Gargeshwari Digital Foundation

गसाधनत्वद्योतनायात्रनिरूपणमितिभावेनतत्फलमाह। ब्रह्मतेनयात्यपरोक्षतामिति । तेनब्रह्मत्वाद्युपासनेनब्रह्मकर्तृ अधि
कारिणामपरोक्षविषयतांयातीत्यर्थः । एतेनयदुपासनापादे तन्निर्धारणार्थनियमस्तद्दृष्टेःपृथग्घ्यप्रतिबंधःफलमिति श्रवण
मननिदिध्यासनानांसाक्षात्परंपरयासाक्षात्कारहेतुत्वमुक्तं ॥ अ० ३ ॥ पा० ३ ॥ अ० २५ ॥ यदप्यिज्ञानपादे ऐहिकमप्र
स्तुतप्रतिबंधइत्यत्रव्यभिचारनिरासेनज्ञानफलकत्वमुक्तंतदत्रस्फुटीकृतंभवति ॥ अ० ३ ॥ पा० ४ अ० १० ॥ यत्तुज्ञानस्य
मुक्तिहेतुत्वमयुक्तं येनतदर्थमुपासनमावश्यकंस्यात् । चिरकालीनचीर्णकर्मणांभूयसांभावेनतेषांभोगेनविनानिवृत्त्ययोगात्कर्मणां
चिरकालभोगेचसतिजीर्णबीजवज्ज्ञानस्याहेतुत्वापत्तेरित्यतःप्राप्तं तदधिगमइत्यादिसूत्रसप्तकं । तदर्थंभाषते । प्रारब्धकर्म
णोन्यस्यज्ञानादेवपरिक्षयः । अरिष्टस्योभयस्यापिसर्वस्यान्यस्यभोगतइति । उभयस्यापिज्ञानात्पूर्वोत्तरकालीनस्यापि
सर्वस्यज्ञानादेवपरिक्षयोभवति । प्राचीनस्यनाशः । उदीचीनस्यचोत्तमानांसर्वात्मनाऽश्लेषः । अधमानांनृणांतूत्तरारिष्टस्यप
रिक्षयोनामाशुचित्वास्पृश्यत्वासंभाष्यत्वाद्यनापादकत्वंध्येयं । मुक्तावानंदह्रासकरत्वंतुप्रागुक्तरीत्यापापस्यास्त्येवातोनतेनविरो
धः । नन्वेवंनाभुक्तंक्षीयतइत्यादिवचनविरोधइत्यतोऽनारब्धकार्येएवत्विविसूत्रोक्तंविशेषमाह । प्रारब्धकर्मणोन्यस्यारिष्ट
स्येति । वचनंतुप्रारब्धपरमितिभावः । अत्रपुण्यपापसाधारण्येनकर्मणइतिवाच्येअरिष्टस्यैवेतिपापस्यैवोक्तिस्तुप्राचीनपुण्यस्या
निष्टस्यत्यागइष्टस्यभोगः । उत्तरस्यचात्यागइतिविशेषद्योतनाय । अन्यस्याप्रारब्धारिष्टादन्यस्य प्रारब्धपापस्यप्रारब्धपुण्य ॥ ५५ ॥
स्यचभोगतोभोगेनपरिक्षयइत्यर्थः । प्रारब्धस्येतिवाच्येऽन्यस्येत्युक्तिःप्रारब्धपुण्यपापोभयग्रहणाय । एतच्चोपलक्षणं । मिथ्या

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानिपुण्यस्याप्येवंध्येयं ॥ ८ ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांराघवेंद्रयतिकृतायांचतुर्थाध्यायस्य प्रथमःपादः ॥ ४ ॥ १ ॥ एवंज्ञानभोगाभ्यांक्षीणकर्मणामधिकारिणांकायत्यागप्रकारंवक्तुमयंद्वितीयःपादःप्रवृत्तः । तदर्थस्तु उत्क्रम्यमानुषामुक्तियांतिदेहक्षयात्सुराइतिवक्ष्यमाणार्धेनव्यक्तः । अधिकारिभेदेनावांतरभेदेपिदेहत्यागप्रकाररूपैकार्थ्या त्पादैक्यमितिभावः । तत्र कथंसुराणांदेहलयइत्यतः तंप्रकारंवक्तुं । वाङ्मनसिदर्शनाच्छब्दाच्च । तन्मनःप्राणउत्तरात् । भूतेषुतच्छ्रुतेः । नैकस्मिन्दर्शयतोहीतिनयचतुष्टयं । तत्र पूर्वपूर्वदेवानांस्वस्वजनकदेवेषुदेहलयउच्यते सत्त्वयुक्तइव । तथात्वे स्वोत्तमदेवान्प्रविष्टानांकूपपतितजंतूनामिवक्लेशापत्तेरित्यतस्तत्तात्पर्यमाह । उत्तरेषूत्तरेष्वेवंयावद्वायुंविमुक्तिगाः । प्रविश्य भुंजतेभोगांस्तदंतर्बहिरेववेति । पूर्वेपूर्वेइतियोज्यं । पूर्वेपूर्वे अवराअवरादेवाः उत्तरेषूत्तरेषुस्वस्वजनकोत्तमदेवेषुप्रविश्य भोगान्भुंजते । कुत्र तंदतर्बहिरेववेति । सर्वेदेवाःस्वस्वतारतम्यक्रमानुरोधेनोत्तमदेवेषुप्रविश्यतद्देहांतर्बहिर्निर्गत्यचस्वयोग्या नेवभोगान्भुंजते । भोगानेव नतुक्लेशानितिवावधारणान्वयः । तत्रहेतुर्विमुक्तिगाइति । कर्मादिबंधाद्विशेषेणमुक्तिंमोचनंप्राप्ता इत्यर्थः । उत्तरेषूत्तरेष्वितिवीप्सास्वस्वोत्तमदेवेषुप्रवेशइतिसूचनाय । कियत्पर्यंतमवराणामुत्तमानुप्रवेशेनभोगाइत्यतउक्तं । एवं यावद्वायुमिति । वायुशब्दितचतुर्मुखपर्यंतमेवंप्रविश्यभोगान्भुंजतइत्यर्थः । संज्ञापूर्वकोविधिरनित्यइतिस्वमोर्लुङ्नकृतः । तेन यावद्वायुमित्यादिसाध्वित्याहुः ॥ १ ॥ २ ॥ ४ ॥ ५ ॥ यद्येवंतर्हिसर्वेषांमुक्तत्वंनस्यादीशप्राप्तेरेवमुक्तित्वात् । वायोरेववासर्वो त्तमत्वप्राप्तेश्चेत्यतः सोध्यक्षेतदुपगमादिभ्यइत्येतन्नयार्थमाह । वायुर्विष्णुंप्रविश्यैवेति । तदंतर्बहिरेववाभोगान्भुंजतइ

SGDF
Sri Gargeshwari Digital Foundation

त्यन्वेति । एवेतिशंकाद्वयंनिराह । किंसर्वेषांभोगएकप्रकारइत्यतोनेत्याह । भोगश्चैवोत्तरोत्तरमिति । चस्त्वर्थे । भोगस्तूत्त
रोत्तरमेवस्वस्वतारतम्यानुरोधेनैवेति ॥ ३ ॥ एतेनसपादश्लोकेनवायुद्वारासर्वदेवानामीशेप्रवेशोक्तिपरस्य तानिपरेतथाह्याहे
त्येतन्नयस्याप्यर्थःसंगृहीतोध्येयः ॥ ७ ॥ तथावायुर्विष्णुंप्रविश्यैवेतिवायोरपीशवशत्वोक्त्यैवमुक्तानामीशाधीनत्वस्यकैमुत्यसिद्ध
तयामुक्तानामीशाधीनत्वोक्तिपरस्य अविभागोवचनादित्येतन्नयस्याप्यर्थःसंगृहीतोभवति ॥ ८ ॥ तथाचवाय्वंतानांविमुक्ति
गानांप्रवेशितृत्वस्यविष्णोःप्रवेश्यत्वस्यचोक्त्याश्रीदेव्याःद्वयोरप्यत्राभाषणेनतस्यालयाभावस्वातंत्र्याभावयोःसूचनात् । श्रियो
लयाभावाद्युक्तिपरस्य समनाचास्तृत्युपक्रमादमृतत्वंचानुपोष्येत्यादिसूत्राष्टकस्यापितात्पर्यार्थःसंक्षिप्तोध्येयः ॥ ६ ॥ यत्तु
मनुष्याणांकायत्यागप्रकारंवक्तुं तदोकोग्रज्वलनमित्यादिसूत्रपंचकं। तदर्थमाह। उत्क्रम्यमानुषामुक्तिंयांतीति । ज्ञानिमा
नुषाःब्रह्मनाड्यादेहान्निर्गत्यमुक्तिंयांतीत्यर्थः। उत्क्रामंतिमानुषाइत्येववाच्येमुक्तिंयांतीत्युक्तिर्मुक्तिगमनएवोत्क्रमणंअन्यदातुनैवं।
तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंतीत्यादेरितिसूचयितुं । अत्रमानुषाइतिप्रायिकत्वाभिप्रायं। तेनइहैवकेचिन्मुच्यं
तेनोत्क्रामंतिकदाचनेतिवचनविरोधोनेतिध्येयं । यद्वेदंवचनंमानुषजीवविषयमितिबोध्यं ॥९॥ अत्रोत्क्रम्ययांतिमुक्तिमित्युक्त्यै
वोत्क्रमणपूर्वकगमनांगस्यगत्यनुस्मरणस्यावश्यकत्वोक्तिपरस्य योगिनःप्रतिस्मर्येतेइतिनयस्याप्यर्थःसंगृहीतोभवति ॥ १० ॥
उत्क्रम्यमानुषामुक्तिंयांतीत्युक्त्यादेवाःकथमित्याकांक्षायां वाङ्मनसीत्याद्यधिकरणानांप्राकृतात्पर्यार्थमात्रोक्तावपिइहप्रस्तावात्प्र
तिपाद्यमर्थमाह। देहक्षयात्सुराइति। मुक्तिंयांतीत्यन्वेति एतेनविमुक्तिगाइत्युक्तमुक्तिगतत्वप्रकारोविवृतः। तत्रसुरालीनदेहा

इत्येववाच्येमुक्तिंयांतीत्युक्तिर्मुक्तिगमनएवसुराणांदेहलयोऽन्यदाअवन्यांअवतारदशायामुत्क्रमणमप्यस्तीतिसूचयितुं। अतएवदे
हलयात्सुराउत्क्रम्यमानुषाइत्यनुक्त्वोत्क्रम्येत्युत्क्रमणस्यपूर्वमुक्तिः। उक्तंचानुव्याख्याने। जातानांमानुषेलोकेदेवानांचकदाचन।
उत्क्रांतिमार्गौभवतोनतदामुक्तिरिष्यतइति ॥ ७ ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांश्रीराघवेंद्रयतिकृता
यांचतुर्थाध्यायस्यद्वितीयःपादः ॥ ४ ॥ २ ॥ मार्गोगम्यंचैतत्पादार्थइतिभावेनैतत्पादीयाधिकरणानांसंग्रहेणार्थमाह । अ
र्चिरादिपथावायुंप्राप्यतेनजनार्दनं । यांत्युत्तमानरोच्चाद्याब्रह्मलोकात्सहामुनेति । अयंविवेकः । द्विविधोहिमार्गः ।
अर्चिर्मार्गोदेवानांलयमार्गश्चेति । तद्वयमपिअर्चिरादिपथेत्यनेनसंगृह्यते । आदिपदेनप्रवेशमार्गस्यग्रहणात् । पथिभ्यामिति
वाच्येपथेत्येकवचनंजात्यभिप्रायं । ऋक्पूरब्धूःपथामानक्षइतिसमासांतोऽनित्यः । स्रष्टृष्वेवतुसृज्यानांप्रवेशोब्रह्मणोलये । देवा
नांमार्गउद्दिष्टोनार्चिरादिर्नचोत्क्रमइत्यनुभाष्योक्तेः । तथाचायमर्थः । उत्क्रांतानरोच्चाद्याहि उत्क्रांतस्तुशरीरात्स्वाद्गच्छत्यर्चिषमे
वत्वित्यादिभाष्यस्थस्मृत्युक्तार्चिर्मार्गेण । उत्तमादेवाद्यास्तु तस्मादशेषागिरिजांप्रविश्यतयैवरुद्रंसहतेनवाणीमित्याद्यनुभाष्योक्त
प्रवेशमार्गेण वायुंप्राप्येति । अनेन अर्चिरादिनातत्प्रथितेरित्यादिनयचतुष्टयार्थउक्तोध्येयः । अर्चिर्मार्गमात्रस्यैवैतत्पादो
क्तत्वेपिप्रवेशमार्गःपूर्वपादार्थःप्रसंगादत्रानूदितोब्रह्मप्राप्तिकथनार्थमितिबोध्यं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ वैद्युतेनैवततस्तच्छ्रुतेरि
ति नयस्यार्थः । तेनजनार्दनंयांतीति । तेनवायुना नान्येनेत्यर्थः । सएनान्ब्रह्मगमयतीतिश्रुतेरितिभावः ॥ ५ ॥ यत्तुगम्यनि
रूपणार्थं कार्यंबादरिरित्यादिसूत्रदशकमधिकरणं तत्र परंजैमिनिर्मुख्यत्वादित्याद्युत्तरसूत्रपंचकस्याप्यर्थः । तेनजनार्दनं

SGDF
Sri Gargeshwari Digital Foundation

यांत्युत्तमाइति । अप्रतीकादेवतास्तुऋषीणांशतमेवच । राज्ञांतुशतमुद्दिष्टंगंधर्वाणांशतंतथा । इत्युक्तदेवादिरूपाप्रतीकालंब नाउक्ताः । तेनवायुनासाक्षादेवजनार्दनंयांति जन्मरहितंसंसारार्दनंपरंब्रह्मयांतीत्यर्थः । कार्यंबादरिरित्यादिसूत्रपंचकस्यार्थो नरोच्चाद्याब्रह्मलोकात्सहामुनेति । देवाद्यन्येमानुषोत्तमाद्याःब्रह्मलोकात् । ल्यब्लोपेपंचमी । ब्रह्मलोकंचतुर्मुखाधिष्ठितंलोकं प्राप्यामुनाचतुर्मुखब्रह्मणासह । तेनवायुनाजनार्दनंयांतीत्यर्थः । अप्रतीकाश्रयायेहितेयांतिपरमेवतु । स्वदेहेब्रह्मदृष्ट्यैवगच्छे द्ब्रह्मसलोकतां । ब्रह्मणासहसंप्राप्तेसंहारेपरपमंदमितिगारुडोक्तेरितिभावः ॥ ६ ॥ इतिश्रीमद्ब्रह्मसूत्राणुभाष्यविवृतौतत्व मंजर्यांराघवेंद्रयतिकृतायांचतुर्थाध्यायस्यतृतीयःपादः ॥ ४ ॥ ३ ॥ अर्चिरादिपथाब्रह्मप्राप्तानांभोगंवक्तुंचतुर्थःपादः । तदर्थमाह यथासंकल्पभोगाश्चचिदानंदशरीरिणइति । नरोच्चाद्याउत्तमाइतिवर्तते । नरोच्चाद्याउत्तमाश्चिदानंदशरीरिणो मुक्ताःसंतः यथासंकल्पभोगाश्चयथेष्टभोगवंतश्चेत्यर्थः । नकेवलंजनार्दनंयांतीत्येवेति चार्थः । मुक्तानांभोगवत्त्वमेतत्पादप्रति पाद्यमितियावत् । यत्तुमुक्तानांपरब्रह्मानतिक्रमेणैवभोगंवक्तुं संपद्याविहायस्वेनशब्दादिति सूत्रंतदर्थमाह । यथासंकल्प भोगाश्चचिदानंदशरीरिणइति । सहामुनेतिवर्तते । उत्तमानरोच्चाद्याश्चचिदानंदशरीरिणः मुक्ताःसंतोमुनासह पूर्वप्राप्य त्वेनप्रकृतजनार्दनेनसह । तमविहायैव तमनतिक्रम्येतियावत् । यथासंकल्पभोगाश्चेत्यर्थः ॥ १ ॥ यत्तुसतत्रपर्येतीत्यादौब्रह्मप्रा प्यभोगंभुंजानस्यमुक्तत्वंवक्तुं मुक्तःप्रतिज्ञानादितिसूत्रं तदर्थोपिचिदानंदशरीरिणोमुक्ताःसंतोयथासंकल्पभोगाश्चेत्युक्त्यैवसं गृहीतोध्येयः । सूत्रादावेकवचनंतुसमुदायाभिप्रायमितिभावः ॥ २ ॥ अमुनाजनार्दनेनेत्युक्त्यैवसूर्यमगन्मज्योतिरिति सतेज

SGDF
Sri Gangeshwar Digital Foundation

सिसूर्येसंपन्नइति समाख्यानात्परंज्योतिरुपसंपद्येत्यत्रज्योतिःशब्दितःसूर्यएव नब्रह्मेत्यतस्तस्यब्रह्मत्वंवक्तुंप्राप्तस्य आत्माप्रकर
णादित्यस्याप्यर्थःसंगृहीतोध्येयः ॥ ३ ॥ यत्त्वीश्वरस्यसर्वभोक्तृत्वसिद्धयेसायुज्यभाजामीशभुक्तभोक्तृत्वंवक्तुं अविभागेनदृष्ट
त्वादितिसूत्रं । तस्याप्यर्थोमुनासहोत्तमायथासंकल्पभोगाश्चेत्युक्त्यैवसंगृहीतोध्येयः ॥ ४ ॥ यत्तुमुक्तानामदेहत्वेनाभोगमाशं
क्यब्रह्मदेहेनचिन्मात्रस्वरूपदेहेनभोगोपपादकं ब्राह्मेणेत्यादिसूत्रत्रयं तस्याप्यर्थोऽमुनायथासंकल्पभोगाश्चचिदानंदशरी
रिणइति । उत्तमानरोच्चाद्याश्चचिदानंदशरीरिणोज्ञानाद्यात्मकस्वरूपदेहवंतःसंतोयथासंकल्पभोगाइत्यर्थः। उत्तमास्तुअमुनाच
प्राप्यत्वेनोक्तजनार्दनेनापियथासंकल्पभोगाइत्यर्थः । तद्देहेनापिभुंजतइतिवाच्येपि देहदेहिनोरभेदादमुनेत्येवोक्तिः । संपद्यब्रह्म
णाभिपश्यति ब्रह्मणाभिश्रृणोति आदत्तेहरिहस्तेनहरिदृष्ट्यैवपश्यतीत्यादेः ॥ ५ ॥ यथासंकल्पभोगाइत्युक्त्यैव संक
ल्पादेवचेत्यस्याप्यर्थःसंगृहीतोव्यक्तः ॥ ६ ॥ यत्तुविष्णोरेवसर्वोत्कर्षसिद्धयेमुक्तानांभोगेयत्तांवक्तुं जगद्व्यापारवर्जमित्यादि
सूत्रचतुष्टयं तदर्थमाह । जगत्सृष्ट्यादिविषयेमहासामर्थ्यमप्यृते । यथेष्टशक्तिमंतश्चेति । उत्तमानरोच्चाद्याश्चजगत्सृ
ष्ट्यादिविषयेमहासामर्थ्यमपि स्वयोग्याधिकानंदादिकंचऋतेयथेष्टशक्तिमंतश्च नकेवलंयथासंकल्पभोगाइतिचार्थः ॥ ९ ॥ यत्तुमु
क्तानांलोकदृष्टांतेनावरनियम्यत्वशंकांव्युदसितुंसूत्रं अतएवचानन्याधिपतिरिति । तदर्थमाह । विनास्वाभाविकोत्तमा
न् । अनन्यवशगाश्चैवेति । एवकारोभिन्नक्रमः । स्वभावानुगतानुत्तमान्विनैवानन्यवशगा नतुसर्वथानन्यवशगाइत्यर्थः ।
परमोधिपतिस्तेषामित्यादेरितिभावः । यद्वा यथान्यासएवैवकारः । अनन्यवशगानतुलोकेराजगृहंप्रविष्टस्यस्वावरनियम्यत्वदृ

SGDF
Sri Gargeshwari Digital Foundation

ष्यात्रापितथात्वंकल्प्यं । सत्यसंकल्पत्वादिवैलक्षण्यादितिभावः ॥ ७ ॥ यत्तुमुक्तानामप्युपासनभावाद्भोगविशेषभावाच्चानंदादिवृद्धिह्रासौसंसारिवत्स्यातामित्यतःप्राप्तं । स्थितिनाहेत्यादिसूत्रद्वयं । तदर्थमाह । वृद्धिह्रासविवर्जिताइति । मुक्तावुपासनस्यफलरूपत्वेनसाधनरूपत्वाभावाद्भोगस्यचक्रीडारूपत्वादितिभावः ॥ १० ॥ यत्तुसायुज्यभाग्भ्यउत्तमेभ्योन्येषांनरोत्त्वाद्यानांचिच्छरीरेणसुप्तौभोगादृष्टेर्मुक्तावपितस्यभोगायतनत्वायोगेनभोगायबाह्यदेहाभ्युपगंतौदुःखादिकमाशंक्यसमाधानार्थं अभावंबादरिरित्यादिसूत्रसप्तकं । तदर्थंप्राग्वक्तव्यमपीहवृद्धिह्रासवर्जितत्वोक्तिप्रसंगाद्वापूर्वोत्तरहेतुकत्वद्योतनायवात्राह दुःखादिरहिताइति ॥ ज्योतिषैवरूपेणचितावाचितावेत्यादिश्रुत्या स्वेच्छयाकदाचिद्बाह्यदेहोपादानेनभोगांगीकारेपिनदुःखादिकं । तीर्णोहितदासर्वान्शोकान्हृदयस्यभवतीत्यादेरितिभावः ॥ ८ ॥ यत्तुस्वर्गिणांपुनःसंसारप्राप्तिंदृष्ट्वामुक्तानामपिपुनरावृत्तिरितिशंकाव्युदासायसूत्रं । अनावृत्तिःशब्दादनावृत्तिःशब्दादिति । तदर्थमाह । नित्यंमोदंतेऽविरतंसुखमिति । अविरतंविरामरहितं सुखंनित्यंसर्वकालंमोदंते अनुभवंति । मोदनस्यसुखानुभवरूपत्वेपीहसुखमितिश्रवणादनुभवमात्रंग्राह्यं । ज्ञानग्राह्यमितिवत् । यद्वानित्यंमोदंते । कुतः । यतोविरतंसुखमितियोजना ॥ ११ ॥ एवंसमापितभाष्योभगवान्शिष्याणामादरातिशयजननायग्रंथाल्पत्वेप्यर्थाधिक्यंदर्शयन् कृतग्रंथमीश्वरेर्पयति ॥ पूर्णप्रज्ञेनमुनिनासर्वशास्त्रार्थसंग्रहः ॥ कृतोयंप्रीयतांतेनपरमात्मारमापतिः ॥ परमात्मापरमचेतनः । इत्युक्तंव्यंजयन्नादरातिशयेनांतेपितदुक्तगुणवैशिष्ट्येनभगवंतंनमति ॥ नमोनमोशेषदोषदूरपूर्णगुणात्मने ॥ विरिंचशर्वपूर्वेड्यवंद्यायश्रीवरायतेइति ॥ पूर्वार्धेनपूर्वाध्यायद्वयार्थः । उत्तरार्धे

नवंद्यत्वोक्त्यासर्वाभीष्टदातृत्वस्यापिलाभेनोत्तराध्यायद्वयार्थोप्युपात्तइति ॥१॥ पूर्णचित्सुखदेहायदोषदूरायविष्णवे ॥ नमःश्रीप्राणनाथायभक्तमुक्तिप्रदायिने ॥ सुधींद्रगुरुशिष्येणराघवेंद्रेणभिक्षुणा ॥ कृतायांतत्वमंजर्यामंतिमोध्यायईरितः ॥४॥ संक्षेपभाष्यविवृतिर्याकृतातत्वमंजरी ॥ तयादयालुर्लक्ष्मीशःप्रीयतांमध्ववल्लभः ॥ ॐमितिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्यविवृतौतत्वमंजर्यांश्रीराघवेंद्रयतिकृतायांचतुर्थाध्यायस्यचतुर्थपादः ॥ १ ॥ ४ ॥ ४ ॥ समाप्तोयंग्रंथः ॥ १ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः शाके १८२३.

SGDF
Sri Gargeshwari Digital Foundation

॥ इतितत्वमंजरीसंपूर्णा ॥

SGDF
Sri Gargeshwari Digital Foundation